# मनीषा

संस्कृतविषयिणी शोधपत्रिका

# MANĪṢĀ

A Reseach Journal of Sanskrit

**ISSN: 2583-2271**

**Vol -1 No. 1**

**2021**

स्नातकोत्तरसंस्कृतविभागः

**सबं-सजनीकान्तमहाविद्यालयः**

लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# मनीषा

संस्कृतविषयिणी शोधपत्रिका

# MANĪṢĀ

A Research Journal of Sanskrit

**ISSN: 2583-2271**

**Vol -1 No. 1**

**2021**

स्नातकोत्तरसंस्कृतविभागः

सबं-सजनीकान्तमहाविद्यालयः

लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# मनीषा

## (संस्कृतविषयिणी शोधपत्रिका)


**मुख्यसम्पादकः**

अध्यापकः ड. तपनकुमारदत्तः

अध्यक्षः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः

**सम्पादकः**

**ड. भवशङ्करमुखार्जी**

सहाचार्यः, प्रधानः, स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः

**सहसम्पादकौ**

**ड. गगनचन्द्रदे**

सहाचार्यः, स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः

**श्रीमान् सुमन्तचौधुरी**

सहायकाध्यापकः, स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः

**सम्पादकमण्डली**

**अध्यापकः (ड.) बिष्णुपदमहापात्रः**

आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, निउ-दिल्ली

**ड. केशवचन्द्रमहापात्रः**

अध्यक्षः, नरेन्द्रनाथसंस्कृतमहाविद्यालयः, प्रियबागः, ओडिशा

**ड. अजयकुमारमिश्रः**

आचार्यः, प्रधानः, संस्कृतविभागः, सिधोकानहोबीरसाविश्वविद्यालयः, पुरुलिया, पश्चिमबङ्गः

**ड. सुशान्तकुमारराजः**

सहाचार्यः, केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**ड. बुद्धेश्वरषडङ्गी**

सहाचार्यः, श्रीसीतारामवेदिकादर्शसंस्कृतमहाविद्यालयः, कलिकाता, पश्चिमबङ्गः

**ड. गोपीकृष्णन-रघुः**

सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुडमठम्, हाओडा, पश्चिमबङ्गः

## उपदेष्टृमण्डली

**अध्यापकः (ड.) गोपबन्धुमिश्रः**

उपाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः

**अध्यापकः (ड.) गोपालमिश्रः**

भूतपूर्व उपाचार्यः, गौडबङ्गविश्वविद्यालयः

अध्यापकः, संस्कृतविभागः, रवीन्द्रभारतीविश्वविद्यालयः, कलिकाता, पश्चिमबङ्गः

**अध्यापकः (ड.) गोपालकृष्णदाशः**

आचार्यचरः, उत्कलविश्वविद्यालयः, भुवनेश्वरम्, ओडिशा

**अध्यापिका (ड.) सर्वाणी गाङ्गुली**

वरिष्ठा फेलो, ICSSR, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः, मेदिनीपुरम्, पश्चिमबङ्गः

**अध्यापकः (ड.) गोविन्द्रचन्द्रकरः**

आचार्यचरः, व्याकरणविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा

# MANĪṢĀ

## *(A Research Journal of Sanskrit)*


## Chief Editor

**Professor (Dr.) Tapan Kr. Dutta**
Principal, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University

## Editor

**Dr. Bhaba Shankar Mukherjee**
Associate Professor, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University

## Associate Editors

**Professor (Dr.) Gagan Chandra Dey**
Associate Professor, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU
**Sri Sumanta Chowdhury**
Assistant Professor, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU

## Editorial Board

**Dr. Bishnupada Mahapatra**
Professor in Nyaya, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi
**Dr. Keshab Chandra Mahapatra**
Principal, Narendranath Sanskrit College, Priyabag, Odisha
**Dr. Ajay Kumar Mishra**
Professor & Head, Department of Sanskrit, Sidhu Kanho Birsha University, Purulia, W.B.
**Dr. Susanta Kumar Raj**
Associate Professor in Sahitya, Central Sanskrit University, Shri Sadashiv Campus, Puri, Orisha
**Dr. Buddheswar Sarangi**
Associate Professor, Sri Sitaram Vedic Adarsha Sanskrit Mahavidyalaya, Kolkata, W.B.
**Dr. Gopikrishnan Reghu**
Assistant Professor, Ramakrishna Mission Vivekananda Educational and Research Institution, Belur Math, Howrah, W.B.

# Advisory Board

**Prof. (Dr.) Gopabandhu Mishra**
Vice-Chancellor, Somnath Sanskrit University, Gujarat

**Prof. (Dr.) Gopal Mishra**
Formar Vice-Chancellor, Gourbanga University, Professor, Department of Sanskrit, Rabindra Bharati University, Kolkata, W.B.

**Prof. (Dr.) Gopal Krishna Dash**
Ex Professor, Utkal University, Bhubaneswar, Odisha

**Prof. (Dr.) Sarbani Ganguly**
Senior Fellow, ICSSR, Department of Sanskrit, Vidyasagar University, Midnapore, W.B.

**Prof. (Dr.) Govinda Chandra Kar**
Ex. Professor in Vyakarana, Shri Jagannath Sanskrit University, Puri, Odisha

# From the Desk of Chief Editor

*Besides Fundamental Education with allied subjects, an Alma Mater just approaches the mark of its entity, but when the wings of Research and Advanced Studies are being added, the goal of the institution somehow gets fulfilled. To enrich the Post Graduate studies, publication of Research Journal has long been a desideratum. While I came to know that Post Graduate department of Sanskrit of this college intends to publish the research journal, I become overwhelmed.*

*The institution geographically based on a remote part of West Midnapore District of West Bengal. Education ratio is very low. Hand to Mouth People convince their pupil to approach their local institution i.e., Sabang Sajanikanta Mahavidyalaya for having basic education. Hence this institution flourished its wings with the first-generation students.*

*Government, Scholars, Intellectuals, Political Personage, Farmers and well-wishers of the locality extend their utmost support for the betterment of the Alma Mater.*

*Being the Institutional Head, I have to make the placement of Incalescence supports received time to time from every corner. Higher Education Department of the West Bengal Government, Vidyasagar University time and again extend their academic support for higher studies, which are prevalent to this college.*

*Though in this changing society, concept of orthodox nature of Research studies, an attempt has been made through the publication of Research Journal. Simultaneously faculty of Science and Arts initiated to publish Research Journal besides the Department concern.*

*The Research Journal "MANISHA" itself justifies its meaning as Intelligence and Desire. The journal highlighted the paper of Academic Intellectuals which will justify the necessity of the Academic Scholars. The scope of the papers sufficiently explained in the Journal. I do humbly appreciate the Scholars who have presented their valuable papers.*

*I do wish the Grand Success and continuous publication of the Journal without any interruption.*

SABANG SAJANIKANTA MAHAVIDYALAYA
Estd-1970
Lutunia, Paschim
Medinipur

*Professor (Dr.) Tapan Kr. Dutta*
*The Chief Editor,*
*Manisha*

Principal
Sabang Sajanikanta Mahavidyalaya
P.O. Lutunia, Dist.. Paschim Medinipur

## सम्पादकीयम्

विश्वस्य प्राचीनतमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैः सम्पन्ना वेद-वेदाङ्ग-उपनिषत्-पुराण-काव्य-कोष-दर्शन-व्याकरणादिसर्वाङ्गैः समन्विता अनादिनिधना संस्कृतभारती। संस्कृतभाषा परिनिष्ठिता प्रकृतिप्रत्ययविश्लेषणसंयुक्ता च एका मानवीयभाषा स्वीक्रियते। भारतवर्षस्य प्राणस्वरूपा संस्कृतभाषा। भारतवर्षस्य सभ्यता संस्कृतिश्च अस्यामेव भाषायां सुरक्षिता। यावत् संस्कृतस्य उन्नतिर्न भविष्यति तावत् भारतस्य उन्नतिरसम्भवा। किञ्चेयं भाषा विज्ञानसम्मतेति वैज्ञानिकानामभिमतम्। अत एव संस्कृताध्येतृणां संस्कृतभाषायां व्युत्पत्तिलाभार्थमस्माकं स्नातकोत्तरसंस्कृतविभागस्य अध्यापकाः संस्कृततत्त्वाधारितां **मनीषाख्यां** शोधपत्रिकां प्रकाशयितुं संकल्पमकुर्वन्। एष सत्संकल्पः अद्य फलग्राही अभवत्।

"महता व्यपदेशेन सिद्धिर्भवति पुष्कले"ति वचनानुसारेण श्रीमद्विद्वद्वरेण्यानामध्यक्षपादानां तपनदत्तमहोदयानां निरन्तरप्रोत्साहनेन महाविद्यालयानुग्रहेण च वार्षिकीयं **मनीषाख्या** शोधपत्रिका विदुषां पुरस्तात् प्रादुर्भूता। ते पुमांसः धन्याः सन्ति ये सहृदयग्राहिनः सुरभारतीसमुपासका अमरवाणीविलासकास्तदध्ययनाध्यापनपरायणा मनीषिणः संस्कृतस्य विश्वजनीनोपादेयतां मनसि निधाय जगति स्थापयन्ति। ते तु सर्वथा वन्दनीयाः प्रशंसनीयाश्च सन्ति। एतेषाञ्च भाषा सरसा, सरला, सप्रवाहा च। सन्त्यत्रापि विभिन्नराज्यविश्वविद्यालयमहाविद्यालयविद्यालयेषु लब्धवर्णा यैः स्वप्रयत्नसाध्यालङ्कारैरलङ्कृतेयम्।

दुस्तरं गहनं सम्पादकसागरं तितीर्षुरहमस्याः पत्रिकाया विश्वजनीनोपादेयतां मनसि निधाय आशासे यद् इयं शोधपत्रिका सर्वेषामेव सभाजनीया भविष्यतीति नास्त्यत्र सन्देहपङ्कावसरः। संस्कृतपत्रकारिताक्षेत्रं वस्तुतो विद्यते नितरामसमृद्धं विद्वद्भिरुपेक्षितञ्च। तथापि –

"गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति पण्डितः॥"

प्रथमप्रकाशितेयं शोधपत्रिका छात्राध्यापकानां सर्वेषां च नितरां हर्षं मङ्गलञ्च आवहति इति मन्ये। पुनरपि संस्कृतलेखने भवतां सहयोगो निरतामपेक्षते येनाग्रिमे अङ्के रचनावैविध्यं स्यात्, पत्रिकायाः प्रसारश्च भवेदिति।

भाषामृतं सुकुतुकं बहुतत्त्वपूर्णं
प्रेक्षावतां सुखकरं हितसाधकञ्च।
ज्ञानप्रदीपकिरणैः कुशलं तनोतु
ज्ञानप्रदं भवतु वै नितरां मनीषा॥

सेयं **मनीषा** सर्वजनहृद्यं प्रेमभाजनञ्च भवेदिति।

विदुषां वशंवदः

**सम्पादकः**

Prof. Gopabandhu Mishra
*Vice-Chancellor*

# Shree Somnath Sanskrit University

(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, Veraval - 362 266. District : Gir-Somnath, Gujarat, INDIA
Phone : 02876 - 244531 - Mob. : +91 94266 87450 - E-mail : vc@sssu.ac.in

दिनाङ्क: २०-०५-२०२१

शुभसन्देश:

पश्चिमबंगप्रान्तस्य पश्चिममेदिनीपुरे विद्यमानस्य लब्धप्रतिष्ठस्य सबं-सजनीकान्तमहाविद्यालयस्य स्नातकोत्तरसंस्कृतविभागद्वारा “मनीषा” इत्याख्या वार्षिकी राष्ट्रिया शोधपत्रिका अप्रतिमं कलेवरम् अपारां चात्मशक्तिम् आदाय प्रकाश्यमानाऽस्तीति विज्ञाय मनो मे मोमुद्यते ।

आचार्य: पाणिनि: प्रत्येकं विवक्षाया: कृते मन: विशिष्टसाधनरूपेण प्रस्तुवन् ब्रूते –

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्कते विवक्षया
मन: कायाग्निमाहन्ति स प्रेरयति मारुतम् ।
मारुतस्तुरसि चरन्मन्द्रं जनयते स्वरम् । इति । (पाणिनीयशिक्षा)

अर्थात् अर्थान् उद्दिश्य आत्मा बुद्धिं तु प्रेरयतीति बुद्धि: हेतुरूपा, किन्तु विवक्षया सह योगस्तु मनस: एव भवति चेत् तादृशं मन: अग्रे सृत्वा वर्णं जनयति, ततोऽभिलषितं वाक्यं यावत् विवक्षा प्रसरति । एवमेव ज्ञान-इच्छा-क्रिया इति त्रितयेऽपि कस्यचिद् वस्तुन: “अयं घट: अयं पट:” इति ज्ञानेन संजातेन तत: परं तत्प्राप्तौ इच्छायाम् ईषायां वा मनस: प्रवृत्तिरेव साधनं भवति, किं च इच्छायां सत्यां तत्प्राप्तिरूपा क्रिया प्रवर्तते इति जगति एतत्त्रिकस्य कृते मध्येमणिन्यायेन या ईषा इच्छा वा परिलक्ष्यते, सा तु मनसैव भवति । सैव मनस: ईषा मनीषा शुद्धमन:सम्भवा भवति चेत् सर्वजनकल्याणकारिणी भवति, किन्तु संकीर्णचित्तवृत्तिजा भवति चेत् अनभीष्टं विकृतं वा फलं जनयति । अतस्तत्र ईषाया: इच्छाया: वाऽपेक्षया मनस: वास्तविक: स्तर: एव मूलभूतो विषयो भवति ।

Prof. Gopabandhu Mishra
Vice-Chancellor


Rajendra Bhuvan Road, Veraval - 362 266. District : Gir-Somnath, Gujarat, INDIA
Phone : 02876 - 244531 - Mob. : +91 94266 87450 - E-mail : vc@sssu.ac.in



अत एव पातञ्जलयोगदर्शनस्य माङ्गलिकं सूत्रं प्रवर्तते – "योगश्चित्तवृत्तिनिरोधः" इति । चित्तस्य असंख्यानां विक्षिप्तानां वृत्तीनां शक्यत्वात् तासां निरोधेनैव चित्तस्य ऐकाग्र्येण बहु किमपि असाध्यं किं च जगन्मङ्गलकरं कार्यं साधयितुं शक्यते । यथा नद्याः जलधाराः विक्षिप्ताश्चेत् ताः निरुपयोगिन्यः कदाचित् बाहुल्येन अहितकारिण्योपि भवन्ति, किन्तु तासां नियमनेन यदि व्यवहारः क्रियते, तर्हि तेन जलसेककर्म, विद्युदुत्पादनादीनि महान्ति कर्माणि साधीयन्ते ।

मनीषेयं तद्वद् विदुषां सहृदयानां संस्कृतवाङ्मयगतम् एतावदवधि अज्ञातम् अल्पज्ञातं वा सारतत्त्वं दुग्धात् नवनीतवत् संगृह्य प्रस्तूयमानानां ज्ञानराशीनां समवायस्वरूपा भूयात् । एतस्याः शोधपत्रिकायाः लेखकाः समीक्षकाः सम्पादकाश्च तथा च पाठकाः सुतरां ज्ञानचक्षुर्भिः विविधशास्त्रगतबोधप्रकाशं सततं दिदृक्षवो भवेयुः किं च सर्वेऽपि ते मनीषिणः भूत्वा स्वस्वेच्छां नियतसंयतानुशासितमनस्कतया सच्चिन्तनेषु सद्विमर्शेषु तथा च सततसत्समीक्षासु नियोजयेयुः, तदर्थम् एषा "मनीषा" उत्तमोत्तमसंसाधनरूपेण सर्वदा सर्वथा चोपतिष्ठेतेति आकाङ्क्ष्य विरमति

गोपबन्धुमिश्र
(गोपबन्धुमिश्रः)
कुलपतिः

# सूचीपत्रम्


| क्रमः | कीर्तिः | स्रष्टा / स्रष्ट्री | पुटम् |
|---|---|---|---|
| १ | अभिनवमङ्गलदशकम् | ड. गगनचन्द्रदे | १ |
| २ | न्यायवैशेषिकतन्त्रे मनस्तत्त्वम् | ड. बिष्णुपदमहापात्रः | ३ |
| ३ | काव्यमार्गे शब्दवृत्तयः | ड. बुद्धेश्वरषडङ्गी | ९ |
| ४ | पण्डितराजजगन्नाथकृतकाव्यविभागस्यौचित्यम् | डा. चन्द्रकला आर्. कोण्डी | १३ |
| ५ | न्यायवैशेषिकमते कारणतावादविचारः | शिवप्रसादपोखेलः | १९ |
| ६ | जीवनं जलम् | ड. गोपीकृष्णन्-रघुः | २३ |
| ७ | कोरोनासंक्रमणनिराकरणे | | |
| | संस्कृतवाङ्मये उपादानानि | लक्ष्मीकान्तषडङ्गी | २६ |
| ८ | प्राकृतिकचिकित्सापद्धतिः | ड. जगमोहन-आचार्यः | ३१ |
| ९ | वैदिकभाषायामुपसर्गाणां व्यवहारः | ड. गगनचन्द्रदे | ३५ |
| १० | व्याकरणशास्त्रे पदविचारः | सुमन्तचौधुरी | ४१ |
| ११ | श्रीशिवरामेन्द्रसरस्वतीविरचितरत्न- | | |
| | प्रकाशदिशा कारके इति सूत्रार्थविचारः | सुकान्त मान्ना | ४८ |
| १२ | न्यायवर्त्मानुसारिव्याख्यानां करणविमृष्टौ प्रभावः | श्रीजीव-गोस्वामी | ५३ |
| १३ | आचार्यरघुनाथदिशा पदार्थतत्त्वसमीक्षणम् | दीपकगराइ | ५८ |
| १४ | न्यायमते अनुमानप्रमाणम् | सुरजित् मण्डलः | ६४ |
| १५ | चार्वाकनये अनुमानादेः प्रमाणत्वखण्डनम् | जयदेवदिण्डा | ६७ |
| १६ | वेदे नारीनामधिकारविमर्शः | सुचन्द्रा मुखर्जी | ७४ |
| १७ | देवीसूक्ते सृष्टिप्रक्रिया | निमाइ साँतरा | ७७ |
| १८ | वर्णानां सृष्टिप्रक्रियाविचारः | सुप्रिया-सुइ | ८० |
| १९ | दर्शनशास्त्रदृष्ट्या शिक्षकचरितसमीक्षा | गौराङ्ग-शो | ८३ |
| २० | कर्मण्येवाधिकारस्ते | सत्येन्द्रनाथ-आदकः | ८७ |
| २१ | कालिदासवर्णितेषु कारुण्यवियोगादिषु | | |
| | मानवेतराणां तादात्म्यानुभूतिः | कृष्णगोपालपात्रः | ९१ |
| २२ | अभिज्ञानशकुन्तले कालिदासस्य प्रकृतिभावना | सुस्मिता-दे | ९५ |
| २३ | लेखकपरिचितिः | | १०० |

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# अभिनवमङ्गलदशकम्

ड. गगनचन्द्रदे

श्रीवात्स्यत्रितशाकलाश्शतबलाक्षोद्दालकौ सायणो
यास्काचार्यहिरण्यगर्भसुलभा माण्डव्यशांखायनौ।
आत्मानन्दगदाधरौ हरिहरश्श्रीमाधवो वेङ्कटः
सर्वे वेदविदः खलु प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥१॥
भारद्वाजसुनागभागुरिशिवा: कात्यायन: पाणिनि-
गार्ग्यगालववोपदेववरदाः स्फोटायनो वामनो।
रामानन्दजिनेन्द्रबुद्धिमलया नागेशचारायणौ
शाकल्यक्रमदीश्वरक्षपणकाः कुर्वन्तु वो मङ्गलम् ॥२॥
श्रीव्यासो रघुनाथजैमिनिमुनी गङ्गेशवात्सायनौ
श्रीवाचस्पतिवासुदेवकपिला निम्बार्करामानुजौ।
श्रीचैतन्यकणादगौतमबुधाश्श्रीशङ्करो वल्लभो
विद्याभूषणगौडपादमथुराः कुर्वन्तु वो मङ्गलम् ॥३॥
श्रीनागार्जुनदेवसूरिशवरा दिङ्नागवंशीधरौ
विद्यानन्दपतञ्जली मुनिवरौ श्रीहेमचन्द्रामितौ।
श्रीश्रीकण्ठगणेशमाठरवरात्रेयस्तथा मण्डनः
सर्वे दार्शनिका ननु प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥४॥
श्रीदक्षो रघुनन्दनात्रिलिखिताश्शङ्खो वशिष्ठाङ्गिरौ
श्रीबौधायनयाज्ञवल्क्यविदुरा हारीतवैखानसौ।
आपस्तम्भबृहस्पती यममनू संवर्त्तशातातपौ
नीतिज्ञा निखिला सुनीतिसहिताः कुर्वन्तु वो मङ्गलम् ॥५॥
श्रीनारायणवर्धमानचरका दीपङ्करः सुश्रुतः
कृष्णात्रेयगणेशमाधवकरा गोविन्ददामोदरौ।
श्रीस्वच्छन्दसुषेणनिश्चलकरा वाग्भट्टविद्यापती
प्रख्याताः खलु वैद्यशास्त्रनिपुणाः कुर्वन्तु वो मङ्गलम् ॥६॥
श्रीविश्वेश्वरविश्वनाथमुकुला: क्षेमेन्द्रविद्याधरौ

ISSN : 2583-2271
Vol. - I, No. 1: 2021

श्रीदण्डीजयदेवभोजभरताश्शोभाकरो मम्मटो।
भोजो भामहराजशेखरजगन्नाथोद्भटा रुद्रटः
सर्वे काव्यविदः सुकाव्यसहिताः कुर्वन्तु वो मङ्गलम् ॥७॥
श्रीवाल्मीकिहलायुधौ हरिहरो रत्नाकरो विल्हणः
कृष्णानन्दधनेश्वरौ जयरथः सोमेश्वरो भारविः।
भट्टिश्रीधरकालिदासविनया माघाश्वघोषौ पुनः
निःशेषे ननु काव्यशास्त्रकुशलाः कुर्वन्तु वो मङ्गलम् ॥८॥
श्रीक्षेमीश्वरशूद्रकौ च हनुमान् श्रीभट्टनारायणः
श्रीहर्षो भवभूतिभाससुभटा बोधायनो भीमटः।
प्रह्लादश्च विशाखदत्तमुरारी दिङ्नागदामोदरौ
सर्वे नाट्यविशारदाः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥९॥
श्रीकौटिल्यसदाशिवौ च यवनाचार्यश्च लीलावती
श्रीपूर्घश्च पराशरो मुनिवरो गर्गार्यभट्टौ पुनः।
सत्याचार्यपृथू वराहमिहिरः श्रीभास्करश्रीधरौ
सर्वे भारतविश्रुता बुधवराः कुर्वन्तु वो मङ्गलम् ॥१०॥

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# न्यायवैशेषिकतन्त्रे मनस्तत्त्वम्

## ड. बिष्णुपदमहापात्रः

---


### प्रबन्धसारः

*"ऋते ज्ञानान्न मुक्तिः", "विद्ययाऽमृतमश्नुते" इत्यादिश्रुत्या ज्ञायते यत् परमपुरुषार्थस्य अपवर्गस्य प्राप्तिः ज्ञानमन्तरा नैव सम्भवति। अतः ज्ञानमेव मोक्षस्य परमं साधनम्। तच्च ज्ञानं शास्त्राभ्यासात् एव प्राप्तुं शक्यते। तदर्थम् अनेकानि शास्त्राणि प्रथितानि सन्ति। तेषु शास्त्रेषु दर्शनशास्त्रमपि स्वीयं स्थानं सम्पादयति। वैदिकावैदिकदर्शनेषु न्यायवैशेषिकदर्शनयोः एकं मुख्यं स्थानं विद्यते। यद्यपि अनयोः दर्शनयोः पृथक्प्रस्थानत्वं विद्यते तथापि बहुस्थलेषु तत्त्वप्रतिपादनस्य साम्यत्वदर्शनात् अनयोः समानतन्त्रत्वम्। वैशेषिकदर्शनस्य मुख्यं लक्ष्यं भवति द्रव्यादिषड्पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं भवति। तेन तत्त्वज्ञानेन मोक्षस्यावाप्तिः, नव्यवैशेषिकमते अभावपदार्थमङ्गीकृत्य द्रव्यादिसप्तपदार्थानां तत्त्वज्ञानान्मुक्तिरिति। न्यायमते तु प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसमिति। वैशेषिकप्रस्थाने गुणाश्रयः क्रियाश्रयो वा द्रव्यमिति द्रव्यलक्षणं यदुक्तं तत्राद्यक्षणे द्रव्ये गुणक्रिययोरभावात् तत्र द्रव्यलक्षणस्याप्तिरिति तद्वारणाय समवायिकारणत्वं द्रव्यत्वमिति द्रव्यस्य निष्कृष्टं लक्षणं स्वीक्रियते। तच्च द्रव्यं पृथिवी-जल-तेजो-वायु-आकाश-काल-दिग्-आत्म-मनोभेदेन नवविधं भवति। अन्तिमं यद्द्रव्यं मनो भवति तत्सर्वथा अणुरूपं भवति। तत्र पृथिव्यादिचतुर्णां नित्यानित्यभेदेन द्वैविध्यं परिलक्ष्यते। आकाश-काल-दिगात्मनां चतुर्णां विभुत्वं स्वीक्रियते। न्यायतन्त्रे प्रमेयम् आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्ति-दोषप्रेत्यभावफलदुःखापवर्गभेदेन द्वादशविधं भवति। अत एतेषां नये षष्ठं प्रमेयं मनो भवति। तस्य मनसो द्रव्यत्वेन प्रमेयत्वेन वा ग्रहणं भवतु तत्र नैयायिकानां वैशेषिकाणाञ्च विप्रतिपत्तिर्नास्ति। मनसः किं लक्षणमिति जिज्ञासायां वैशेषिकैरुच्यते सुखाद्युपलब्धिसाधनमिन्द्रियं मन इति। अत्रेदमवधातव्यं यत् ज्ञानमात्रं प्रति आत्ममनस्संयोगः कारणं भवति। सुखादिकम् आत्मनो विशेषगुणः। सुखादिकं तु आत्मनि समवायेन तिष्ठति। आत्मवृत्तिसुखादीनां कथं प्रत्यक्षं भवति इति जिज्ञासायां सुखादिसाक्षात्कारे साधनभूतं यदिन्द्रियमपेक्ष्यते तन्मन एव। अत एव सुखादिप्रत्यक्षस्य साधनमिन्द्रियं मनो भवति। परन्तु एतादृशं लक्षणं सर्वथा न रुचिकरं यत इन्द्रियलक्षणे शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति मनसः प्रविष्टत्वात् मनोलक्षणे इन्द्रियस्य प्रविष्टत्वाच्च भवति अन्योन्याश्रयः। तस्य अन्योन्याश्रयस्य वारणाय स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणमाचार्यैः स्वीकृतम्। एतस्य विश्लेषणं प्रबन्धे भविष्यति। एवञ्च मनसो विभुत्वे स्वीकारे सुषुप्त्यनुपपत्तिरिति वेदान्तमतं परित्यज्य मध्यमपरिमाणस्वीकारे अनित्यत्वापत्तिरिति जैनादिमतं परित्यज्य सुषुप्तेः संरक्षणाय मनसोऽणुत्वं नैयायिकैः वैशेषिकैश्च स्वीकृतम्। एतस्य तत्त्वस्य परिष्कारः प्रबन्धे कृतः। वस्तुतः मनसः सत्तास्वीकारे का युक्तिः, तत्र प्रमाणं विद्यते न वा, शास्त्रकाराणां किमभिमतमेतत्सर्वं मनसि निधाय प्रबन्धोऽयं निर्मितः।*


### उपोद्घातः

मिथ्याज्ञानजन्यवासनात्मके संसारे जीवानाम् आत्यन्तिकदुःखनिवृत्तये परमसुखस्य च प्राप्त्ये महर्षिभिः गौतमकणादप्रभृतिभिः सूत्रग्रन्थः निर्मितः। तत्र गौतमैः प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसस्य प्राप्तिर्भवतीति सूत्रितम्। तथा च सूत्रं- "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[1] इति। वैशेषिकसूत्रकारैरपि द्रव्यादिपदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः इति सूत्रितम्। तथा च सूत्रं "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य-विशेषसमवायानां पदार्थानां तत्त्वज्ञानान्निःश्रेयसम्"[2] इति। तत्र न्यायतन्त्रे प्रमाणादिषोडशपदार्थेषु प्रमेयपदार्थ आत्मशरीरा-दिभेदेन द्वादशविधो भवति।

---

[1] न्या.सू. 1.1.1

[2] वै.सू. 1.1.4

ISSN : 2583-2271
Vol. - I, No. 1: 2021

तथा च सूत्रम् "आत्मशरीरेन्द्रियार्थबुद्धिमनः-प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"[3] इति। द्वादशप्रमेयेषु षष्ठप्रमेयं भवति मनः। तस्य मनसः किं स्वरूपं, तस्य सद्भावे किं प्रमाणमिति जिज्ञासायां न्यायसूत्रकारैः उच्यते "युगपज्ज्ञानानुत्पत्ति र्मनसो लिङ्गम्"[4] इति।

तत्रेदमवधातव्यं यत् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं भवति। प्रत्यक्षप्रमां प्रति इन्द्रियं करणम्, इन्द्रियार्थसन्निकर्षः व्यापारो भवति। इन्द्रियं तु बाह्य-आभ्यन्तरभेदेन द्विविधं भवति। बाह्येन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि, अन्तरिन्द्रियं तु मनो भवति। उक्तं च "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः"[5] इति। आत्मप्रत्यक्षे मनसः कारणत्वात् प्रत्यक्षलक्षणे तस्य मनसः अनुपादानात् या न्यूनता समापतति तस्याः न्यूनतायाः निराकरणार्थं भाष्यकारैः प्रतिपादितं प्रत्यक्षस्य यद्विशिष्टं कारणम् इन्द्रियादिकं तस्यैवात्रोल्लेखः। आत्ममनस्संयोगस्य ज्ञानमात्रं प्रति कारणत्वात् अत्र तस्य नैवोल्लेखः। तथाहि – "इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञानं तत् प्रत्यक्षम्। न तर्हि इदानीमिदं भवति, आत्मा मनसा संयुज्यते, मन इन्द्रियेण इन्द्रियमर्थेनेति। नेदं कारणावधारणमेतावत् प्रत्यक्षे कारणमिति, किन्तु विशिष्टकारणवचनमिति। यत् प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते"[6] इति। एवञ्च संशयेऽतिप्रसक्तिवारणाय प्रत्यक्षसूत्रे व्यवसायात्मकम् इति यत्पदमुपात्तं विद्यते तस्य व्याख्यानावसरे न्यायवार्तिककारः वदति - "संशयस्योभय-निमित्तत्वात्। उभयन्तु संशयस्य निमित्तम् आत्माऽन्तःकरणसंयोग इन्द्रियार्थसन्निकर्ष श्चेति"[7] इति। एतेन ज्ञायते न्यायवार्तिककारैः संशयस्य निमित्तत्वेन अन्तःकरणस्योल्लेखः प्रथमतया अभिहितः। वैशेषिकभाष्यकारैरपि मनसः पर्यायत्वेन अन्तःकरणशब्दस्य व्यपदेशः कृतः। तथाहि **बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणम्** इति। एतेन निश्चप्रचं वक्तुं शक्यते यत् मनः अन्तःकरणपर्यायभूतमेव। तादृशपर्यायभूतस्य मनसः किं लक्षणमिति जिज्ञासायां आचार्याः वदन्ति "सुखाद्युपलब्धिसाधनमिन्द्रियं मनः" इति अर्थात्सुखदुःखादिसाक्षात्कारकारणमिन्द्रियं मनो भवति। परन्तु एतादृशलक्षणस्वीकारे "शब्देतरोद्भूत-विशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगा-श्रयत्वमिन्द्रियत्वम्"[8] इति इन्द्रिय, लक्षणे मनसः मनोलक्षणे च इन्द्रियस्य सापेक्षितत्वाद् भवति अन्योन्याश्रयः, अस्य अन्योन्याश्रयदोषस्य वारणाय शब्दशक्ति- प्रकाशिकाकारः जगदीशः मनसो लक्षणं प्रतिपादयति – "निस्पर्शं मूर्त्तिमन्मनः"[9] इति। अर्थात् स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणमिति। प्रशस्तपादाचार्यैस्तु "मनस्त्वयोगान्मनः"[10] इति मनसो लक्षणं प्रतिपादितम्। शंकरमिश्रैस्तु "स्पर्शात्यन्ता-भाववत्त्वे सति मूर्त्तत्वं मनस्त्वं विशेषगुणासमाना-धिकरणद्रव्यवृत्तिजातिमत्त्वं वा"[11] इति मनसो लक्षणं प्रतिपादितम्। कणादतर्कवागीशैस्तु "मनस्त्वजाति प्रवृत्ति-निमित्तकत्वात् मन इति संज्ञा साङ्केतिकी"[12] इति। अत्र साङ्केतिकीति शब्दस्यायमभिप्रायः पृथिव्यादिसंज्ञावदिति।

## मनस्त्वजातिसद्भावे प्रमाणप्रदर्शनम्

तत्र "मनस्त्वयोगान्मनः" इति प्रशस्तपादाचार्यैः यन्मनसो लक्षणं प्रतिपादितं तत्र मनस्त्वजातिसद्भावे किं मानमिति जिज्ञासायां कणादतर्कवागीश इत्थं प्रवदति – **मानसप्रत्यक्षजनकतावच्छेदकतया तत्सिद्धेः, मानसत्वावच्छिन्नं प्रति मनस्त्वेन हेतुत्वात्** इति। अर्थात् मानसप्रत्यक्षत्वावच्छिन्नं प्रति मनसः कारणत्वात्

3 न्या.सू. 1.1.9
4 न्या.सू. 1.1.16
5 न्या.सू. 1.1.12
6 न्या.भा. 1.1.4
7 न्या.वार्तिक.पृ-37

8 न्या.सि.मु.पृ-197
9 श.श.प्र.पृ-107
10 प्र.भा.पृ-67
11 क.र.पृ-42
12 भा.रत्न.पृ-39

कारणस्य किञ्चिद्धर्मावच्छिन्नत्वनियमात् मानसत्वावच्छिन्नजनकतावच्छेदकस्य मनस्त्वस्य लाघवानुरोधेन जातिस्वरूपत्वमेव अङ्गीकर्तव्यमिति मनःसंज्ञायाः तन्मूलकसाङ्केतिकत्वम् उपपद्यते।

## मनसः सिद्धिप्रकारप्रदर्शनम्

मनसः सिद्धिः न जाता, किन्तु मनस्त्वजातिसिद्धिप्रकारः प्रदर्शितः, यावत् धर्मिणः सिद्धिर्न सम्भवति तावत् जातेः सिद्धिर्भवितुं नार्हति इति मनसः सिद्धौ अनुमानं प्रदर्शितं न्यायसूत्रकारैः वैशेषिकसूत्रकारैश्च। तथाहि "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"[13] इति। अर्थात् स्वस्वविषयैः रूपरसादिभिरिन्द्रियाणां संयोगे सत्यपि तैश्चेन्द्रियैरात्मनो सर्वमूर्तद्रव्यसंयोगित्वात् विभुत्वात् संयोगे सत्यपि रूपरसाद्यनेकविषयकाण्यनेकानि ज्ञानानि युगपत् नोत्पद्यन्ते तेन ज्ञायते खलु अस्ति किञ्चित् करणान्तरमपि येनात्मेन्द्रियविषयाणां संयोगे सत्यपि युगपत् ज्ञानानि नोत्पद्यन्ते, यदेव कारणान्तरं तदेव मनः इति। न्यायभाष्यकारैरुच्यते "स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि"[14] इति।

अभिप्रायस्तु स्मृतिस्तु संस्कारमात्रजन्यज्ञानरूपा, आत्मन आन्तरज्ञानलक्षणा क्रियारूपा, सा च इन्द्रियलक्षणं करणमन्तरा नैव सम्भवति इत्यतः स्मृतेर्यदान्तरमिन्द्रियं करणं तदेव मनः। अनुमानस्थले व्याप्तिस्मृतिः साध्यस्मृतिश्च स्वीकृता विद्यते, सा च मनसः स्वीकृतिमन्तरा नैव सम्भवति इत्यतः तादृशानुमानसम्पादनाय मनसः लिङ्गत्वम् अभ्युपेयम्। आगमस्तु शब्दप्रमाणरूपं भवति, तज्जन्यान्वयबोधो भवति, अन्वयबोधार्थं शक्तिग्रहस्य स्मृतेः अपेक्षा भवति, सा च मनो विना नैव सम्भवतीति आगमोऽपि मनो लिङ्गं भवति। समानधर्मवद्धर्मिज्ञानं संशयस्य कारणं भवति। तथा च संशयो भवति **स्थाणुर्वा पुरुषो वा** इति। एतादृशसंशयस्थले स्थाणुपुरुषयोः समानधर्माणां स्मृतिर्भवति तदनन्तरं संशयः स्मृतिश्च मनो अन्तरा नोपपद्यते इति संशयोऽपि मनोलिङ्गं भवति। **श्वो मे भ्राताऽऽगन्ता** इत्यादिरूपं प्रातिभं ज्ञानं तच्च स्वविषयस्य भ्रात्रादेः स्मृतिमन्तरा नैव सम्भवति स्मृतिश्च मनो विना नोपपद्यते इति प्रतिभापि मनो लिङ्गं भवति। अत्र प्रतिभाविषये इदमवधातव्यम् – इन्द्रियादिनिरपेक्षमानस-ज्ञानविशेषः प्रतिभा। प्रशस्तपादाचार्यैस्तु आर्षज्ञानस्य प्रातिभत्वं स्वीकृतम्। तच्च कदाचित् लौकिकेऽपि सम्भवति। यदि **श्व मे भ्राताऽऽगन्ता** इत्यादि वाक्यं यथार्थं स्यात्। तथाहि – "आम्नायविधातृणामृषीणाम् अतीतानागतवर्तमानेषु अतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेषु अनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत्प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तद् आर्षम् इत्याचक्षते। तत् तु प्रस्तारेण देवर्षीणाम्, कदाचित् एव लैकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति"[15]। प्रतिभा एव प्रातिभमिति न्यायकन्दलीकारैः भाषितम्। योगदर्शने महर्षिणा उक्तं – "प्रातिभाद्वा सर्वम्"[16] इति। अस्य सूत्रस्य व्याख्यानावसरे **प्रातिभं नाम तारकमिति** व्यासाचार्यैः भाषितम्। अर्थात् योगिनां प्रतिभाजन्यज्ञानविशेष एव प्रातिभं भवति।

एवञ्च सुखादिप्रत्यक्षं ह्यात्मनो मनः करणकमेव स्वकीयसुखादौ प्रमाणान्तरासम्भ-वादिति यदेव सुखप्रत्यक्षकरणं तदेव मनः इति। आदिपदाच्च दुःखादिकं ग्राह्यं भवति। एतत्सर्वं मनसि निधाय वैशेषिकाचार्यैः कणादैरुच्यते "आत्मेन्द्रियार्थसन्निकर्षज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्"[17] इति। अस्य सूत्रस्य व्याख्यानावसरे प्रशस्तपादाचार्यो वक्ति – "सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनाम् अभूत्वोत्पत्तिदर्शनात् कारणान्तरमनुमीयते। श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनाद्, बाह्येन्द्रियैरगृहीत-

[13] न्या.सू. 1.1.16
[14] न्या.भा.पृ-35
[15] प्र.भा.पृ-187
[16] यो.सू. 3.33
[17] वै.सू. 3.2.1

 ISSN : 2583-2271
Vol. - I, No. 1: 2021

सुखादिग्राह्यान्तरभावाचान्तःकरणम्”[18] इति। अर्थात् आत्मेन्द्रियार्थसान्निध्ये कारणे सत्यपि ज्ञानसुखादीनाम् अभूतत्वं कारणान्तरविरहाद् एव, अनन्तरं तेषामुत्पत्तिश्च कारणान्तरप्राप्त्या इत्यतस्तत्कारणम-न्यासम्भवात् मन एव कल्प्यते। अन्यासम्भवस्तु अन्यस्मिन् समस्ते सत्यपि तदनुत्पत्तिदर्शनाद् बोध्य इति सूक्तिकारः। एतत्सर्वमभिलक्ष्य परवर्तिभिः आचार्यैः इत्थं प्रतिपादितं – **साक्षात्कारे सुखादीनां करणं मन उच्यते।** तथाहि – “सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वाचाक्षुषसाक्षात्कारवद् इत्यनुमानेन मनसः करणत्वसिद्धिः। एवं सुखादीनामसमवायि-कारणसंयोगाश्रयतया मनसः सिद्धिर्बोद्धव्या”[19] इति मुक्तावलीकारः। अत्रानुमाने सुखसाक्षात्कारः पक्षः, अत्र पक्षे सुखपदस्यानुपादाने साक्षात्कारमात्रस्य पक्षत्वस्वीकारे सामानाधिकरण्येन साध्यसिद्धेः उद्देश्यत्वे चाक्षुषादिसाक्षात्कारे चक्षुरादिकरण-कत्वसिद्ध्या सिद्धसाधनम्, अवच्छेदका-वच्छेदेन साध्यसिद्धेरुद्देश्यत्वे तु ईश्वरप्रत्यक्षे बाध इति तद्वारणाय पक्षे सुखपदोपादानम्। तथा सति सामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्यता, सुखसाक्षात्कारस्य जन्यसाक्षात्कारतया तत्र पूर्वोक्तबाधो नास्तीति। यतः कुत्रापि सुखसाक्षात्कारेऽनुमानात् प्राक् सकरणकत्वस्य असम्भवात् न सिद्धसाधनम्।

निरुक्तसकरणकत्वं साध्यं करणजन्य- त्वरूपम्। निरुक्तहेतौ जन्यत्वपदानुपादाने ईश्वरप्रत्यक्षे अतिप्रसक्तिः, तद्वारणाय जन्यत्वम्, प्रागभावादौ अतिप्रसक्तिवारणाय साक्षात्कारेति पदमिति। जगदीशाचार्यैस्तु “मनसि प्रमाणं यथा – सुखादिप्रत्यक्षमिन्द्रियजन्यं जन्यप्रत्यक्षत्वात् घटप्रत्यक्षवत्। तथा चेन्द्रियान्तरबाधे मनसः सिद्धिः”[20] इत्युक्तम्।

### मनसः एकत्वसिद्धिप्रकारप्रदर्शनम्

मनस एकत्वमनेकत्वं वेति जिज्ञासायां न्यायसूत्रकारः प्रवदति – “ज्ञानायौगपद्यादेकं मनः”[21]। अर्थात् यदि प्रतिशरीरं बहूनि मनांसि स्युस्तदा तेषामनेकैरिन्द्रियैर्युगपदपि संयोगसम्भवाद् युगपदनेकज्ञानानि उत्पद्येरन् न चोत्पद्यन्ते किंत्वेकस्मिन् क्षणे एकमेव ज्ञानमुत्पद्यते तस्मात् निश्प्रचं वक्तुं शक्यते एकस्मिन् शरीरे एकमेव मन इति। पुनः पूर्वपक्षी वदति – ज्ञानायौगपद्याद् मनसः एकत्वं नैव सिद्ध्यति, यतः युगपदनेकक्रियोपलब्धि-दर्शनात्। तथा च सूत्रम् – “न युगपदनेकक्रियोपलब्धेः”[22] इति। तथाहि यथा ज्ञानं मनो विना नैव सम्भवति तथा क्रियापि मनो विना नैव सम्भवति तत्र युगपदनेकाः क्रिया उपलभ्यन्ते इति तदुपपत्त्यर्थं मनसोऽनेकत्वं स्वीकार्यम्। सूत्राशयं स्पष्टयति भाष्यकारः - “अयं खल्वाध्यापकोऽधीते व्रजति कमण्डलुं धारयति पन्थानं पश्यति श्रृणोत्यारण्यजान् शब्दान् बिभेति व्याललिङ्गानि बुभुत्सते स्मरति च गन्तव्यं स्थानीयमिति क्रमस्याऽग्रहणाद् युगपदेताः क्रिया इति प्राप्तं मनसो बहुत्वमिति”[23]।

ये खलु मनसो बहुत्वं साधयन्ति तन्मतनिराकरणाय सूत्रकारो वक्ति – “अलातचक्रदर्शनवत् तदुपलब्धिराशु-संचारात्”[24] इति। अर्थात् उभयोरग्रयोः अग्निविशिष्टो दण्डोऽलातम् इत्युच्यते। यथाऽलातचक्रस्याशुतर-सञ्चारात् शीघ्रभ्रमेः युगपत् नैरन्तर्येण दर्शनं जायते तत्र क्रमस्य सत्त्वेऽप्याशुसंचारात् क्रमो न गृह्यते तथोक्तस्थलेऽपि मनस आशुसञ्चारादेव क्रियाणां यौगपद्योपलब्धिर्भवति। वस्तुतस्तु न क्रियाणां यौगपद्यं येन मनोबहुत्वं सिद्ध्येत् किन्तु क्रमेणैव शीघ्रतरं क्रिया भवन्तीति क्रमो न गृह्यते

18 प्र.भा.पृ-67
19 न्या.सि.मु.पृ-360
20 तर्का.पृ-37
21 न्या.सू. 3.2.58
22 न्या.सू. 3.2.59
23 न्या.भा.पृ-329
24 न्या.सू. 3.2.60

इति न मनसो बहुत्वापत्तिरिति। वैशेषिकसूत्रकारैरपि उक्तं "प्रयत्नायौगपद्या- ज्ज्ञानायौगपद्याच्चैकम्"[25] इति।

## प्रतिशरीरभेदेन मनसो भिन्नत्वसाधनम्

उपर्युक्तयुक्तिमनुसृत्य कणादतर्क-वागीशः प्रवदति – "मनश्च प्रतिशरीरं भिन्नम्"[26] इति। अर्थात् शरीरभेदेन मनसोऽपि व्यक्तिभेदः कल्पनीय एव, अन्यथा सकलशरीरसाधारणस्य एकस्य मनसः स्वीकारे देवदत्तात्मवृत्तिज्ञानसुखादीनां यज्ञदत्तात्मना ग्रहणप्रसङ्गः, एकस्य सुषुप्तौ सकलज्ञानाद्यभावप्रसङ्गश्च स्याताम्। व्यक्तिभेदे च एकैकेन मनसा एकैकज्ञानसुखादिप्रत्यक्षस्य स्वीकारेण एकस्य मनसः पुरीतति प्रवेशेऽपि व्यक्त्यन्तरस्य अप्रवेशेन नानिष्टपत्तिरिति। यदि च मनो भिन्नमेवास्तु प्रतिशरीरम्, किन्तु प्रतिशरीरमपि तस्य अनेकत्वमास्तां तत्र किं बाधकमित्यपि न युक्तं, यतः प्रतिशरीरमस्यानेकत्वे अनेकैरेव मनोभिः अनेकेषां विषयाणां योगसम्भवात् युगपदनेकप्रयत्ना अनेकज्ञानानि च उत्पद्येरन् , एकस्य मनसः पुरीतति प्रवेशेऽपि अपरस्य नियमेनाप्रवेशात् सुषुप्तिदशायां ज्ञानाभावस्य सर्वसिद्धस्यापि अपलापप्रसङ्गाच्च मनसः प्रतिशरीरभेदेन भिन्नत्वं स्वीकार्यमिति।

## मनसि गुणाः

वैशेषिकतन्त्रे नवमं द्रव्यं भवति मनः। तत्र मनसि संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्वसंस्कारभेदात् अष्टौ गुणाः विद्यन्ते। परत्वापरत्वे इत्यत्र दैशिकत्वं बोध्यं न तु कालिकं यतः मनसः नित्यत्वात्। संस्कारपदेन वेगाख्यसंस्कारः बोध्यः, यत् तस्य उत्तरक्रियाजनकत्वादिति।

## मनसोऽणुत्वसाधनम्

मनसः किं परिमाणमिति जिज्ञासायां नैयायिकैः वैशेषिकैश्च मनसः परिमाणम् अणु इति साध्यते। मनसः मध्यमपरिमाणवत्त्वे अनित्यत्वप्रसक्तिः। कुमारिलाभिमतविभुत्व-स्वीकारे एकदा सकलेन्द्रियसन्निकर्षे युगपदनेकज्ञानादि-प्रसक्तिः। अतः मनसः अणुत्वं स्वीकार्यम्। तथा चोक्तं वैशेषिकसूत्रकारेण "तदभावादणु मनः"[27] इति। अत्र तत्पदेन वैभवं परामृष्टं वैभवाभावादणु इति सूक्तिकारैः जगदीशैः प्रतिपादितम्। न्यायसूत्रकारैस्तु "यथोक्तहेतुत्वाच्चाऽणु"28 इति सूत्रितम्। अर्थात् ज्ञानायौगपद्यादेव मनः अणु, यदि मनोऽणु न स्यात्तदा एकस्यापि मनस एकस्मिन् क्षणेऽनेकैरिन्द्रियैः संयोगसम्भवाद् युगपदनेकज्ञानान्युत्पद्येरन् न चोत्पद्यन्ते तस्मादणु मनः, एकस्याणोश्च मनसो युगपदनेकैरिन्द्रियैः संयोगसम्भवादेव युगपदनेकज्ञानापत्तिर्नास्ति किन्तु ज्ञानानां क्रम उपपन्न एव। न्यायभाष्यकारोऽपि वक्ति – "अणु मन एकं चेति धर्मसमुच्चयः ज्ञानायौगपद्यात्, महत्त्वे मनसः सर्वेन्द्रियसंयोगाद् युगपद् विषयग्रहणं स्यादि"ति। एतत्सर्वं मनसि निधाय विश्वनाथोऽपि वक्ति "अयौगपद्याज्ज्ञानानां तस्याऽणुत्वमिहेष्यते"[29] इति।

एवञ्च मनसो विभुत्वे व्यासङ्गलक्षणाऽन्यमनस्कता चञ्चलता च श्रुतिस्मृत्यादिना नोपपन्ना स्यात्। तथाच बृहदारण्यकोपनिषत् "अन्यत्रमना अभुवं नादर्शमन्यत्रमना अभुवं नाश्रौषं मनसा ह्येव पश्यति"[30] इति। श्रीमद्भगवद्गीतापि "चञ्चलं हि मनः कृष्ण"[31] इति। अतः मनसोऽणुत्वं स्वीकार्यम्।

वस्तुतः मनसो विभुत्वस्वीकारे आत्ममनःसंयोगस्याऽसमवायिकारणस्य अभावाज्ज्ञानानुत्पत्तिप्रसङ्गः स्यात्। विभुद्वयसंयोगस्य नित्यत्वात् सुषुप्त्यभाव- प्रसक्तिः, यतः पुरीतद्यतिरिक्त प्रदेशे आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्। तस्य मनसोऽणुत्वस्वीकारे च यदा मनः पुरीतति नाड्यां प्रविशति, तदा सुषुप्तिः, यदा निःसरति तदा

---

25 वै.सू. 3.2.3
26 भा.रत्न.पृ-39
27 वै.सू. 7.1.23
28 न्या.सू. 3.2.61
29 कारिका. 85
30 बृह.उप. 1.5.9
31 श्रीमद्भगवद्गीता 6.34

ज्ञानोत्पत्तिरिति तस्य अणुत्वसिद्धिः। एवञ्च मनसोऽणुत्वे दीर्घशष्कुलीभक्षणादौ नानावधानभाजां कथमेकदाऽनेकेन्द्रियजं ज्ञानं स्याद् इति आशङ्कायामित्थं वक्तुं शक्यते मनसोऽतिलाघवात् झटिति नानेन्द्रियसम्बन्धात् नानाज्ञानोत्पत्तेर्निरबाधात्, तत्र युगपत्प्रत्ययस्य भ्रान्तित्वमिति।

**दीधितिकारमतोपस्थापनं निराकरणञ्च**

तत्र पदार्थतत्त्वनिरूपणे दीधितिकारैः मनसो भूतत्वं साधितम्। तथाहि – "मनोऽपि चासमवेतं भूतम्। अदृष्टविशेषोपग्रहस्य नियामकत्वाच्च नातिप्रसङ्ग इत्यावयोः समानम्" इति। अभिप्रायस्तु भौतिका एव परमाणवो मनांसि, अनन्तधर्मिणाम् अतिरिक्तायाश्च जातेः कल्पनापेक्षया क्लृप्तानामेव धर्मिणां तद्रूपेण हेतुत्वस्य युक्तत्वात्, ज्ञानक्रमनियमस्तु अदृष्टादिबलाद् उपपद्यते इति। एतदपि न युक्तं यतः तेषां मनसां परमाणूनां पार्थिवत्वे जलीयत्वे वा विनिगमकाऽभावात्। उभयकल्पने तु जातिसाङ्कर्यात्। एवञ्च मनसः पृथक्स्वीकारे च मानसप्रत्यक्षं प्रति मनसः कारणत्वात् कारणतावच्छेदकत्वं मनस्त्वे सिध्यतीति मनसः भूतत्वं नाङ्गीकार्यमिति तु विभावनीयमित्यलम्।

**सहायकग्रन्थसूची**


- न्यायदर्शनम्-वात्स्यायनभाष्यसहितम्-चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९३
- वैशेषिकदर्शनम्-प्रशस्तपादभाष्यसहितम्-व्याख्या. आचार्य आनन्दप्रकाशः-चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०००
- न्यायसिद्धान्तमुक्तावली-व्याख्या. गजाननशास्त्री-चौखम्बा सुरभारती प्रकाशन, वाराणसी,२००२
- शब्दशक्तिप्रकाशिका- चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९५
- योगदर्शनम्-व्यासभाष्यसहितम् – व्याख्या - सुरेशचन्द्र श्रीवास्तव-सुरभारती प्रकाशन, वाराणसी, १९९८
- बृहदारण्यकोपनिषद्-शाङ्करभाष्यसहितम्-गीताप्रेस,गोरखपुर,२०६८
- श्रीमद्भगवद्गीता-साधकसञ्जीवनी-गीताप्रेस,गोरखपुर,२०६८
- तर्कामृतम्-जगदीशभट्टाचार्य्य -चौखम्बा पावलिशिं हाउस,दिल्ली,१९९६

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# काव्यमार्गे शब्दवृत्तयः

## ड. बुद्धेश्वरषडङ्गी

### प्रबन्धसारः

*कस्यापि कार्यस्य कृते शक्तेर्महती आवश्यकता वर्तते। मनुष्ये यथा तत्त्वनिर्णयरूपस्य कार्यस्य कृते बुद्धिरूपा शक्तिः, गमने चरणयोः स्थानान्तरप्रापिता शक्तिः, करयोः उत्थापिका शक्तिः, दर्शनार्थं दृष्टिशक्तिरित्येवं विभिन्नकार्यार्थम् एकस्मिन् मनुष्ये विभिन्नाः शक्तयः सन्ति तथैव शब्देऽपि वर्तते अर्थप्रकाशनरूपकार्यार्थम् अभिधाद्या विविधाः शक्तय आलङ्कारिकैः स्वीकृताः। तासां विषये अस्मिन् प्रबन्धे विस्तरेण आलोचना विधीयते।*

शक्तिं विना कुतोऽपि मनुष्यात् किमपि कार्यं न सम्भवति। यथा तत्त्वनिर्णयरूपस्य कार्यस्य कृते बुद्धिरूपा शक्तिः, गमने चरणयोः स्थानान्तरप्रापिता शक्तिः, करयोः उत्थापिका शक्तिः, दर्शनार्थं दृष्टिशक्तिरित्येवं विभिन्नकार्यार्थम् एकस्मिन् मनुष्ये विभिन्नाः शक्तयः इव शब्दश्रवणात्परं नानाविधार्थोपस्थितिरूपकार्यार्थम् एकस्मिन् एव शब्दे विभिन्ना शक्तयः अवश्यमङ्गीकार्याः इति शास्त्रविदां सिद्धान्तः।

काव्यशब्दश्रवणात्परं च विविधानामर्थानाम् उपस्थितिरूपविविधकार्यं प्रति तेषु काव्यिकशब्देषु विभिन्नाः शक्तयः परिकल्पिताः। ते च विविधाः विजातीयाः अर्थाः अद्य यावत् चतुर्विधा इत्यङ्गीकृतमाचार्यैः। तत्र चतुर्थी शक्तिः तुरीयावृत्तिरिति कथ्यते। सा च व्यञ्जनापरपर्याया तुरीयावृत्तिः कविमार्गजुषां सहृदयानां हृदयकन्दरं नितरामतितरामाह्लादयति।

## अभिधा

पूर्वोक्तासु शक्तिषु शब्दश्रवणात् परं संकेतग्रहबलात् योऽर्थ : प्रथमं प्रतीयते स हि मुख्यार्थापरपर्यायो वाच्यार्थः इति उच्यते। तदुपस्थापिका च शक्तिः वृत्तिर्वा "अभिधा"नाम्नी परिकल्पिता। तदुक्तं वाग्देवतावतारेण मम्मटाचार्येण –

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।[1]

तत्र च 'स' इत्यस्य व्याख्यानं तेनैवाचार्यप्रवरेण प्रोक्तं - तदेवं साक्षात्संकेतित एवार्थ : मुख्यार्थः।[2] स एव नामान्तरेण वाच्यार्थ एव उच्यते । तदुपस्थापकश्चाभिधानामकव्यापार इति पूर्वोक्तकारिकया निर्णीतम्। संकेतग्रहश्च कोषाद्वा, व्याकरणाद्वा, मुख्यतया लोकव्यवहारादितो वा भवति । तदुक्तम् –

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

स एव शब्दव्यापारः कैश्चिद्व्यापारनाम्ना, कैश्चित् क्रियानाम्ना कैश्चिच्छक्तिनाम्ना, कैश्चिद् वृत्तिनाम्ना व्यपदिश्यते। अतः अभिधाव्यापारो नाम अभिधाशक्तिरित्यपि मन्तव्यम्। अभिधाव्यापारबोध्यः

[1] काव्यप्रकाशे - २/४

[2] तवाहि शब्दव्यापारात् योऽर्थोऽव्यवधानेन गम्यते सोऽर्थो मुख्यः। स हि यथा सर्वेभ्यः हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते तथा सर्वेभ्यः (लक्ष्य-व्यङ्ग्य-तात्पर्यरूपेभ्यः) प्रतीयमानेभ्योऽर्थेभ्यः पूर्वमवगम्यते। (झलकीकरटीका-पृ.३९)

ISSN : 2583-2271
Vol. - I, No. 1: 2021

अर्थः मुख्योऽर्थः वाच्यार्थः, अभिधेयार्थः, सङ्केतितार्थः इति पर्यायवाचिभिः शब्दैः प्रसिद्धः ।

### तात्पर्यवृत्तिः

तदनन्तरं शब्दात् संकेतितार्थेषु उपस्थितेषु तेषां परस्परं सम्बन्धम् अन्वयं संसर्गं वा विना परिपूर्णवाक्यार्थबोध : नैव सम्भवति । स च सम्बन्धः अन्वयो वा संसर्गो वा शब्दातिरिक्ततया अर्थस्य एव मन्तव्यः । ईदृशार्थप्रतीतिरूपकार्यस्य कृते अपराऽपि काचन शक्ति : वृत्तिर्वा शब्दे अङ्गीकर्तव्यैव । सा च शक्तिः तात्पर्याख्या शक्तिः अभिहितान्वयवादमतानुयायिभिः[3] स्वीक्रियते । तया च तात्पर्यवृत्त्या उपस्थितः अन्वयरूपः संसर्गरूपो वा अर्थः तात्पर्यार्थः इति। तात्पर्यवृत्तेः पर्यालोचनं कुमारिलभट्टमतावलम्बिना मतानुसारेणैव अलङ्कारशास्त्रे कृतमस्ति। प्रसङ्गस्यास्य आधारो भवति कुमारिलभट्टस्य श्लोकवार्तिकग्रन्थविशेषः। तत्र आचार्येण पर्यालोचि यत्–

साक्षात् यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥[4]

पार्थसारथिमिश्रेणापि न्यायमालायामस्याः वृत्तेः पर्यालोचनमकारि। यथा - "अभिहितान्वय एव ज्यायान्। तथा च सूत्रकारः - अर्थस्य निमित्तत्वात् (पूर्वमीमांसादर्शनसूत्रम् - १/१/२५) इति व्यक्तमेव पदार्थनिमित्तकत्वं वाक्यार्थस्य दर्शयति। भाष्यकारोऽपि हि (शबरस्वामी) अमूनि पदानि स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अभिहिताः सन्तो वाक्यार्थमवबोधयन्ति इत्याह"।

काव्यप्रदीपे प्रदीपकारेणापि व्याख्यायि - लाघवात् पदानां पदार्थमात्रे शक्तिः न त्वन्वयांशेऽपि, गौरवादन्यलभ्यत्वाच्च। तदंशो हि तात्पर्यार्थो वाक्यार्थविलक्षणशरीरः आकांक्षायोग्यतासत्तिवशादपदार्थोऽपि प्रतीयते। न चापदार्थप्रतीतौ अतिप्रसङ्गः। स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वात् इत्यभिहितान्वयवादिनां मतम्। (पृ.१७)

### लक्षणा

अतः परं वाच्यार्थातिरिक्तः कश्चन विजातीयः अर्थोऽपि शब्दश्रवणात्परं प्रतीतिगोचरो भवतीति अनुभूयते यथा -"गङ्गायां घोषः" इत्युक्ते गङ्गापदात् भगीरथखातावच्छिन्नजलप्रवाहरूपवाच्यातिरिक्तं तटरूपार्थं विना प्रतीतेः पर्यवसानमेव न सम्पद्यते। तादृशस्य विजातीयार्थप्रतीतिरूपस्य कार्यस्य कृते शब्दे अभिधातिरिक्ता काचन विजातीयाऽपि शक्तिः अङ्गीकर्तव्या, सा च शक्तिर्लक्षणा नाम। तदुक्तं मम्मटाचार्येण –

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥[5]

अर्थात् शब्दश्रवणात्परं संकेतग्रहबलादुपस्थितेऽपि मुख्यार्थे तात्पर्यविषयीभूतान्वयानुपपत्त्या रूढिवशाद्वा प्रसिद्धिवशाद्वा प्रयोजनवशाद्वा मुख्यार्थेन सह नियतसम्बद्धः योऽर्थः प्रतीयते सोऽर्थः लक्ष्यार्थः इत्युच्यते। तदुपस्थापिका च शब्दस्यारोपिता[6]

---

[3] अभिहितानां स्वस्ववृत्त्या पदैरुपस्थितानामर्थानामन्वय इति वादिनां भाट्टमीमांसकानामित्यर्थः। कुमारिलभट्टमतावलम्बिन: मीमांसका: अभिहितान्वयवादिनः इति ।

[4] श्लोकवार्तिक - २४२-२४३

[5] काव्यप्रकाशः - २/९ ६

[6] आरोपिता= आरोपिता तथा च क्रिया न लक्षणघटके पदे; अपि तु स्वरूपकथनपरे स्तः। आरोपिता = मुख्यार्थव्यवहितलक्ष्यार्थविषयकत्वात् शब्दे कल्पिता।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

शक्तिर्लक्षणा नामेति संक्षेपेण मन्तव्यम्।

**व्यञ्जनावृत्तिः/तुरीयावृत्तिः**

अतः परं वाच्यार्थ-तात्पर्यार्थ-लक्ष्यार्थातिरिक्तः अन्यविधोऽपि कश्चिदर्थः काव्यवाक्येभ्यः लौकिकवाक्येभ्यश्च प्रतीतिगोचरतामायाति। सोऽर्थः प्रतीयमानार्थः इत्युच्यते । स एव प्रतीयमानार्थ : व्यङ्ग्यार्थनाम्ना ध्वन्यादिनाम्ना च व्यपदिश्यते। साहित्यदर्पणकारः अस्याः 'रसना' इति नवीनं नाम कल्पयति। यथा –

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः॥[7]

स च प्रतीयमानोऽर्थः प्रागुक्तेभ्यो वाच्यादिभ्यः त्रिविधेभ्य : अर्थेभ्य :विजातीयः पृथग्भूत एव । स च प्रतीयमानार्थः क्वचिद्वस्तुरूपः, क्वचिदलङ्काररूपः, क्वचिच्च रसादिरूपः इति स्थूलतः त्रिविधः अनुभूयते।

भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥

इति पद्यात् भ्रमेति भ्रमणविधिरूपे वाच्यार्थे प्रतीतौ गोदावरीतटे न भ्रमेति, योऽर्थः प्रतीयते स च वाच्यार्थो भवितुं नार्हति।[8] वाच्यार्थो हि नियततया सङ्केतितार्थ एव भवति । अत्र च पद्ये भ्रमेति पदं 'न भ्रम' इत्यर्थे न सङ्केतितम्। तात्पर्यार्थस्य च नियततया संसर्गरूपत्वात् न भ्रमेत्यस्य च तद्रूपताभावात् नासौ तात्पर्यार्थः इत्यपि वक्तुं शक्यते। मुख्यार्थबाधाद्यभावात् लक्षणायाः प्रसरासम्भवात् लक्ष्यार्थरूपोऽपि न भवितुमर्हति।[9] अतः न भ्रमेति प्रागुक्तत्रिविधार्थविलक्षणः पृथगेवेति मन्तव्यम्। एवं –

"जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः।
जगदवतु कोकयुनो विघटनसंघटनकौतुकी कृष्णः॥"

इत्यस्मात् पद्यात् "राधिकावदनं चन्द्रः" इत्येवम्भूतः योऽर्थः प्रतीयते स हि रूपकालङ्काराख्यः सोऽपि प्रगुक्तत्रिविधार्थविलक्षणः तेभ्यः पृथगेवेत्यनुसन्धेयः।[10] एवं च

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकमालोक्य गण्डस्थलीं
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥"

इत्यस्मात् पद्यात् य : लोकोत्तरानन्दमयः शृङ्गाररसः प्रतीयते सोऽपि शब्दभिन्नतया अर्थरूप एव। न चासौ वाच्यलक्ष्यतात्पर्यार्थेषु अन्तर्भवितुमर्हति। तदुक्तं वाग्देवतावतारैः मम्मटपादैः - "रसादिलक्षणस्त्वर्थ : स्वप्नेऽपि न वाच्यः, मुख्यार्थभावाद्यभावान्न पुनर्लक्षणीयः। तेनासौ व्यङ्ग्य एव।[11]

इदमत्रावलोकनीयं शब्दात् यः कोऽप्यर्थः प्रतीयते सः शक्तिं विना न प्रतीतिगोचरीभवितुमर्हति। अत : प्रतीयमानत्वेन प्रतिपादितस्य अर्थस्य वाच्यलक्ष्यतात्पर्यार्थेभ्यः विलक्षणतया पृथक्तया च अभिधातात्पर्यलक्षणानामकशक्तिबलाच्च न प्रत्येतुं शक्यते । अतः तत्प्रतीत्यर्थमपरा काचन शक्तिः वृत्तिर्वा अवश्यमङ्गीकर्त्तव्या । सा च व्यञ्जनाशक्ति : तुरीयावृत्तिर्वा नामेति स्थूलतया निष्कर्षः ।

---

साक्षात्सम्बन्धेन मुख्यार्थनिष्ठा परम्परासम्बन्धेन तु शब्दनिष्ठा लक्षणा ।

7 साहित्यदर्पणे - ५/५

8 नाभिधा समयाभावात (काव्यप्रकाशे- २/१५)

9 हेत्वाभावान लक्षणा (काव्यप्रकाशे-२/१५)

10 अलङ्कारध्वनिः

11 काव्यप्रकाश: - व्यायस्य विध्यनिरूपणावसरे पञ्चमोल्लासे- प्र.२१७

## सहायकग्रन्थसूची


- काव्यप्रकाशः – व्याख्या. सत्यव्रतसिंहः, चौखम्बा विद्याभवन, वाराणसी, २००३
- काव्यप्रकाशः – झलकीकरटीका, चौखम्बा पाब्लिसिं हाउस, नईदिल्ली, १९९५
- साहित्यदर्पणः – व्याख्या. आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८५
- रसगङ्गाधरः – अनु. सूर्यमणिरथः, ओडिशा साहित्य अकादेमी, भुवनेश्वर, १९९०
- मीमांसाश्लोकवार्तिकम् – काशिकाख्यटीका – महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशास्त्र, १९२६

MAṆĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
Vol. - I, No. 1: 2021

# पण्डितराजजगन्नाथकृतकाव्यविभागस्यौचित्यम्

## डा. चन्द्रकला आर्. कोण्डी

### प्रबन्धसारः

*कविः लौकिकं वस्तु अलौकिकतया रसात्मकवाक्यैः वर्णयति। तदेव काव्यं भवति। काव्यस्य च प्राचीनैः नवीनैश्च आलङ्कारिकैः विविधा भेदाः परिकल्पिताः। तत्र भामहादिभिः बाह्योपाधिं पुरस्कृत्य काव्यविभागो दर्शितः। दण्डिना भाषाधारेण संस्कृत-प्राकृत-अपभ्रंश-मिश्ररूपेण चातुर्विध्यं काव्यस्य विहितम्। महिमभट्टः रसवत्त्वेन काव्यस्य एकविधत्वमेव अङ्गीकरोति। विश्वनाथस्तु काव्यस्य द्वैविध्यं दृढं प्रतिपादयति। ध्वनिकारस्तु प्रतीयमानार्थस्य काव्यविभाजकोपाधित्वमङ्गीकृत्य ध्वनिकाव्यं, गुणीभूतव्यङ्ग्यमिति काव्यस्य द्विधा भेदं दर्शितवान्। जगन्नाथस्तु उत्तमोत्तर-उत्तम-मध्यम-अधमभेदेन काव्यस्य चातुर्विध्यं स्वीकृतम्। एवं भेदस्वीकारे किमौचित्यमिति अस्मिन् प्रबन्धे आलोच्यते। एतादृशभेदचतुष्टयस्वीकारे जगन्नाथस्य केचन विशेषा अवलोक्यन्ते। तथाहि मध्यमत्वेन परिगणितस्य गुणीभूतव्यङ्ग्यकाव्यस्योत्तमकाव्यत्वापादनम्। स एव पण्डितराजस्य विशेष इति केचनाभिप्रयन्ति। गुणीभूतव्यङ्ग्यस्य जागरूकत्वा-जागरूकत्वाभ्यां पृथक्त्वाविष्करणम्, चमत्कारतारतम्यं पुरस्कृत्य शब्दार्थचित्रयोः समुचितस्य प्रत्येकं स्थानस्य परिकल्पनम्, आन्तरालिकव्यङ्ग्यस्य ध्वनित्वसमर्थनं चेति। मम्मटादिभिः कृतस्य काव्यविभागस्याधारः व्यङ्ग्यार्थः, जगन्नाथस्य तु चमत्कार इति विभागस्याधार एव भिद्यते। अतः तत्तन्मतानुसारं द्वयोरप्युपादेयता वर्तत एवेति शोधबन्धस्यास्य अभिप्रायः।*

काव्यविभागविषये प्राचीनानां नवीनानाञ्च दृष्टिः परस्परमत्यन्तमेव विलक्षणा वर्तते। भामहादिभिः बाह्योपाधिं पुरस्कृत्य काव्यविभागः कृतः। छन्दोनियम-तदभावयोराधारेण गद्यं पद्यमिति द्वैविध्यम्,[1] भाषाधारेण संस्कृत-प्राकृत-अपभ्रंशभेदेन त्रैविध्यम्[2], प्रतिपाद्य-विषयाधारेण वृत्तदेवादि-चरितशंसि-उत्पाद्यवस्तु-कलाश्रय-शास्त्राश्रयम् इति चातुर्विध्यम्[3], प्रकारान्तरेण सर्गबन्ध-अभिनेयार्थ-आख्यायिका-कथा-अनिबद्धम् इति पञ्चविधत्वं[4] च काव्यस्यवप्रतिपादितं भामहाचार्येण। छन्दोनियम-तदभावयोः आधारेण गद्य-पद्य-मिश्रभेदेन त्रैविध्यम्[5], भाषाऽऽधारेण संस्कृत-प्राकृत-अपभ्रंश-मिश्ररूपेण चातुर्विध्यं[6] दण्डिना प्रतिपादितम्। काव्यस्य रसवत्त्वेन एकविधत्वमङ्गीकुर्वन् महिमभट्टः "काव्यविशेष इत्यत्र काव्यस्य विशिष्टत्वमनुपपन्नं काव्यमात्रस्य ध्वनिपदव्यपदेश-विषयत्वेन इष्टत्वात्तस्य च

[1] काव्यं गद्यं पद्यं च तद्द्विधा। काव्यालङ्कारे प्रथमाध्यायः

[2] संस्कृतं प्राकृतञ्चान्यदपभ्रंश इति त्रिधा-काव्यालङ्कार प्रथमाध्यायः

[3] वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः ॥ काव्यालङ्कार प्रथमाध्यायः

[4] सर्गबन्धोऽभिनेयार्थः तथैवाख्यायिकाकथे।
अनिबद्धश्च काव्यादि तत्पुनः पञ्चधोच्यते ॥ काव्यालङ्कार प्रथमाध्यायः

[5] गद्यं पद्यञ्च मिश्रञ्च तत्त्रिधेति व्यवस्थितम्-दण्डी, काव्यालङ्कार।

[6] तदेतद्वाङ्मयं भूयस्संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम् ॥ दण्डी, काव्यालङ्कार)

ISSN : 2583-2271
Vol. - I, No. 1: 2021

रसात्मकत्वोपगमात्"[7] इत्यवदत्। काव्यं द्विविधमेवेति विश्वनाथकविराजस्य दृढं प्रतिपादनम्। यत्र भामहादिभिः बाह्योपाधिं पुरस्कृत्य काव्यविभागः प्रादर्शि, तत्रैव ध्वनिकारेण काव्यान्तस्तत्त्वस्य प्रतीयमानार्थस्य स्थितेः काव्यविभाजकोपाधित्वमुररीकृतम्। तत्र व्यङ्ग्यार्थस्य वाच्यापेक्षया प्राधान्ये ध्वनिकाव्यम्, व्यङ्ग्यसम्बन्धेन वाच्यचारुत्वप्रकर्षशालि काव्यं गुणीभूतव्यङ्ग्यमिति रीत्या काव्यस्य भेदद्वयम्। रसभावादिव्यङ्ग्यविशेषविवक्षाविरहे सति यत्रालङ्कारोपनिबन्धः तच्चित्रकाव्यम्। तच्च चित्रं शब्दचित्रम्, वाच्यचित्रञ्चेति द्विविधम्। मम्मटाचार्येणापि व्यङ्ग्यार्थस्य प्राधान्याप्राधान्या-स्फुटत्वाधारेण उत्तम-मध्यम-अधमभेदेन काव्यस्य त्रैविध्यं प्रतिपादितम्। सामान्यतः सर्वैरपि आलङ्कारिकैः काव्यस्य त्रैविध्यमेव आद्रियते। एवं त्रिवर्गभाञ्जि काव्यानि जगन्नाथेन उत्तमोत्तम-उत्तम-मध्यम-अधमभेदेन चतुर्वर्गताम् उपयापितानि। प्राचीननवीनालङ्का-रिककृतकाव्यविभाग-विलक्षणे, अंशतः नवीनालङ्कारिकसम्बद्धे, अंशतश्च स्वीयालोचना-परिणामात्मके च जगन्नाथकृतकाव्य-विभागे केचन विशेषा एवमुल्लिखितुं शक्यन्ते -

१. मध्यमत्वेन परिगणितस्य गुणीभूत-व्यङ्ग्यकाव्यस्योत्तमकाव्यत्वापादनम्। स एव पण्डितराजस्य विशेष इति केचनाभिप्रयन्ति।

२. गुणीभूतव्यङ्ग्यस्य जागरूकत्वा-जागरूकत्वाभ्यां पृथक्त्वाविष्करणम्।

३. चमत्कारतारतम्यं पुरस्कृत्य शब्दार्थ- चित्रयोः समुचितस्य प्रत्येकं स्थानस्य परिकल्पनम्।

४. आन्तरालिकव्यङ्ग्यस्य ध्वनित्वसमर्थनम्।

जगन्नाथस्य काव्यविभाजकोपाधिः कः? यदि व्यङ्ग्य एव तथा स्वीक्रियते तर्हि शब्दार्थचित्रयोः मध्यमत्वाधमत्वाभ्यां क्रमेण प्रत्येकशः काव्यविभागः किमिति कर्तव्यतामापतित इति सन्देहो जायते, त्रैविध्येनैव च काव्यविभागः परिसमाप्तो भवति। अतः व्यङ्ग्यं तस्य काव्यविभाजकोपाधिर्न। किं तर्हि? चमत्कार एव। तदीयकाव्यलक्षण-परिष्कारेषु चमत्कारार्थबोधक-पदानामवलोकनेन एतत् स्पष्टं ज्ञायते। चमत्कारेषु व्यङ्ग्यचमत्कारः, वाच्यचमत्कारः, शब्दचमत्कार इति त्रैविध्यं परिकल्प्य, प्रधानतया-अप्रधानतयेति व्यङ्ग्यचमत्कारेऽपि द्वैविध्यमङ्गीकृत्य, व्यङ्ग्यस्य प्रधानतया चमत्कारकत्वे उत्तमोत्तमम्, तस्यैव प्राधान्येन चमत्कारकत्वे उत्तमम्, व्यङ्ग्यचमत्कारोपस्कृतस्य वाच्यचमत्कारस्य प्राधान्ये मध्यमम्, वाच्यचमत्कारोपस्कृतस्य शब्दचमत्कारस्य प्राधान्ये तु अधममिति काव्यस्य चतुर्धा विभागः चमत्कारं पुरस्कृत्यैव प्रवृत्तः। 'चमत्कारत्ववत्त्वमेव काव्यलक्षणम्', 'काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव' इत्यादिवाक्यैः चमत्कार एव तस्य काव्यविभाजकोपाधिरिति निश्चीयते।

व्यङ्ग्यस्य काव्यविभाजकोपाधित्वेन स्वीकारे, ध्वनि-गुणीभूतव्यङ्ग्ययोरुद्भूततया व्यङ्ग्यस्य सद्भावात् व्यङ्ग्यं पुरस्कृत्य काव्यव्यवहार उचित एव। परन्तु स्फुटप्रतीयमानार्थरहितमिति चित्रकाव्यस्य स्वरूपं स्पष्टीकुर्वता मम्मटाचार्येण चित्रकाव्ये रसादिव्यङ्ग्ये कवितात्पर्यविरहः स्फुटमुक्त एव। एवं तात्पर्यविषयीभूतो व्यङ्ग्यस्तत्र विद्यमानोऽप्यविद्यमानकल्प एवेति तादृशव्यङ्ग्यार्थपुरस्सरं तत्र काव्यत्वव्यवहारो न युज्यते, किन्तु वाच्यपुरःसरमेव। अत एव पण्डितराजः व्यङ्ग्यमात्रस्य काव्यविभाजकोपाधित्वमपहाय चमत्कारं काव्यविभाजकोपाधित्वेन स्वीकरोति। व्यङ्ग्यार्थरूपेण उत्तमोत्तम-उत्तमकाव्ययोः, वाच्यरूपेण मध्यमकाव्ये, शब्दरूपेण चाधमकाव्ये चमत्कारो वर्तत एव इति केचनाभिप्रयन्ति। किन्तु मम्मटाचार्यकृतकाव्यविभागेषु तेषां काव्यलक्षणमन्वेत्येव। व्यङ्ग्यार्थस्यापि अवस्थितिः

[7] व्यक्तिविवेक।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

तन्मतानुसारं तत्र कामपि सन्दिग्धतां नावहति। अतः तेषां काव्यविभागः व्यङ्ग्यार्थावस्थित्याधारेण, जगन्नाथस्य तु चमत्काराधारेणेत्येतावानेव भेदोऽस्माभिः स्वीकरणीयः।

अन्यैरालङ्कारिकैर्ध्वनिकाव्यत्वेन अर्थात् उत्तमत्वेनाङ्गीकृतं काव्यम् अनेन उत्तमोत्तमत्वेन स्वीकृतम्। ध्वनिकारोक्तध्वनिलक्षणं तत्रान्वेति-

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥"

इति। मम्मटाचार्यैः अपि - 'इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथित' इति।

उभयत्रापि जगन्नाथोक्तं वाच्य-वाचकयोर्गुणी-भूतत्वम्, व्यङ्ग्यस्य कमनीय-तामूलकं प्राधान्यञ्च समानम्। व्यङ्ग्यं प्रधानं वा भवतु अप्रधानं वा, तस्य चमत्कारहेतुत्वे उत्तमत्वमेवाङ्गीकर्तुम् उचितम्, न तु मध्यमत्वम्। अस्य उत्तमत्वाङ्गीकारे यत्र व्यङ्ग्यम् अप्रधानं, तथापि चमत्कारहेतुस्तत्र मध्यमत्वम् अङ्गीकरणीयं भवति। तन्नेष्यत इति हेतोः व्यङ्ग्यस्य चमत्कारित्वं प्राधान्याप्राधान्याभ्यां द्विधा विभज्य प्राधान्य-चमत्कारहेतुत्वयोः सत्वे उत्तमोत्तमकाव्यत्वम्, अप्राधान्य-चमत्कार-हेतुत्वयोस्सत्व उत्तमकाव्यत्वम् इति व्यवस्थितं जगन्नाथेन।

व्यङ्ग्यस्य कथञ्चिदपि चमत्कारहेतुत्वे तस्य मध्यमत्वं न सङ्गच्छत इत्यंशाधारेण जगन्नाथः मम्मटोक्तगुणीभूतव्यङ्ग्यकाव्यम् उत्तमत्वेन परिगणयति। मम्मटमते गुणीभूतव्यङ्ग्ये व्यङ्ग्यस्य सर्वथा अचमत्कारित्वम्। किन्तु तादृशमपि काव्यं दृष्टिगोचरं भवति यत्र अप्रधानो भूत्वापि व्यङ्ग्यश्चमत्कारी भवेत्। तादृशकाव्यस्य कथं व्यवहार इति मम्मटमतेन स्पष्टता न जायते। अत एव जगन्नाथः व्यङ्ग्यस्य प्राधान्येन चमत्कारकत्वरूपोत्तमोत्तमकाव्यस्यानन्तरं तादृश-काव्यस्य स्थानं कल्पितवान्। तत्रापि व्यङ्ग्यस्य चमत्कारित्वान्न तदुत्तमोत्तमकाव्याद् बहुदूरे तिष्ठति, किन्तु समीप एव। परन्तु अप्राधान्येन चमत्कारक इत्येव हेतोः प्राधान्येन व्यङ्ग्य-चमत्कारयुक्त उत्तमोत्तमे नान्तर्भवति, तावदेव।

तर्हि जगन्नाथस्याभिप्राये मध्यमकाव्यं कीदृश्म्? मम्मटाचार्यैरधमकाव्यलक्षण- निरूपणावसरे 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृत'मित्युक्तम्। अव्यङ्ग्यमित्यस्य च स्फुटप्रतीयमानार्थरहितत्वम् अभिहितम्। किन्तु शब्दचित्रापेक्षया वाच्यचित्रे चमत्कारस्य गणनीयमाधिक्यं पश्यन् जगन्नाथः तच्चित्रकाव्यात् पृथक्कृत्य मध्यमकाव्यप्रकारे स्थापितवान्।

न तादृशं काव्यं दृष्टिगोचरं भवति यत्र लेशतोऽपि व्यङ्ग्यार्थो नास्ति। अतः व्यङ्ग्यार्थस्य सम्पर्कः लेशतया वा सर्वत्रापि भवत्येव। व्यङ्ग्यार्थस्य सम्पर्काद्वाच्यः अपि उत्कृष्टतां प्राप्नोति। यत्र व्यङ्ग्यचमत्कारा-समानाधिकरणो वाच्यचमत्कारस्तत्र मध्यमकाव्यं भवति। अर्थाद्यत्र व्यङ्ग्यचमत्कारः लेशतः सन्नपि वाच्यचमत्कारस्य प्रभावात् न प्रतीयते तत्र मध्यमकाव्यम्। मम्मटाचार्यैः अधमकाव्यान्तर्भावितवाच्यचित्रस्यैव मध्यमत्वं दत्तं जगन्नाथेन, शब्दचित्रान्नितान्तं वाच्यचित्रस्य वैषम्यात् तयोरेकपङ्क्तिनिवेशस्यानौचित्यात्।

उत्तम-मध्यमकाव्ययोः समस्तान्यलङ्का-रप्रधानकाव्यानि प्रविष्टानि वर्तन्ते। उत्तमकाव्ये गुणीभूतस्य व्यङ्ग्यस्य जागरूकता चमत्कारकारणत्वञ्च, मध्यम- काव्ये त्वजागरूकता चमत्कारकारणा भावश्चेति तयोर्विशेषः।

यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं काव्यम्। यत्र अर्थचमत्कृतेः अपेक्षया शब्दचमत्कृतिरेव प्रधाना, सा च शब्दचमत्कृतिः अर्थचमत्कृत्युपस्कृता भवति तत्राधमकाव्यत्वम्। अर्थालङ्कारापेक्षया शब्दालङ्काराणामेवात्र चमत्कार इति तात्पर्यम्।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

यथा उत्तमोत्तमम्, उत्तममिति च काव्यविभागः कृतोऽस्ति जगन्नाथेन, तथैव अधम-अधमाधम इति विभज्य काव्यस्य पञ्चप्रकारा वक्तव्या आसन्। यतो हि एकाक्षरीवृत्तम्, अर्धावृत्तियमकम्, पद्यबन्धादयः, कुत्र निवेशनीया इति जगन्नाथः किमपि नोक्तवान्। तत्रापि महाकवयः प्रयत्नवन्तो वर्तन्ते। कुतो नोक्तमेतेषामधमाधमत्वमित्युच्यते चेदिदमेव उत्तरम्-काव्यलक्षणेऽस्माभिः रमणीयार्थप्रतिपादकशब्दस्य काव्यत्वमुक्तम्। यदि काव्यप्रकारेषु (अधमत्वेनाधमाधमत्वेन वा भवतु) तत्परिगण्यते तर्हि रमणीयार्थप्रतिपादकत्वं तेषां शब्दानां भवेत्। किन्तु न भवतीति सर्वेषामनुभवगोचरमेव। अतः एतादृशकाव्यानां रमणीयार्थस्य परिधेर्बाह्यत्वात् न तत् काव्यप्रकारेषु परिगणितम्।

अत जगन्नाथस्य काव्यविभागस्य आधारमेवं वक्तुं शक्नुमः-

(१) प्रधानतया व्यङ्ग्यस्य चमत्कार-कारणत्वे उत्तमोत्तमकाव्यम्। अत्र वाच्यः व्यङ्ग्योपस्कारकः।

(२) गौणरूपेणैव वर्तमानस्य किन्तु जागरूकस्य व्यङ्ग्यस्य चमत्कारकारणत्व उत्तमकाव्यम्।

अत्र व्यङ्ग्यः वाच्योपस्कारकत्वेन गौणोऽपि, दुर्दैववशाद्दास्यकार्ये नियुक्ता राज्ञीव जागरूको भवति। व्यङ्ग्यस्य वाच्योपस्कारकत्वाद्वाच्य-चमत्कारस्तु प्रधानतया भवत्येव। तेन सह गुणीभूतव्यङ्ग्योऽपि चमत्कारं जनयति। लक्षणेऽपि जगन्नाथः गुणीभूतव्यङ्ग्यस्य चमत्कारकारणत्वमेव प्राधान्येन लक्षितवान्। अपि च मध्यमकाव्यलक्षणकरणावसरे वाच्यचमत्कारस्य व्यङ्ग्यचमत्कारासमानाधिकरणत्वम् उक्तम्। तेन उत्तमकाव्ये तयोः सामानाधिकरण्यमिष्यत एव। अतः सामान्यरूपेण वर्तमानस्य वाच्यचमत्कारस्य, विशेषेण वर्तमानस्य गुणीभूतव्यङ्ग्यस्य च चमत्कारजनकत्वस्य तुल्यतैव जगन्नाथेन विवक्षितं स्यात्। गुणीभूतव्यङ्ग्यस्याष्टप्रकारेषु तुल्यप्राधान्यरूप-प्रकारेण समानतां भजते जगन्नाथोक्तमुत्तमं काव्यम्।

(३) व्यङ्ग्यस्य गुणीभूतस्य अजागरूकत्वात् व्यङ्ग्यापेक्षया वाच्यस्यैवाधिकचम-त्कारकारणत्वे मध्यमकाव्यम्।

(४) अर्थापेक्षया, किन्तु अर्थेनोपस्कृतः शब्दचमत्कारः काव्ये वर्तते तर्हि अधमकाव्यम्।

गुणीभूतव्यङ्ग्यकाव्यस्योत्तमत्वेन परिगणनस्य औचित्यम्

उपर्युक्तरीत्या मम्मटादिभिः त्रिधा विभक्तस्य काव्यस्य चतुर्धा विभागः जगन्नाथकृतः सङ्गच्छते न वेति परीक्षितव्यम्। अतः तादृशविभागे यो विशेषः वर्तते सोऽस्माभिर्विमृष्टव्यः। स च विशेषः, मम्मटादिभिः गुणीभूतव्यङ्ग्ये निविष्टस्य काव्यप्रकारस्य जगन्नाथेन उत्तमकाव्ये निवेश एव। अतोऽस्माभिस्तस्यौचित्यं तावत् चर्चितव्यम्।

मम्मटादयः गुणीभूतव्यङ्ग्ये सर्वत्रापि वाच्यापेक्षया अन्य-गुणीभूतरसभावादीन् हीनचमत्कारयुक्तान् मन्यन्ते, यस्य प्रभावः नागेशभट्टस्योपरि स्पष्टतया पतितः। मम्मटादिभिर्गुणीभूतव्यङ्ग्यत्वेन परिगणितम् इदं पद्यं पण्डितराजेनोत्तम-काव्यत्वेन स्वीकृतम्-

"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥"

अत्र वाच्यापेक्षया व्यज्यमानः शृङ्गारो न चमत्कारकः। शोकोत्कर्षत्वाद् व्यङ्ग्या(शृङ्गारा)-पेक्षया वाच्य एव चमत्कारातिशय इति मम्मटादयः। परन्तु पण्डितराजोऽत्र वाच्यापेक्षया शृङ्गारस्यैव अधिकचमत्कारतां वदति। अस्मिन् विषये मथुरानाथशास्त्रिभिः सरला-टीकायामेवम् उक्तमस्ति-

"अयं भावः - यद्यत्र 'व्यङ्ग्यमप्रधानमेव सत्' इत्यवधारणं न दीयेत तर्हि 'व्यङ्ग्यमप्रधानं सत् चमत्कारकम्' इत्यर्थो भवेत्, ततश्च 'अयं स रसनोत्कर्षी' इत्याद्यपराङ्गोदाहरणेषु करुणापेक्षया

ISSN : 2583-2271
Vol. - I, No. 1: 2021

अप्रधानं शृङ्गारश्चमत्कारकारणम् अस्तीति ध्वनित्वस्थाने अस्याप्युत्तमकाव्यत्वं प्रसज्येत, एवकारनिवेशे तु यद्यङ्गमप्रधानमेव सदित्युत्तया करुणा-पेक्षया गुणत्वेऽपि वाच्यार्थापेक्षया शृङ्गाररसप्राधान्यम् अस्तीति ध्वनिकाव्यत्वमस्य व्याहतम्।"

यत्र गुणीभूतव्यङ्ग्यस्य सर्वेषु प्रकारेषु मम्मटादयः गुणीभूतव्यङ्ग्यत्वमेवाङ्गीकुर्वन्ति, तत्रापि जगन्नाथः चमत्कारस्य निम्नोन्नतस्थितिं परिलक्ष्य, चमत्काराधारेणैव विभागं कुरुते। अस्य प्रेरणादायिनी भवति आनन्दवर्धनाचार्यस्येयं कारिका-

"प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्।
धत्ते रसदितात्पर्यपर्यालोचनया पुनः॥"[8]

वस्तुतः एतादृशगुणीभूतप्रकारा कुत्र निवेशनीया इति निर्णयस्तु काठिन्यं भजते। अतस्तत्र रसादितात्पर्यपर्यालोचनयैव निर्णयः स्वीकरणीयः। उदाहरणार्थम्, काव्यप्रकाशस्य प्रथमोल्लासे मध्यमकाव्यस्य उदाहरणत्वेन मम्मटाचार्यैरिदमुदाहरणं दत्तम्-

"ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथ-करम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥"[9]

वञ्जुललतानिकुञ्जे दत्तसङ्केताऽपि नागतेति व्यङ्ग्यस्यापेक्षया, प्रियस्य हस्ते वञ्जुललतामञ्जरीं दृष्ट्वा तस्याः मुखच्छाया मलिनाऽभूदिति वाच्यमेव सुन्दरम्, इति मम्मटाचार्यः। किन्तु काव्यप्रकाशस्य टीकाकारेष्वेवासहमतिः वर्ततेऽस्मिन् विषये। काव्यप्रकाशस्य 'आदर्श'टीकाकारः महेश्वराचार्यः तद्विरचितादर्शटीकायाम्-

"इदमत्रावधेयम् - गुणीभूतव्यङ्ग्यत्वम् अत्र वाच्यमुखमालिन्यापेक्षया न्यूनचमत्का-रिणं 'दत्तसङ्केता नागते'त्यर्थम् अभिप्रेत्यैव उक्तम्, मुखमालिन्येन व्यज्यमानस्य विषादस्य तु पर्यवसाने प्रधानतयैवावस्थानाद् अभिप्राये असंलक्ष्यक्रमध्वनित्वम् एवास्य युक्तमिति" इति।

राघवविरहज्वालेत्यादौ पद्येऽपि 'हनूमता जानकीकुशलावेदनेन राघवः शिशिरीकृतः' इत्याकारकव्यङ्ग्यार्थः कपिकोपरूपवाच्यस्य उपपादकत्वा(पोषकत्वा)दप्रधान एव, पद्ये अस्मिन् व्यङ्ग्यार्थानवगमेन वाच्यचमत्कारस्य असिद्धेः, तथापि दुर्दैववशात् दासीकार्यं कुर्वती महाराज्ञीव व्यङ्ग्यार्थेऽपि कमनीयता वर्तत एव। अर्थात् गुणीभूतोऽपि व्यङ्ग्यार्थः जागर्ति। काव्यस्य उत्तमोत्तम-उत्तम-प्रकारयोर्द्वयोरपि व्यङ्ग्यार्थः जागरूक एव तिष्ठति। किन्त्वेकत्र प्राधान्येन अन्यत्र चाप्राधान्येनेत्येव विशेषः-

'अनयोर्भेदयोरनपह्नवनीयचमत्कारोऽपि प्राधान्याप्राधान्याभ्यामस्ति कश्चित्सहृदयवेद्यो विशेषः'।

एवम् उत्तमोत्तमकाव्ये ध्वनिकृतश्चमत्कारः, उत्तममध्यमकाव्ययोः सर्वोऽप्यर्थालङ्कारकृतः चमत्कारः, अधमकाव्ये च शब्दकृतश्चमत्कार इति जगन्नाथस्य काव्यविभागस्याधारः।

अत्र अनौचित्यं किमपि न पश्यामः। किन्तु मम्मटादिभिः कृतस्य काव्यविभागस्याधारः व्यङ्ग्यार्थः, जगन्नाथस्य तु चमत्कार इति विभागस्याधार एव भिद्यते। अतः तत्तन्मतानुसारं द्वयोरप्युपादेयता वर्तत एव।

**व्याख्याकारः**


- काव्यालङ्कारः, व्याख्या. रामदेव शुक्ल, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००३
- व्यक्तिविवेकः, व्याख्या. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, १९९७


[8] ध्वन्यालोकः-तृतीयोद्योतः-कारिका-४०

[9] काव्यप्रकाशः-प्रथमोल्लासः-मध्यमकाव्यस्योदाहरणपद्यम्

- ध्वन्यालोकः, व्याख्या. आचार्य शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन, २००१
- काव्यप्रकाशः, व्याख्या. ड. सत्यव्रतसिंहः, चौखम्बा विद्याभवन, वाराणसी, २००३
- साहित्यदर्पणः, व्याख्या. आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८६
- रसगङ्गाधरः, व्याख्या. आचार्य बदरीनाथ झा, चौखम्बा सुरभारती प्रकाशन।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# न्यायवैशेषिकमते कारणतावादविचारः

**शिवप्रसादपोखेलः**


## प्रबन्धसारः

*कारणेन कार्यस्योत्पत्तिर्भवति। कारणमन्तरा कार्यस्य कदापि उत्पत्तिर्नैव सम्भवति। यतः कार्यकारणयोरविनाभावसम्बन्धः लोकेऽवलोक्यते। तत्र दर्शनप्रस्थानेषु बौद्धाः असत्कार्यवादिनः सन्ति। तेषां नये अभावात् भावस्योत्पत्तिर्भवति। यथा बीजस्य नाशे सति अङ्कुरस्योत्पत्तिरिति। सांख्यमते तु उत्पत्तेः प्राक् कारणे कपाले घटस्य विद्यमानता इति इमे सांख्याः सत्कार्यवादिनः। वेदान्तप्रस्थाने अर्थात् अद्वैतनये इदं जगत् ब्रह्मविवर्त एव। अत एव इमे अद्वैतवेदान्तिनः विवर्तवादिनः। न्यायवैशेषिकप्रस्थाने तु उत्पत्तेः प्राक् कारणे कपाले घटस्य असत्त्वात् इमे असत्कार्यवादिनः। एतत्पक्षचतुष्टयं मनसि निधाय न्यायवैशेषिकप्रस्थाने कारणस्य व्युत्पत्तिपक्षमुपस्थाप्य तस्य कारणस्य किं स्वरूपमिति जिज्ञासायाम् आचार्यैः कारणस्य लक्षणमित्थं प्रतिपादितं यत् अन्यथासिद्धिशून्यत्वपदं कारणलक्षणे विशेषितम्। रासभेऽतिव्याप्तिवारणाय नियतपदमुपात्तम्। घटत्वेन स्वस्य स्वकारणत्वापत्तिवारणाय पूर्ववर्तित्वपदं कारणलक्षणे प्रतिपादितमाचार्यैः अन्यत्सर्वं प्रबन्धे प्रकाशितं भविष्यति। वेदान्तप्रस्थाने ब्रह्म जगतोऽभिन्ननिमित्तोपादानं भवति। अर्थात् तेषां नये ब्रह्म जगतः उपादानकारणं निमित्तकारणञ्च भवति। यथा लुता भवति। तन्तुकृते जालस्य कृते च। पारमार्थिकदशायां तेषां सिद्धान्तस्य विलक्षणत्वेऽपि व्यवहारदशायां तथा भवितुं नार्हति इति मनसि निधाय व्यवहारवादिनः न्यायवैशेषिकाः समवायि-असमवायि-निमित्तकारणभेदेन कारणस्य त्रैविध्यमुपपादितवन्तः। तथा चोच्यते –*

*“अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।*
*कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥*
*समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।*
*एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्॥”*

*समवायिकारणता द्रव्यनिष्ठा भवतीति सिद्धान्तमभ्युपेत्य समवायिकारणलक्षणं वक्ति यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् इति। अर्थात् समवायिकारणं कपालं भवति, तत्र कपाले समवायेन घटस्योत्पत्तिर्भवति। पटस्य समवायिकारणं तन्तुर्भवति। तन्त्वौ समवायेन पटस्योत्पत्तिः। अतः घटस्य समवायिकारणं कपालं, पटस्य समवायिकारणं तन्तुश्च भवति। एवञ्च आदौ निर्गुणघटस्योत्पत्तिः, क्षणान्तरे च सगुणघटस्य घटरूपस्योत्पत्तिर्भवतीति घटरूपस्य समवायिकारणं घट इति। समवायिकारणे आसन्नं प्रत्यासन्नं च कारणमसमवायिकारणं भवति। यथा घटस्य असमवायिकारणं कपालद्वयसंयोगः, घटरूपस्य असमवायिकारणञ्च कपालरूपमिति। समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणत्वमिति। यथा घटस्य निमित्तकारणं कुम्भकारः। उपर्युक्तविषये आचार्याणां यो हि विचारो विद्यते तस्य प्रकाशनम् अस्मिन् प्रबन्धे भविष्यति।*


## उपोद्घातः

लोके कारणात् कार्यस्योत्पत्तिर्भवतीति सर्वैरभ्युपेयते। कारणमन्तरा कार्यस्योत्पत्तिरेव कथमपि भवितुं नार्हति। कार्यकारणयोरविनाभावसम्बन्ध-दर्शनात्। कारणमन्तरा यदि कार्यस्योत्पत्तिः स्वीक्रियते तर्हि तन्तुमन्तरा बीजमन्तरा वा पटस्य अङ्कुरादेर्वा उत्पत्तिः स्यात् कदापि कैरपि नाभ्युपेयते इत्यतः दर्शनशास्त्रे कारणतावादसिद्धान्तस्य स्थानम् अतीवमहत्त्वपूर्णं विद्यते।

कार्यते यत् तत् कारणम्। कार्यकारणसमर्थं वा इति कारणपदस्य सामान्यार्थः डुकृञ् करणे इत्यस्मात् धातोः णिचि, ल्युटि, अनि कृते (कृ + णिच् + ल्युट्) कारणशब्दः सिद्ध्यति। कार्यते येन तत् कारणम् करणे ल्युट्। अत्र कारणशब्दार्थः एव कारणस्य स्थूलं स्वरूपं

लक्षणं वा विशिनष्टि। येन कस्यचन कार्यस्य सृष्टिः फलस्य प्रादुर्भावो वा भवति येन भवति यस्माद् वा भवति तस्य कार्यात् पूर्ववर्तिता अवश्यम्भावीति द्योत्यते। "**येन विना यन्न भवति तत् तत्पर्यायहेतु बीजम्**" तात्पर्यमिदं कारणं हेतु बोजमिति पर्याय शब्दाः। कारणं नाम सत्ता शक्तिर्वा यथा परिवर्तनं गतिः क्रिया वा सम्भवा, सा दशा स्थितितथ्यं वस्तु वा यद् कस्यचन अस्तित्वस्य स्थित्याः प्रक्रियायाःशृङ्खलायाः वा आधारभूतं यदेतेभ्यः पूर्व प्रवर्त्तते तत् कारणमिति मानविकी परिभाषा कारणस्यैतत् स्वरूपेण कायविषये निम्नलिखितं तथ्यम्। पुरस्तादागच्छति कारणं कार्यस्य जनकत्वात् कार्यात् पूर्ववृत्तित्वे सति कार्योत्पादकत्वम्। भारतीयदर्शने कारणस्य लक्षणमेतन्तथ्यम् आधारीकृत्यैवोपवर्णितम्। तद्यथा - **यस्य कार्यात् पूर्वभावो नियतो कार्यकारणसमर्थो वानन्यथासिद्धश्च तत्कारणम्। यथा तन्तुवेमादिकं पटस्य कारणम्।** एका अपरापि परिभाषा इतोऽपि सुस्पष्टतया अनन्यथासिद्धनियतपूर्वभावित्वं कारणम् इति। न्यायवैशेषिकाभिमतैषा परिभाषा सामान्यतया सर्वेषु दर्शनेष्वभिमतमिति निश्चप्रचं वक्तुं शक्यते।

### कारणभेदाः

कस्यचन कार्यसिद्धिः एकाधिककारण-पूर्विकेति लौकिकीदृष्टिः न केवलं दर्शने अपित्वाधुनिकविज्ञानेऽपि एतद्दर्शनमुररीक्रियते परन्तु मानवस्य परिमिता बुद्धिः न तानि सर्वाणि कारणानि परिभाषयितुं निश्चेतुं वा पारयति अतः कस्यचन कार्योत्पत्तौ अत्यावश्यकरूपेण सामान्यतया कारणत्रयमुपवर्णितम्। उपादानकारणम्, निमित्तकारणम्, साधारणकारणमिति।

### उपादानकारणम्

कार्यस्योत्पत्तिः यस्मात् तत्त्वात् भवति तत्तत्त्वं तस्य कार्यस्योपादानकारणं तद्यथा घटः मृदः जायते अतो मृत्तिका घटस्य उपादानकारणम्, न चैतत् कारणम् कार्यात् पृथक् भवितुं शक्नोति। कारणनाशात् कार्यनाश एव भवति।

### निमित्तकारणम्

कार्याद् बहिर्भूय कार्योत्पत्तिसहायकं निमित्तं कारणम्, यस्य कारणस्य सद्भावाद् उपादानकारणसाहाय्येन कार्यं निष्पद्यते तन्निमित्तकारणम्। किञ्च सर्वेषु कारणेषु, साधनेषु सत्स्वपि यं विना कार्य न सिद्ध्यति तन्निमित्तकारणम् अर्थात् कारणव्यापारस्य कर्ता एव निमित्तकारणम्। तद्यथा कुम्भकारः सत्सु उपादानकारणेषु मृत्तिकादिषु साधारणेषु दण्डचक्रादिषु न कुम्भकारं विना घटनिष्पत्तिः अतः कुम्भकार एव निमित्तकारणम्।

### साधारणकारणम्

कार्यसिद्धौ उपादाननिमित्तकारणभिन्नं यदन्यत् सहयोगिकारणं तत्सर्व साधारणं कारणं घटनिर्माणे कुम्भकारः निमित्तकारणम्, मृद् उपादानकारणम् एतदतिरिक्तं दण्डचक्रकालदेशादि सर्व साधारणकारणम्। सामान्यतया दर्शनेषु एतद् साधारणं कारणम् गौणं निमित्तकारणमित्युच्यते न तत् युक्तियुक्तम्।

### सृष्टिकारणतासन्दर्भे कारणविवेचनम्

सृष्टिकारणतासन्दर्भे जगन्निमित्तकारणं जगत्कर्त्ता इत्यभिधीयते स परमेश्वरः, उपादानकारणं सूक्ष्मप्रकृतिपरमाणुः साधारण-कारणं सृष्टिरचनायां कालसमयश्च।

सर्वेषु दर्शनेषु कार्यकारणभावविचारः प्रमुखतया भवति। परिदृश्यमानेषु विविधपदार्थेषु तत्तत्कारणजिज्ञासा नैसर्गिकी भवति। अस्याः जिज्ञासायाः उपशमनं प्रायः सर्वेषां दार्शनिकानां

ISSN : 2583-2271
Vol. - I, No. 1: 2021

कर्तव्यं भवति। किन्तु नैयायिकाः एतन्निरूपणे दार्ढ्यं वहन्ति। साधारणतया जन्यं सर्वं कार्यमिति व्यवह्रियते। तेषां जननसामर्थ्यादेव कारणमिति व्यपदिश्यते।[1] कारणस्य लक्षणन्तु कार्यनियतपूर्ववर्त्तित्वमित्यन्नम्भट्टपादैः निरूपितम्।[2] इदमेव लक्षणं भाषापरिच्छेदे अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता। कारणत्वं भवेत्[3] इति विश्वनाथपञ्चाननैः प्रतिपादितम्। तर्कभाषायां केशवमिश्रपादैस्तु "यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् कारणमिति अभिहितम्।" पूर्ववृत्तित्वं चाव्यवहितपूर्ववृत्तित्वं विवक्षितम्। नियतत्वञ्च व्यापकत्वम्। यथा यत्र यत्र घटोत्पत्तिस्तत्र तत्र दण्ड इति व्याप्तौ दण्डस्य व्यापकत्वम्। एवञ्च तत्र दण्डस्य कारणत्वम्। यद्यपि तन्तुरूपं पटस्य नियतपूर्ववर्ति तथाप्यन्यथासिद्धत्वात्तन्न कारणम्। तत्रेदमवधातव्यं यत्कार्यं प्रति अन्यथासिद्धत्वे सति नियतत्वे सति पूर्ववृत्तित्वं कारणत्वमिति कारणलक्षणे नियतत्वं तावत् व्यापकत्वम्, तच्च कार्याधिकरणवृत्त्यत्यन्ता-भावाऽप्रतियोगित्वम्। यत्किञ्चिद् घटं प्रति मृदाद्यानयनद्वारा रासभस्य कारणतासम्भवेऽपि घटत्वावच्छिन्नं प्रति कारणत्वं नास्ति, यतः यादृशघटादिकार्ये या मृत्तिका रासभेन न आनीता, तादृशघटवन्निष्ठात्यन्ताभाव-प्रतियोगित्वस्य रासभे सत्त्वात् रासभो न नियतपूर्ववृत्तिरिति। नियतत्वे सति पूर्ववर्तिनो दण्डत्वादेर्घटकारणत्वापत्तिवारणाय अन्यथासिद्धिशून्यत्वपदं कारणलक्षणे देयम्। दण्डत्वस्य अन्यथासिद्धत्वात् न तत्रातिव्याप्तिः। घटस्य घटत्वावच्छिन्ननिरूपिताऽन्यत्रक्लृप्तेत्याद्यन्यथासिद्धि-शून्यतया घटत्वावच्छिन्ननिरूपितव्यापकत्वात्मक-नियतततया च घटत्वेन स्वस्य स्वकारणत्वा-पत्तिवारणाय पूर्ववृत्तित्वपदोपादानम्। तथा च अन्यथासिद्धिशून्यत्वे सति कार्यताऽवच्छेक-सम्बन्धेन कार्याऽधिकरणे कार्याऽव्यवहित-प्राक्क्षणावच्छेदेन विद्यमानाऽत्यन्ताभाव-प्रतियोगितानवच्छेदकधर्मत्त्वं कारणत्वमिति कारणलक्षणं फलितं भवति। अन्यथासिद्धिश्चा-वश्यक्लृप्तनियतपूर्ववर्तिनैव कार्यसम्भवे तत्सहभूतत्वम्। अन्यथासिद्ध-लक्षणं प्रतिपादयति विश्वनाथः "अवश्यक्लृप्त-नियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यसिद्धमित्यर्थः।"[4] अनुमितिचिन्ता-मणावस्य अन्यथासिद्धस्य त्रयो भेदाः प्रदर्शिताः सन्ति। न्यायसिद्धान्त-मुक्तावल्यां तु पञ्च।[5] अस्य अन्यथासिद्धस्य विचारः अग्रे करिष्यते। कार्यत्वञ्च प्रागभावप्रतियोगित्वम्।[6]

इदञ्च कारणं त्रिविधं – समवाय्यसमवायि-निमित्तभेदात्[7]। यत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्।[8] यथा तन्तुः पटस्य समवायिकारणम्। अर्थात् समवायसम्बन्धेन सम्बद्ध सत् कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः। यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनोत्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमिति। पटत्वावच्छिन्नं कार्यं पटः तन्तुत्वावच्छिन्नेषु तन्तुषु समवायसम्बन्धेन उत्पद्यतेऽतः पटत्वावच्छिन्नं प्रति तन्तुत्वावच्छिन्नं समवायिकारणम् इति। यस्मिन् कारणे कार्यञ्च साक्षात्

---

1 कार्योत्पादकत्वं कारणत्वम्, सप्तपदार्थी, पृ. २७९

2 कार्यनियतपूर्ववृत्ति कारणम्, तर्कसंग्रहः, पृ. ६९

3 कारिकावली १६

4 न्या. सि., मु., पृ. ८९

5 येन सह पूर्वभावः, कारिकावली १९

6 तर्कसंग्रहः, पृ. ७१

7 तत्रैव

8 यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनक तत्, कारिकावली १८

ISSN : 2583-2271
Vol. - I, No. 1: 2021

समवेतं न भवति किन्तु परम्परया भवति तादृशं कारणमसमवायिकारणमित्युच्यते।[9] यथा तन्तुरूपं पटरूपं प्रति "कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्[10] इति अन्नम्भट्टाः। "तत्रासन्नं जनकं द्वितीयमिति"[11] कारिकावलीकारः। "समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयसमवायिकारणम्"[12] इति मुक्तावलीकारः विश्वनाथः। वस्तुतः कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति आत्मविशेषगुणभिन्नत्वे सति यत् कारणं तदसमवायिकारणम् इति। अत्रेदमपि बोध्यं यत् कार्येण कारणेन वेति कथनात् असमवायिकारणस्य लक्षणद्वयं प्रतीयते। तथाहि कार्येण सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायिकारणम्, यथा तन्तुसंयोगः पटस्येति द्वितीयञ्च कारणेन सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायिकारणम्, यथा तन्तुरूपं पटरूपस्येति। एतदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।

निमित्तकारणं द्विविधम् – साधारणम् असाधारणञ्चेति। कार्यत्वावच्छिन्नं प्रति कारणत्वं साधारणकारणत्वम्। न्यायनये नव साधारणकारणानि स्वीकृतानि।[13] तानि चेश्वरस्तदीयज्ञानेच्छाकृतयः, प्रागभावः, कालो, दिक्, धर्माधर्मौ चेति। धर्माधर्मौ मिलित्वाष्टौ भवन्ति।[14] अर्वाचीननैयायिकैः प्रतिबन्धक-संसर्गाभावोऽपि साधारणकारणत्वेन स्वीकृतः।

असाधारणकारणञ्च दण्डचक्रादि तत्तत्कार्यं प्रति कारणं भवति। इदमेवासाधारणकारणं व्यापारवच्चेत् करणमिति व्यपदिश्यते। अद्वैतवेदान्ते कारणं द्विविधमेव उपादानकारणं निमित्तकारणञ्चेति। समवायानभ्युपगमात् समवायिकारणं न स्वीक्रियते। तत्स्थाने उपादानकारणं स्वीक्रियते। असमवायिकारणं केवलं नैयायिकानामेव कश्चन असाधारणो विषयः।

साधारणकारणेष्वपि प्रागभावो न कारणं वेदान्तिनां मते, अभावभेदानङ्गीकारात्। प्रतिबन्धकाभावोऽपि न कारणम्, अभावाद्भावोत्पत्तिस्वीकारापत्तेः। एवञ्च न्यायाद्वैतयोः कारणत्वसामान्यनिरूपणे कृते सति जगत्कारणत्वविचारः प्रवर्तते।

## सहायकग्रन्थसूची


- न्यायसिद्धान्तमुक्तावली – टीका. आचार्य लोकमणि दाहाल, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९७
- तर्कसंग्रहः – सम्पा. श्रीकृष्णदल आचार्य, चौखम्बा विद्याभवन, वाराणसी, २००३
- कारिकावली – सम्पा. श्रीरामगोविन्दशुक्लः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २००९
- तर्कभाषा – व्याख्या. गजाननशास्त्री मुसलगाँवकर, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९८४


[9] असमवायिकारणं तदुच्यते यत्समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणम् तर्कभाषा, पृ.४८

[10] तर्कसङ्ग्रहः, पृ. ४८

[11] कारिकावली १८

[12] न्या. सि. मु. पृ. ८०

[13] कार्यमात्रं प्रति साधारणकारणानि ईश्वरस्तदीय-ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टानि, तर्कामृतम्, द्रव्यनिरूपणप्रकरणम्।

[14] ईश्वरस्तदीयज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टान्यष्टौ साधारणकारणानि, वाक्यवृत्तिः।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# जीवनं जलम्

**ड. गोपीकृष्णन्-रघुः**

**प्रबन्धसारः**

*जलं मानवजीवने एकम् अत्यावश्यकं वस्तु। जलं विना जीवनं नैव सम्भवति। तस्मादेव कारणात् प्राचीनकाले जनैः श्रद्धाभक्तिपुरःसरं नदी देवीरूपेण पूजिता भवति स्म। कोशग्रन्थेषु जलस्य बहूनि नामानि प्राप्यन्ते। यस्य वस्तुनः आधिक्येनोपयोगः यस्मिन् चाधिकश्रद्धा तस्यैवैमं नामाधिक्यं भवितुमर्हतीति तदानीन्तनकाले जलस्य उपयोगित्वं माहात्म्यञ्च अनस्वीकार्यमेव। आयुर्वेदेऽपि जलस्य विविधा भेदा गुणदोषाश्च आलोचिताः। किन्तु अत्यन्तापेक्षणीयस्य तादृशस्य जलस्य विषये अस्माकं दृष्टिः कीदृशी वर्तते इदानीम्। अस्य चोत्तरं सरलमेव अत्यन्तमुपेक्षाभावः। अत एव वयं पश्यामः अस्माकं नदी-कूप-तडागादिषु मालिन्यं निक्षिपामः, विद्यमानानां जलस्रोतसां नाशनं कुर्मः। फलतः प्राक् जलसमृद्धेष्वपि देशेष्वप्यधुना जलसमस्या, शुद्धजलाभावः, मलिनजलजन्यानां रोगाणामाधिक्यञ्च। एवमग्रेऽपि यदि स्यात् तर्हि नाचिराद् पृथिव्यामपि जीवाभावः स्यात्। तस्मात् पूर्वजानां जलविषयिणीं श्रद्धां मनसि धारयित्वा अस्माकमपि इदं कर्तव्यं यज्जलस्य रक्षणं सदुपयोगश्चेति येन भविष्यत्कालिका अपि अस्माकं विषये कृतज्ञाः भवेयुरिति।*

## ०. भूमिका

जलं जीवतः जन्तोः अनुपेक्षणीयेषु अन्यतमं वस्तु। जगति जीवनं जलाधारितमेव। तस्मादेव खलु मङ्गलादिष्वपि ग्रहेषु जीवसान्निध्यनिर्णयार्थं जलसान्निध्यस्य अन्वेषणं कुर्वन्ति गवेषकाः। अस्माकं पृथ्व्यामपि जीवरक्षणाय जलमेवावश्यकं वर्तते। अस्याः तापमानरक्षणे जीवानुकूल-वातावरणरक्षणे च जलस्य योगदानं महदस्ति। जलचक्रप्रवर्तनादेवास्माकं ऋतुचक्रप्रवर्तनं भवति। भूभागस्य अशीतिप्रतिशतं जलमयमेवास्ति। अस्माकं शरीरस्यापि सा एव स्थितिः।

किन्तु अत्यन्तापेक्षणीयस्य तादृशस्य जलस्य विषये अस्माकं दृष्टिः कीदृशी वर्तते इदानीम्। अस्य चोत्तरं सरलमेव अत्यन्तमुपेक्षाभावः। अत एव वयं पश्यामः अस्माकं नदी-कूप-तडागादिषु मालिन्यं निक्षिपामः, विद्यमानानां जलस्रोतसां नाशनं कुर्मः। फलतः प्राक् जलसमृद्धेष्वपि देशेष्वप्यधुना जलसमस्या, शुद्धजलाभावः, मलिनजलजन्यानां रोगाणामाधिक्यञ्च। एवमग्रेऽपि यदि स्यात् तर्हि नाचिरात् पृथिव्यामपि जीवाभावः स्यात्।

प्रसङ्गे चास्मिन् अस्मत्पूर्वजानां विषयेऽस्मिन् कीदृशी दृष्टिरासीदिति यदि पश्यामस्तर्ह्याश्चर्यमेव भविष्यति। ते जलं केवलं पेयमित्येव न अपि त्वौषधवन्मन्यन्ते स्म। तदत्र प्रतिपाद्यते मया।

## १. प्राचीनभारतीयानां जलविषयिणी दृष्टिः

भारतीयानां धार्मिकी आस्था प्रसिद्धा एव। सर्वत्रापि ते धार्मिकदृष्ट्यैव प्रवर्तन्ते। अत एवादराधिक्यदर्शनाय ते वस्तुषु पूज्यत्वम् आरोपयन्ति। पूज्यस्य वस्तुनः रक्षणे आस्थावन्तः श्रद्धालवः भवन्तीति तस्य रक्षणं सुकरम्। एवञ्च श्रद्धाकल्पनमपि रक्षणोपायः आसीत्।

जलविषयेऽपि ईदृशी भावना दृश्यते स्म प्राचीने

ISSN : 2583-2271
Vol. - I, No. 1: 2021

भारते। तेषां नदीसमुद्रादीनां जलस्त्रोतांसि पूज्यान्यासन्। तेषां रक्षणपोषणादिकं पुण्यावहं मत्वा श्रद्धया कुर्वन्ति स्म। तस्य मुकुटोदाहरणं गङ्गानदी वर्तते। गङ्गा भारतीयानामभिन्नमङ्गमस्ति। न कुत्रापि जगति कस्याश्चिन्नद्याः ईदृशं स्थानं वर्तते यावत् गङ्गायाः। न केवलं गङ्गा अपि तु अन्याश्च नद्यः पूज्याः एव। अतः खलु स्नानसमये उच्यते-

"गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु॥" इति।

वेदेष्वपि जलमहिमा वर्णिता वर्तते। हिरण्यगर्भसूक्ते सर्वस्याप्यस्य प्रपञ्चस्य आदिमं तत्त्वं जलमिति वर्णयति। जलादेव सर्वस्याप्युत्पत्तिः। यथा-

"आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम॥"[1]

महज्जलम् अग्न्यादिभूतानि गर्भं धृत्वा तान्यजनयन्। ततः देवानां प्राणाः उत्पन्नः इति सामान्योऽर्थः। जलमेव जीवननिदानम् इति महर्षीणां दर्शनम्।

भाषादिशा अपि जलमल्पं प्रधानं भवति। संस्कृतभाषायां तावत् जलस्य अशीत्यधिक-द्विशतं नामानि वर्तन्ते। इदं तस्य प्राधान्यस्य द्योतकं भवति। यस्य वस्तुनः आधिक्येनोपयोगः यस्मिन् चाधिकश्रद्धा तस्यैवैमं नामाधिक्यं भवितुमर्हति। न केवलं नाम्नः आधिक्यं किन्तु नाम्नः अर्थोऽपि जलस्य प्राधान्यं गमयति। बहवश्चान्वर्थनामानः वर्तन्ते तस्य। यथा जीवनम्, अमृतं, भुवनम् इत्यादि। इमानि च जलस्य गुणद्योतकाः अपि भवन्ति।

## ३.जलविषये आयुर्वेदविचारः

यथैवास्य जीवनमिति नाम तथैवास्य प्राधान्यं जीवनारोग्यचर्चायां जायते।अतः खलु श्रूयते- "पानीयं प्राणिनां प्राणाः विश्वमेव च तन्मयम्"[2] इति। अत एव जलविषये आरोग्यशास्त्रे आयुर्वेदे महती चर्चा विद्यते। जलभेदानां गुणदोषाणाञ्च चर्चा शास्त्रे सुविस्तरं कृता वर्तते।

### ३.१ जलभेदः

जलस्य आन्तरीक्ष-भौमभेदेन द्विधा विभागः प्रथमतः कृतः। आन्तरीक्षं नाम अन्तरीक्षे भवः इत्यर्थः। सूर्यतापेन बाष्पीकृतं जलं दिवि वाय्वादिस्पर्शात् शीतत्वमाप्य आन्तरिक्षं जलं भवति। इदमेवात्यन्तनिर्दुष्टं शुद्धं जलम्। तस्मिन्नितरवस्तुस्पर्शाभावात्। यच्च मालिन्यमासीत्सर्वं बाष्पीकरणेन नष्टमभवत्। अत एव अस्यैकान्ततः पथ्यत्वमुक्तं शास्त्रे।

चत्वारो तस्य भेदाः धार-कार-तौषार-हैमनाम्ना। धारं नाम वर्षणात् प्राप्यं जलं, कारं नाम घनीभुतं हिमखण्डवत् वृष्टौ पतति। तौषारं शीतकालेषु कुझटिकादि प्रातः तृणप्रणादिषु विद्यमानं जलम्। हैमश्च हिमरूपेण प्राप्यम्। भौमस्य च सप्तभेदाः यथा कौप-नादेय-सारस-ताडाग-प्रास्त्रवण-औद्भिद-चौण्ड्य-नाम्ना। एषु सर्वेष्वपि धारस्यैवातिमहत्वं वर्तते।

धारस्य च पुनः द्विधा भेदः गाङ्गं सामुद्रञ्चेति। तेषु च गाङ्गं प्रधानं मुख्यञ्च। तदप्याश्वयुजमासे पततः श्रेष्ठत्वमुच्यते। तस्येदं रहस्यं यत् वर्षर्त्वारम्भकाले अन्तरीक्षे धूलीधूमादिकणानां सद्भावात् तद्योगेन जलं मलिनमेव पतति। यावता च वर्षासमाप्तिः भवति तावता अन्तरीक्षं शुद्धं भवति। तेन अन्यस्पर्शरहितं शुद्धं जलं पततीति तस्य पथ्यत्वं शास्त्रे प्रोक्तम्। तस्य च भूस्पर्शात् प्रागेव संग्रहः कार्यः यतः

[1] ऋग्वेदः १०/१२१

[2] अष्टाङ्गहृदयम् ५/१४

ISSN : 2583-2271
Vol. - I, No. 1: 2021

भूस्पर्शान्मलिनता भवति।

### ३.२ जलस्यौषधगुणः

एवंभुतं जलं न केवलं तृष्णानिवृत्त्यर्थम् उपयुक्तं भवति अपि तु औषधवदपि भवति। भोजनादौ जलपानस्य नियमः वर्तते। तत्र भोजनकाले जलपानस्य फलानि एवं वर्णितमस्ति "समस्थूलकृशा भुक्तमघ्यान्त-प्रथमाम्बुपराः"[3] इति। एवं शीतजलं मदात्ययं, ग्लानिं, मूर्छाञ्च वारयति। छर्दिश्रमशिरोभ्रम-ज्वलनादीनामपि निवारणो-पयत्वेन शीतजलं प्रशास्तम्।

उष्णजलं कफमेदवातनाशकं ज्वरकासादि निवारकञ्च भवति। श्रृतशीतजलपानं मद्यज-न्येषु सन्निपातजन्येषु रोगेषु पित्ताधिक्ये च पेयं भवति। एवमेव अतिसारदाहविषमूर्छादिषु छर्द्यादौ च जलमुत्तममौषधं वर्तते।

### ४. उपसंहारः

एवं बहुगुणोपेतत्वादेव अस्मत्पूर्वजैः जलस्य पूज्यं स्थानं कल्पयित्वा तस्य रक्षणं कृतम्। गुणमर्मज्ञैः तैः अवश्यमेवैतन्मनसि निधायास्य नामकरणमप्युत्तमं विहितम् "पयः कीलालममृतं जीवनं भुवनं वनम्"4 इति। तस्मादस्माकमपि इदं कर्तव्यं यज्जलस्य रक्षणं सदुपयोगश्चेति येन भविष्यत्कालिका अपि अस्माकं विषये कृतज्ञाः भवेयुः।

ᏈᏎᏍᏗ

### सहायकग्रन्थाः

1, सुश्रुतसंहिता, सम्पादकः-श्रीहाराचन्द्र-चक्रवर्ति, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहलि, 2008
2, अष्टाङ्गहृदयम्, सम्पादकः-श्री कविराज-अत्रिदेवगुप्तः, चौखम्भा प्रकाशनम्, वाराणसि, 2007
3, अमरकोशः, सम्पादकः-श्री वासुदेवपण-शीकरः, चौखम्बा संस्कृतसंस्थानम्, नवदेहलि, 2011

[3] अष्टाङ्गहृदयम् ५/१५

[4] अमरकोशः वारिवर्गः४

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# कोरोनासंक्रमणनिराकरणे संस्कृतवाङ्मये उपादानानि

**लक्ष्मीकान्तषडङ्गी**

---


## प्रबन्धसारः

*"शरीरमाद्यं खलु धर्मसाधनम्" इत्युक्त्यनुसारं न केवलमात्रं धर्मसाधनायापि तु धर्मार्थकाममोक्षाणामपि साधनायेदं शरीरमेवैकमलमिति नास्ति कस्यचिदपि विमतिः। परन्तु सर्वदा सर्वथा न तथा जनानां निरामयजीवनं सुलभमेव दरीदृश्यतेऽस्मिन् संसारे। यतो हि सम्प्रति एकविंशशताब्याः पाददेशे चिकित्साविज्ञानस्य बहुलाग्रगत्यापि कोरोनाभूताणुकवलिताः विश्ववासिनः। यदा जनाः अदृष्टेश्वरस्यास्तित्वं प्राचीनवेदविद्यादिकञ्च विस्मर्यात्मानमीश्वरमिति मन्यन्ते तदा तु कोरोना इत्यदृष्टभूताणुः जनान् मूढ इति प्रतिपाद्यादृष्टेश्वरस्य महत्त्वं पुनः स्मारयति। भूताणुरयं भिन्नभिन्नरूपेण स्वकायां विस्तार्य प्रत्यहं विश्वस्य लक्षलक्षसंख्यकान् जनान् संक्रम्य च नाशयति। अत्याश्चर्यस्य विषयोऽयं यदनेन निर्जीवादृष्टकोरोनाभूताणुभयेन भीताः जनाः सम्प्रति निरूपायाः सन्तः गृहाभ्यन्तरे आत्मानं गोपयन्ति। अतः संशयपूर्णपरिस्थितावस्यामुच्यते तावत् व्यासवाल्मीकिचरकसुश्रुतादिभिः प्रणीतं वेदोपनिषदायुर्वेदपुराणादिप्राचीनसंस्कृतशास्त्रसमग्रमस्माकं लोचनस्वरूपमस्ति। येषामवलोकनेनानुशीलनेन चास्माकं समाधानमवश्यमेव सम्भवेदिति नास्त्यत्र संशयस्यावकाशः। उच्यते च यथार्थेण--*

*"समस्यायाः निवारणं समस्यायाः श्रमस्य सुफलं तथा।*
*भवतु कालदीर्घेण लभते नात्र संशयः॥" इति*


## उपक्रमः

"सुखं वाञ्छति सर्वो हि तच्च धर्मसमुद्भवम्"[1] इत्युक्त्यनुसारं जगतीह सर्वेऽपि जनाः सदैव सुखं निरामयञ्च जीवनं कामयन्ति। परन्तु अस्य सुखस्य निरामयजीवनस्य च मूलमेव धर्मः। अस्य धर्मस्यापि मूलमेव सुस्थशरीरमस्ति। "धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः"[2]। यतो हि सुस्थशरीरं प्राणान् वा विना न कोऽपि जनः स्वधर्मं सम्यग्रूपेण पालयितुं क्षमः। यथार्थेण अस्मादुच्यते "शरीरमाद्यं खलु धर्मसाधनम्"[3] इति। अतः सर्वेषां धर्माणां साधनस्वरूपं शरीरं सर्वैः सर्वदा सर्वादौ सयत्नेन संरक्षणीयम्। परन्तु सुस्थशरीरेण जीवनं नैव तथा सुलभम्। यतोहि उच्यते शरीरं व्याधिमन्दिरम्। यतः मनुष्यशरीरात् एका व्याधिः समाहिता चेदपरा समायाति। एवं क्रमेण व्याधिपरम्परा प्रत्येकेषु जनेषु प्रचलति प्रतिदिनं प्रतिमुहूर्त्तम्। निरवच्छिन्नं व्याधिरहितं जीवनं न लक्ष्यते कदापि कदाचित् कस्यापि जीवने। तथापि जनाः जिजीविषन्ति, व्याधिनिराकरणे यथासाध्यं सचेष्टा भवन्ति। इयमेव धारा प्रचलतितरां सर्वत्र सर्वदैव। व्याधयः सन्ति दरिद्राणां तथा धनिनामपि। नास्ति संसारेऽस्मिन् आमयविहीनः एकोऽपि जनः।

## करोना-समस्या

सर्वे वयं जानीमः, सम्प्रति समग्रविश्वस्य कृते या मुख्या समस्या सैव समस्या करोना-समस्या नाम्नाभिहितास्ति। या समस्या

[1] दक्षस्मृतिः - १.१८, पृ. ३२५

[2] हितोपदेशः - १.२३, पृ.६०

[3] उपनिषद् परिचयः – पृ.३३

विश्वस्वास्थ्यसंगठनेनापि (W.H.O.द्वारा) **सर्वव्यापी महामारी** इति नाम्ना समुद्घोषिता भवति। भूताणुद्वारैव संक्रमितेयं व्याधि :**कोभिड्१९-** इति नाम्ना समग्रेऽस्मिन् विश्वे परिचिताऽस्ति। निकटे अतीते २०१९ ख्रीष्टाब्दे नभेम्बरमासे **चीन्**-देशस्य उहान् इति नगरीतः आरभ्य एकैकेन क्रमेण संक्रम्य च सम्प्रति विश्वस्य द्विशताधिकं देशं परिव्याप्य प्रतिदिनं लक्षलक्षसंख्यकान् जनान् घातयतीयं कोरोना व्याधिः। गवेषकाणां चिकित्सकानाञ्च मतानुसारं यद्यपि भूताणुजनितेयं व्याधिः आसीदतीते, आयाति वर्तमाने स्थास्यति च भविष्ये समये तथापि साम्प्रतिके काले कोरोनाभूताणोः **कोभिद्१९-** इति श्रेण्याः भयावहता समग्रेऽस्मिन् विश्वे दरीदृश्यते प्रतिनियतम्। कोरोनाभूताणुरयं चक्षुर्नासिकादीनां संस्पर्शेण मानवशरीरं सम्प्रविश्य मनुष्यस्य रोगप्रतिरोधकशक्तिं विनश्य श्वासजनितसमस्यादिकं च सम्भूय अतिसत्त्वरमेव मनुष्यं मृत्युमुखं प्रेषयति। अत्याश्चर्यस्य विषयोऽयं यत् निर्जीवोऽपि भूताणुरयं सजीवशरीरं संक्रमणेन तत्रापि स्वकायां विस्तार्य क्रमशः सजीवशरीरमपि निर्जीवं कारयति। न केवलमात्रमेतत् संक्रमणं मानवशरीरस्य कृतेऽस्ति, अपितु समग्रजीवजगत् अप्ययं भूताणुः सम्प्रति संक्रमति। पुनश्च न केवलमात्रं जीवजगतः संस्पर्शादेवास्यैव भूताणोः संक्रमणभयम्, अपित्वस्माकं दैनन्दिनजीवनस्य नित्यव्य-वहार्यवस्तुमाध्यमेनाऽपि भूताणुरयं सततमेव संक्रमति। परिणामवशतः सम्प्रति न केवलमात्रं जनानां जीवनहानिः जायते, अपितु समग्रेऽस्मिन् विश्वे सर्वकाराणां विधिनिषेधादिभिः व्यवस्थापनाभिः समग्रं जनजीवनमपि विपर्यस्तं भवति। यतो हि जनजीवनेन साकं कोरोना कवलिता सती शनैः शनैरनुदिनं क्षीणा भवत्यस्माकं देशस्य समग्रविश्वस्य च अर्थनीतिव्यवस्था। विविधानां देशानां पक्षतः सर्वकारीयस्तरेषु विहितैः विविधैः पदक्षेपैरपि कोरोनाभूताणोः संक्रमणं सम्प्रति न यात्यन्तं प्रत्युत प्रतिदिनं प्रचलत्येव निरवच्छिन्नम्।

**करोनानिराकरणोपायः**

यद्यपि करोनायाः समूलोत्पाटनं नैव सुकरं, यतो हि अन्यान्यमहामारी- णामिव इयमपि सुचिरं दिनं स्थास्यतीति समीक्षकाणां सुदृढं मतमस्ति, तर्हि अस्यामेव परिस्थितौ कथमस्माभिः करोनाया निराकरणेन निरापदेन च स्थातव्यं, साम्प्रतिकपरिस्थितौ अस्माकं किं कर्त्तव्यं का वा गतिः, कथं समस्येयं दूरीभूता भविष्यति इत्ययं विषयः सम्प्रति विश्वस्य कृते प्रमुखरूपेण चिन्तनीयः प्रसङ्गोऽस्ति। अस्यां संशयपूर्णपरिस्थितौ उच्यते तावत् व्यास-वाल्मीकि-मनु-चरक-सुश्रुतादिभिः प्रणीतं वेदोपनिषदायुर्वेदपुराणादिप्राचीनसंस्कृतशास्त्रसमग्रम् अस्माकं लोचनस्वरूपमस्ति। येषामवलोकनेन अनुशीलनेन चास्माकं संशयस्य छेदः समस्यायाश्च समाधानमवश्यमेव सम्भवेदिति नास्त्यत्र संशयस्यावकाशः। यथार्थेनोच्यते नीतिशास्त्रे –

"अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥"[4]

वास्तवदृष्ट्या शास्त्रविहितं मार्गं सर्वकारविहितं सुपदक्षेपञ्च यदि वयं सचेतनाः सन्तः सम्यग्रूपेण पालयिष्यामः तर्हि अचिरेणैव विपदः अस्या मुक्ताः भविष्यामः। एतदर्थम् उच्यते –

"निवारणं समस्यायाः श्रमस्य सुफलं तथा।
भवतु कालदीर्घेण लभते नात्र संशयः॥"[5]

अर्थात् समस्यास्याः समाधानं परिश्रमस्य सुफलञ्च विलम्बेनापि प्राप्यते नात्र संशयोऽस्ति।

[4] हितोपदेशः – १. पृ.५८

[5] आयुर्वेदस्येतिहासः – पृ.५

ISSN : 2583-2271
Vol. - I, No. 1: 2021

**संस्कृतवाङ्मये करोनानिराकरणोपादानानि**

प्राचीनसंस्कृतशास्त्रेषु विविध- संक्रमणात् विमुक्तये आहार-विहार-व्यवहार-निद्रा-स्नान-शौचादिष्वखिलकर्मसु कीदृशः साधारणनियमः पालनीयः तदालोच्यते। मनुष्याणां कृते निरामयजीवनयापनाय करोनादीनां महामारीणां संक्रमणनिराकरणाय च सर्वास्वेवावस्थासु शुचित्वमपरिहार्यम्। इदमेव शुचित्वं द्विविधम्। अन्तर्बाह्यश्चाथवा अन्तरिन्द्रियगतत्वं बहिरिन्द्रियगतत्वञ्च। अन्तरिन्द्रियस्य अन्तःकरणस्य वा शुचित्वं सच्चिन्तासत्कर्मसज्ज्ञानसदाचारणादिभिः च सिध्यति। अनेन शरीरे रोगप्रतिषेधकशक्तेः वृद्धिर्घटते। अतः शरीरं सहसैव रोगाक्रान्तं नैव भवेत्। अतः सर्वादौ एवान्तःकरणस्य शुचित्वमवश्यमेव आवश्यकम्। ततः बहिरिन्द्रियाणां शुद्धत्वं स्नानादिभिः क्रियते। उच्यते विषयेऽस्मिन् "स्नानेन शुद्धिः न तु चन्दनेन"[6] इति। एवमपि वाधूलस्मृतौ उच्यते यथा "स्नानाचारविहीनस्य सर्वाः स्युः निष्फला क्रियाः"[7] इति। अर्थात् विना स्नानेन न किञ्चिदपि कार्यं सिध्यति। यतो हि स्नानादिभिः बहिरिन्द्रियाणां शुचित्वे जाते मनसः शरीरस्य चोभयोः पवित्रता प्रसन्नता निर्मलता च विराजन्ते। अनेन शरीरस्य मनसश्च प्रसन्नतायां मानवशरीरे सहसैव व्याधिसंक्रमणं नैव जायते। अतः सर्वाण्येव कार्याणि स्नानादिभिः शुद्धाचारेण सह सम्पादनीयम्। मुख-चक्षुः-कर्ण-नासिकादीनां मार्गैः शरीरे जीवाणुसंक्रमणं भवेत्। एतदर्थं मुखनासिकादीन् मुखावरणैः शुद्धवस्त्रादिभिः आच्छाद्य मौनत्वमवलम्ब्य शौचादिकं कार्यं करणीयम्। पुनश्च यथासम्भवमपरिष्कृत-परिवेशात् दूरे स्थातव्यम्।

[6] चाणक्यनीतिः - १७-१२, पृ.७

[7] वाधूलस्मृतिः - पृ.१०६

स्वशरीरस्य शुचित्वेन सह पर्यावरणस्यापि शुचित्वं संरक्षणीयं सततम्। अन्यथा अपरिष्कृतपर्यावरणादपि विविधानां संक्रामकरोगाणां संक्रमणं मानवशरीरे सम्भवेत्। एतदर्थमुच्यते शास्त्रे "घ्राणास्येवाससाच्छाद्य मलमूत्रं त्यजेत् बुधः"[8]।

मनुसंहितायामप्युच्यते "नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः"[9]। खाद्यग्रहणादि-समयेष्वपि हस्त-मुख-नखादीनां मलमाध्यमेन शरीरे जीवाणूनां प्रवेशः जायते। एतदर्थं हस्तपदमुखनखादीन् परिष्कृत्य भोजनमाचरणीयम्। पद्मपुराणे एतदर्थमुच्यते "हस्तपादे मुखे चैव पञ्चार्द्रो भोजनं चरेत्"[10] इति। एवञ्च सुश्रुतसंहितायामप्युक्तमस्ति यत् "नाप्रक्षालितपाणिपादो भुञ्जीत"[11] इति। पुनश्च अशुचिस्थानगमनागमनवेलायाम् अशौचसमयेषु च सर्वेषामेव जनानां स्नानं सम्पादनीयमेव। तद्यथोच्यते विष्णुस्मृतौ- "चिताधूमसेवने सर्वे वर्णाः स्नानम् अचारेयुः। वमने श्मश्रुकर्मणि कृते च॥"[12] इति। अर्थात् श्मशानभूमिगमनात् वमनात् श्मश्रुनखकेशादीनां छेदनाच्च परं सर्वेषां स्नातव्यम्। खाद्यादीनां शुचित्वमिव वस्त्रादीनामपि शुचित्वमाचरणीयम्। अपरस्य वस्त्रं, मलिनं वस्त्रं, बहुदिनपरिधानवस्त्रञ्च न परिधातव्यं कदापि। अतः वस्त्रादिभिः शुचित्वसम्पादनाय पद्मपुराणे प्रतिपादित-मस्ति यत् "न धारयेत् परस्यैवं स्नानवस्त्रं कदाचन"[13] इति। विशेषतः अपरस्य जनस्य स्नातवस्त्रं कदापि कस्यापि न परिधातव्यम्। एवं आचरणेन अपरजनस्य

[8] वाधूलस्मृतिः - ९. पृ.१०७

[9] मनुसंहिता – ४.४९, पृ.२०३

[10] पद्मपुराणम् (यज्ञपुराण) सृष्टि – ५१.८८, पृ.३०६

[11] सुश्रुतसंहिता – चिकित्सा – २४/९८

[12] विष्णुस्मृतिः - २२

[13] पद्मपुराणम्-सृष्टि. – ५१.८६

शरीरस्य जीवाणुसंक्रमणभयं स्वकीये शरीरे सञ्जायते। पुनरपि कदा कस्मिन् कर्मणि च कीदृशं वस्त्रं व्यवहर्तव्यमित्यस्मिन् विषयेऽपि निर्देशः विद्यते, तद्यथा-

"अन्यदेव भवेद् वासः शयनीये नरोत्तम।
अन्यद् रथ्यासु देवानामर्चयामन्यदेव हि॥"[14]

अर्थात् शयनसमये गमनागमनसमये देवार्चनसमये च मनुष्याणां पृथक् पृथक् वस्त्राणि व्यवहर्त्तव्यानि। प्रतिदिनं वस्त्राणि जलेन परिष्कृत्य प्रक्षाल्य च व्यवहर्त्तव्यानि। एतदर्थमुच्यते विष्णुस्मृतौ "न अप्रक्षालितं पूर्वधृतं वसनं बिभृयात्"[15] इति।

विविधेभ्य: संक्रमणेभ्य: रक्षार्थं खाद्यवस्त्रादीनां शुचित्वमिव जलाहरणेऽपि सतर्कतावलम्बनीया। वस्त्रपूतं सुपरिष्कृतं पानीयञ्च जलमञ्जलिना न गृहीत्वा स्वच्छपात्रेणैव पिबेत्। एतदर्थमुच्यते मनुना "न वार्यञ्जलिना पिबेत्"[16] इति। एवञ्च - "नाञ्जलिपुटेनापः पिबेत्"[17] इति सुश्रुतसंहितायामुक्तमस्ति। न केवलमात्रं जलपानसमये सतर्कता विधेया अपितु लवण-घृततैल-व्यञ्जन-पानीयादीनां ग्रहणं कदापि साक्षादेव हस्तेन न कर्त्तव्यम्। एतदर्थं परिष्कृतपात्रं व्यवहर्त्तव्यम्। धर्मसिन्धु इति ग्रन्थे प्रसङ्गेऽस्मिन् उच्यते यथा –

"लवणं व्यञ्जनं चैव घृतं तैलं तथैव च।
लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत्॥"[18]

कोरोनासंक्रमणस्यान्यतमं प्रमुखकारणं भवति हस्तादिभि: मुख-नासिका-नेत्र-कर्णादीनां वारंवारं स्पर्शकरणम्। एवं करणेन हस्तस्थिताः जीवाणुसमूहाः शरीरमध्यं संप्रविशन्ति। एतदर्थमपि शरीरे रोगसंक्रमणं सम्भवति। अत: कोरोनासंक्रमणात् रक्षार्थं विना कारणेन मुखादीन् न स्पृशेत्। एतदर्थमुच्यते "अनातुरः स्वानि खानि न स्पृशेदनिमित्तत:"[19] इति। एतदतिरिच्य स्नानादनन्तरमावस्त्रेण शरीरं नापमृज्यात्। एवं कृते सति चर्मणः संक्रमणमपि सम्भवेत्। उच्यते यथा "अपमृज्यान्न च स्नातो गात्राण्यम्बपाणिभि:"[20] इति। अस्माभिः व्यवहरणीयं जलं सततमेव शुद्धं रक्षितव्यम्। एतदर्थं स्नानादिसमये जले शौचादिकं न कर्त्तव्यम्। एवं कृते सति जलजनितं संक्रमणं न सम्भवेत्। आपस्तम्भधर्मसूत्रे एतदर्थमुच्यते "नाप्सु मूत्रपूरीषं कुर्यात्"[21] इति।

**निष्कर्षः**

समाजस्य सर्वाङ्गीणविकासाय शिक्षाया: स्वास्थ्यस्य च विशेषरूपेण प्रयोजनमपरिहार्यम्। विशेषत: धर्मसाधनाय यथैव सुस्थशरीरस्य आवश्यकता तथैव सुस्थशरीरायापि सुशिक्षाया: सचेतनतायाः चापि नितराम् आवश्यकता अस्ति। कोरोनाया: इव नैका महामारी अतीते आगता सम्प्रति आगच्छति भविष्ये चागमिष्यति। परन्तु उपर्युक्तानां शास्त्रनियमानां परिपालनेन सतर्कतायाश्च चावलम्बनेन कोरोना महामारी दूरीभूता स्यात्। उक्तञ्च – "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्"[22]। अत: अस्माकमाहार-विहार-निद्रासु समता संसाधनीया। अस्माकं दिनचर्यायां जीवनशैल्याञ्च समता संरक्षणीया। अनेनास्माकं मानसिकशारीरिका-ध्यात्मिकशक्तेः विकासः भवेत्। एवमस्माकं शक्तौ

[14] महाभारतम्-अनु. - २०४.८६
[15] विष्णुस्मृतिः – ६४
[16] मनुसंहिता – ४/६३
[17] सुश्रुतसंहिता – पृ.२५९
[18] धर्मसिन्धुः - ३. पू.आह्निकम्
[19] मनुसंहिता – ४/१४४
[20] मार्कण्डेयपुराणम् – ३४-५२ पृ.३२०
[21] आपस्तम्भधर्मसूत्रम् – १/१
[22] स्कन्धपुराणम् – ७-२५५-२७

ISSN : 2583-2271
Vol. - I, No. 1: 2021

विकाशितायां सत्यां व्याधिसंक्रमणभयं न जायते। व्याधिग्रस्तोऽपि मानवः मानसिकशक्त्या यदि सुदृढः स्यात् तर्हि तस्य पीडा क्षीणा स्यात्। उच्यते च "आधिस्तु मानसो व्याधिः"[23]। शारीरिकशक्तिबृद्ध्या शरीरे रोगप्रतिषेधकशक्तेः प्रभावेण सहसैव मनुष्यशरीरं व्याधिग्रस्तं नैव भवेत्। एवञ्चाध्यात्मिकशक्तियुक्तोऽपि मानवः नाचिरेण व्याधिग्रस्तः भवेत्। एतदतिरिच्य सामाजिकदूरत्वमुखावरणधारणादिसर्वकारविहितम् अनुशासनं सतर्केण सह सततम् अस्माकं पालनीयम्। कायमनोवाक्यैः स्वच्छता अवलम्बनीया। साम्प्रतिके काले भारतसर्वकारप्रचलितं **स्वच्छता-मिशन** इत्यायोगस्योद्देश्यम् अस्माभिः सर्वैः सान्तरिकं सश्रद्धं च सफलं कर्त्तव्यम्। परिवेशसंरक्षणेन सह प्रदूषणमुक्तं पर्यावरणं कर्त्तव्यम्। उच्यते – **यत्र यत्रैव स्वच्छता तत्र तत्रैवेश्वरस्य वासः**। अतः यदि सर्वत्रैवेश्वरस्य वासः सम्भवेत् तर्हि नैव कदापि कोरोनासंक्रमणभयं स्यादपितु स्यात् केवलं देवानामिव मानवानामपि सुखं निरामयममृतञ्च जीवनम्। यतोहि "क्लेशकर्मविपाकाश्यैरपरामृष्टः पुरुषविशेष ईश्वरः"[24]। यथार्थेणोच्यते प्राचीनमनीषिभिः "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः"[25]। इति शम्।

**सहायकग्रन्थसूची**


- आयुर्वेदस्येतिहासः, धर्मग्रन्थष्टोर, कटक, ओडिशा, १९९५
- आपस्तम्भधर्मसूत्रम्, चौखम्बाप्रकाशनम्, वनारस, उत्तरप्रदेशः।
- उपनिषद् परिचयः, किताबमहल, ओडिशा, २००२
- गरुडपुराणम्, धर्मग्रन्थष्टोर, कटक, ओडिशा – १९८५
- चाणक्यनीतिः, कोलकाता बुक् डिपो, कोलकाता, २००५
- दक्षस्मृतिः, कोलकाता बुक् डिपो, कोलकाता
- धर्मसिन्धुः, साम्बिदीप्रकाशनम्, पुरी, ओडिशा, २००८
- पद्मपुराणम्, धर्मग्रन्थष्टोर, कटक, ओडिशा, २००२
- मनुसंहिता, कोलकाता बुक् डिपो, कोलकाता, २००६
- महाभारतम्, चौखम्बाप्रकाशनम्, उत्तरप्रदेशः
- मार्कण्डेयपुराणम् , चौखम्बासुरभारती-प्रकाशनम्, २००३
- विष्णुस्मृतिः, किताबमहल, ओडिशा।
- वाधूलस्मृतिः, साम्बिदीप्रकाशनम्, पुरी, ओडिशा, २००५
- स्कन्धपुराणम्, चौखम्बासुरभारती-प्रकाशनम्, २००३
- सुश्रुतसंहिता, किताबमहल, कटक, ओडिशा, २००१
- हलायुधकोशः, संस्कृत बुक् डिपो, कोलकाता, २००५
- हितोपदेशः, ढाका ष्टुडेण्ड्स् लाइब्रेरी, कोलकाता, २००३


[23] हलायुधकोशः – पृ.७६

[24] गरुडपुराणम् – पृ.३०७

[25] पातञ्जलयोगसूत्रम् – १.२४, पृ.२३१

# प्राकृतिकचिकित्सापद्धतिः

**डा.जगमोहन आचार्य:**

**प्रबन्धसारः**

*प्रकृतिं विहाय जीवन न जीवनम्। ऋषयः प्रकृत्याः उपासकाः । एते वैदिकदेवानां परिकल्पनं प्रकृत्याधारेणैव कृतवन्तः। वेदे रोगस्य निराकरणाय विविधानि कौशलानि दृश्यन्ते। जल-वायु-अग्नि-मृत्तिका-सूर्य-चन्द्र-स्पर्श-मन्त्रादिप्रयोगेण वैदिककाले रोगोपशमनं जातम् इति वैदिकमन्त्रत ज्ञायते। वैदिकमन्त्राणाम् अध्ययनतः विविधरोगाणां निवारण कथं भवति? केनोपायेन वा भवति? तेषां सुन्दरम् आलोचनं मिलति। तेषु प्रमुखाः प्रबन्धेऽस्मिन् वर्णिताः। वंशगतरोगः, नेत्ररोगः, पादपीडा, शीर्षकपालव्यथा, हृद्रोगः, अङ्गपीडा, कामलरोगः, हरिमारोगः, गण्डमालरोगः, व्रणः, क्षेत्रियरोगः, यक्ष्मा चेत्यादयः सामान्यतः अत्रालोचिताः। स्पर्शचिकित्सायास्तथा मन्त्रचिकित्सायाः प्रयोगम् ऋषय कृतवन्तः। याः चिकित्साः वैदिककाले ऋषयः कृतवन्तः तासां सर्वासां चिकित्सापद्धतीनां प्रयोगम् अधुनाऽपि कुर्वन्ति वैद्याः। सम्प्रति विश्वं करोनायाः कुप्रभावेन प्रभावितम्। सर्वे प्राकृतिकचिकित्सायाः प्रयोगं कुर्वन्ति अद्य। अतः प्राकृतिकपद्धत्या रोगनिराकरणं तथा आयुर्वर्धकस्य रहस्यं प्रबन्धेऽस्मिन् आलोचितम्।*

### उपक्रमः

ज्ञानेन विज्ञानस्य तथा विज्ञानेन ज्ञानस्य परिप्रकाशः भवति। वेदो भवति ज्ञानस्य विज्ञानस्य च समन्वयरूपः। शरीरं नाम रोगमन्दिरम्। आरोग्यवर्धनाय चिकित्सका भिन्नं भिन्नं प्रयोगं कुर्वन्ति। वेदे रोगस्य निराकरणाय प्रकारकं कौशलं दृश्यते। यद्यपि अथर्ववेदे आयुर्वेदस्योपरि चर्चा अधिका तथापि ऋग्वेदे अन्यत्रापि च रोगकारणस्य रोगनिराकरणस्य चोपरि आलोचयन्ति ऋषयः। प्रकृतिप्रेमिणः ऋषयः प्रकृत्याधारेण जीवनं चालयन्ति। प्रकृतिमादाय सूक्ष्मरहस्यम् उपस्थापयन्ति ऋषयः। जल-वायु-अग्नि-मृत्तिका-सूर्य-चन्द्रस्पर्श-मन्त्रादिप्रयोगेण वैदिककाले रोगोपशमनं जातम् इति मन्त्रतः ज्ञायते। यद्यपि अन्यासां पद्धतीनाम् उल्लेखः दृश्यते तथापि प्राकृतिकपद्धतिः मूलमेव। चरकेण आयुर्वेदस्य लक्ष्यं किमिति स्पष्टं करोति यत्, स्वस्थस्य स्वास्थ्यरक्षणं तथा रोगिणः निरोगीकरणम् आयुर्वेदस्य मूलभूतं कार्यम्। अतः प्राकृतिकपद्धत्या रोगनिराकरणं तथा आयुर्वर्धकस्य रहस्यं प्रबन्धेऽस्मिन् आलोचितम्।

### जलचिकित्साः

जलं अमृतमिति[1]। वेदे अपि आम्नातम्, अप्स्वन्तरमृतमप्सु भेषजम्[2]। यथा माता दुग्धेन शक्तिं संचारयति तथा जलमपि शुद्धं करोति। यजुर्वेदेनोक्तम्, आपो अस्मान्मातरः[3]। जलेन मनुष्याणां तथा मनुष्येतरप्राणिनाम् जीवनं चलति। जलेन आरोग्यकामना क्रियते। तद्यथा,

"अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।
आग्निं च विश्वशंभुवमापश्च विश्वभेषजी॥"[4]

### वंशगतरोगम्

मन्त्रयुक्तेन जलेन रोगः दूरं याति। क्षत्रियरोगस्य कृते आपः अत्यन्तं लाभदायिकाः। क्षत्रियरोगो नाम वंशगतरोगमः। उक्तं च,

"आप इद् वा उ भेषजीरपो अमीवचातनीः।
आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षत्रियात्॥"[5]

जलं जीवनम् इति लोकोक्तिः सुपरिचिता। जलं

---

[1] अमृतमुदकं नाम, निघण्टु,१.१२

[2] अथर्ववेदः,१.४.४

[3] यजुर्वेदः,४.२. ४

[4] ऋग्वेदः, १.२३.१०

[5] अथर्व, ३.७.५

सर्वौषधस्य मूलम् इति ऋषय: उद्घोषितवन्तः। तद्यथा,

आप: विश्वभेषजी:।[6] औषधयः जलेन समाहिता: सन्ति। जलं वहति, एतत्तु तस्य धर्मः। परन्तु जलं शरीरत: रोगमादाय वहतु इति प्रार्थयते ऋषिः। यथा,

"इदमाप प्रवहत यात्किं च दुरीतं मयि।
यद्वाहमभिदुद्राह यद्वा शेष उतानृतम्।"[7]

## नेत्ररोगः पादपीडा च

ऋषि शान्ता आपः शान्तिप्रदायिकाः इति स्वीकरोति। आप: पापनाशिकाः तथा भेषजस्य प्रदायिकाः। हिमालयात् आरभ्य समुद्रं गतवत्या नद्या: जलं दिव्यगन्धयुक्तं भवति। वैद्यराजः नेत्ररोगस्य तथा पादपीडाया: उपशमनार्थं जलस्य प्रयोगं कुर्वन्ति। उक्तं यथा,

"हिमवतः प्रस्रवन्ति सिन्धौ समह संगमः।
आपो ह मह्य तद् देवीर्ददन् हृयित भेषजम्॥"[8]
"यन्मे अक्ष्योरादिद्योत पार्ष्ण्यो प्रपदोश्च यत्।
आपस्तत् सर्वं मिष्करन् भिषजां सुभिषक्तमाः॥"[9]

सर्वेषां हितकारित्वात् जलं मङ्गलमयं तथा पापरक्षाकारि भवति।[10] आरोग्यवर्धिका: आपः इति। सूर्यस्य दर्शनं दीर्घकालं यावत् भवतु इति कामनया ऋषि: अपां स्तुतिं करोति। अर्थात् जलं भवति आरोग्यवर्धकं तथा दीर्घायुःप्रदायकम्। आप: स्तूयन्ते नीरोगाय तथा दीर्घजीवनाय। यथा,

"आप: पृणीत भेषजं वरूथं तन्वेमम।
ज्योक् च सूर्यं दृशे॥"[11]

वैद्यानां मध्ये श्रेष्ठवैद्य: जलमेव। ऋषि: सगर्वं वदति जलमेव अधिकं हितकारि। यथा,

"भिषग्भ्यो भिषक्तरा आ
अच्छा वदामसि।"[12]

[6] ऋग्वेदः,१.२३.२०

[7] ऋग्वेदः,१.२३.२२

[8] अथर्ववेदः,६.२४.१

[9] अथर्ववेदः, ६.२४.२

[10] शं नो भवन्वप ओषधी: शिवाः, अथर्ववेदः,६.२३.३

[11] ऋग्वेदः,१.२३.२१/ अथर्ववेदः,१.६.३

जलं भवति ऊर्जाप्रदायकं तथा रोगस्य शमनकारि। उक्तं यथा,

"घृतैव अप् ऊर्जा प्रदायकः।"[13]

दैवीगुणयुक्ता आपः अस्माकं सर्वसिद्धिप्रदायिका कल्याणकारिण्यः तथा प्रसन्नताप्रदायिकाः। सर्वाकाङ्क्षां पूरयित्वा आप: आरोग्यप्रदायं कुर्वन्ति।

"शं नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभिस्रवन्तु नः।"[14]

जलं सर्वरोगस्य मूलं नाशयति। हितकरभेषजरूपेण स्तुता: आपः। तद्यथा,

"आप इद्वा उ भेषजीरापो अमीवचातनीः।
आपः सर्वस्य भेषजास्तास्ते कृण्वन्तु भेषजम्॥"[15]

## सौरचिकित्सा

शीर्षकपालव्यथा, हृद्रोगः, अङ्गपीडा चेति रोगाः सूर्यस्य रश्मिभि: दूरं यान्ति। यथा,

"शं ते शीर्ण: कपालादि हृदयस्य च यो विदुः।
उद्यन्नादित्य रश्मिभिः शीर्ष्णो रोगमनीनशोङ्गभेदमशीशमः॥"[16]

सूर्यदेवः शक्तेः तथा आनन्दस्य प्रतीकः। सप्तवर्णीरथेन सूर्यदेवः सुशोभित:। उक्तं यथा,

"सप्त त्वा हरितो रथे वहन्ति देव सूर्य।
शोचिष्केशं विचक्षण॥"[17]

सूर्यकिरणानि बहुविधरोगस्य निवारकाणि। ऋषिः प्रस्कण्वकाण्वः सूर्यदेवस्य उदयरश्मिं हृद्रोगस्य नाशनार्थं प्रार्थयति।तथा कामलरोगस्य विनाशाय अनुरुद्धे। तद्यथा,

"उद्यन्नद्य मित्रमह आरोहन्नुत्तरां देवम्।
हृद्रोगं मम सूर्य हरिमाणं च नाशय॥"[18]

[12] अथर्ववेदः,१९.२.३

[13] अथर्ववेदः,३.१३.५

[14] यजुर्वेदः,३६.१२/ अथर्ववेदः,१.६.१

[15] ऋग्वेदः,१०.१३७.६

[16] १अथर्व, ९.८.२२

[17] ऋग्वेदः,१.५०.८ , सामवेदः, ६.५.१४

[18] ऋग्वेदः,१.५०.११

सूर्यस्य तेजः शरीरं पूर्णरूपेण रोगतः दूरं करोति।

"उदगादयमादित्यो विश्वेन सहसा सह।
द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम्॥"[19]

सूर्यः जगतः आत्मरूपेण परिचितः।[20]

**रोगनाशनक्षमता**

सूर्यः यदा उदितो भवति तथा अस्तं गच्छति स समयो भवति रोगनिराकरणस्य उत्कृष्टसमयः। सूर्यस्य रश्मिभिः क्रिमिनाशो भवति। अथर्ववेदे उक्तं यथा,

"उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः।
ये अन्तः क्रिमयो गवि।"[21]

**कीटाणुः**

सूर्यकिरणेन अमीवा (कीटाणुः) तत्कालं नष्टं भवति।[22]

**हृद्रोगः / हरिमारोगः**

अथर्ववेदे ऋषिः ब्रह्मा दृढतया स्पष्टीकरोति सूर्यरश्मिः हृद्रोगस्य तथा हरिमारोगस्य महौषधिः। अतः उदयकालीनसूर्यस्य रश्मिः सदैव ग्रहणीयः।

"अनु सूर्यमुदयतां हृद्योतो हरिमा च ते।
घो रोहितस्य वर्णेन तेन त्वा परि दध्मसि॥"[23]

**गण्डमालरोगः**

सूर्यः तथा चन्द्रः गण्डमालरोगस्य निवारकः। सूर्यः गण्डमालरोगस्य औषधं निर्माति तथा चन्द्रः एतस्य प्रयोगं करोति। सूर्यस्य रश्मिः; तथा चन्द्रस्य किरणेन गण्डमालरोगस्य नाशो जायते। उक्तं यथा,

"अपचितः प्र पतत सुपर्णो वसतेरिव।
सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपिच्छतु॥"[24]

गण्डमालस्य स्वरूपविषये उक्तम् यथा,

"एन्येका श्येन्येका कृष्णैका रोहिणी द्वे।
सर्वासामग्रभं नामावीरघ्नीरपेतन॥"[25]

यज्ञेन कृतं घृताहुतेन गण्डमाल नष्टं जायते। तद्यथा,

"वीहि स्वमाहुतिं जुषाणो मनसा स्वाहा मनसा यदिदं जुहोमि॥"[26]

अथर्ववेदे बहुविधरोगस्य उपशमनस्य कारणं सूर्यस्य रश्मिः। शिरोवेदना, कर्णशूलः, मुखस्रावः, नेत्रान्धता, सर्वाङ्गपीडा, कफः, श्वासः, न्युमोनिया, हृद्रोगः, रक्तचापः, कामलरोगः, उदरपीडा, मुत्ररोगः, गुप्तरोगः प्रभृतीनां शमनं सूर्यस्य किरणेन सम्भवति।

**मृत्तिकाचिकित्सा**

❖ **विषनाशनम्**

अथर्ववेदे सौराष्ट्री नामिकाया मृत्तिकायाः वर्णनम् आयाति, या विषचिकित्सायाः महौषधिः। सौराष्ट्रीमृत्तिकायाः लेपनेन, सेवनेन, पानेन, स्नानेन च विषक्रियाया समाप्तिर्भवति।[27] ऋग्वेदे आम्नातम् उपजिह्विका मृत्तिकायाः लेपनेन, सेवनेन, पानेन, स्नानेन च विषनाशो भवति।[28]

❖ **केशचिकित्सा**

अद्यत्वे केशस्य घनत्वसम्पादनार्थं तथा वर्धनार्थं मृत्तिकायाः प्रयोगो भवति। वेदे अस्य प्रमाणं मिलति। यथा,

"देवी देव्यामधि जाता पृथिव्यामप्योषधे।
तां त्वा नितत्नि केशेभ्यो दृंहणाय खनामसि॥"[29]

❖ **काशः**

शुष्ककाशस्य निराकरणं रेहिलमृत्तिकया भवति।[30]

---

[19] ऋग्वेदः,१.५०.१३

[20] ऋग्वेदः,१.११५.१

[21] अथर्ववेदः,२.३ २.१

[22] अपामीवां सविता साविषत्, ऋग्वेदः,१०.१००.८

[23] अथर्ववेदः,१.२२.१

[24] अथर्ववेदः,६.८३.१

[25] अथर्ववेदः, ६.८३.२

[26] अथर्ववेदः,६.८३.४

[27] अथर्ववेदः,४.७

[28] ऋग्वेदः,८.१०२.२१

[29] अथर्ववेदः, ६.१३६.१

[30] अथर्ववेदः, ६.१०५

ISSN : 2583-2271
Vol. - I, No. 1: 2021

❖ **व्रण:**

व्रण: कृष्णमृत्तिकाद्वारा झटिति दूरं याति।[31]

**क्षेत्रियरोगः**

क्षेत्रं लङ्गुलेन कर्षणं भवति। लङ्गुलकर्षणेभ्य उद्गतः मृत्खण्डोद्गम: गन्धः दुरारोग्यक्षेत्रियरोगस्य उपशमं करोति। उक्तमस्ति,

"नमस्ते लाङ्गकेभ्यो नम ईषायुगेभ्यः।
वीरुतक्षेत्रियनाशन्यप क्षेत्रियमुच्छतु॥"[32]

**अग्निचिकित्सा**

अग्नि: ऋग्वेदे तथा अन्यत्रापि बहुत्र स्तुतः। ऊर्ध्वगमनशील: अग्निः सदा यजमानस्य हिताय गतिशीलः। शैत्यस्य निवारणाय अधुनापि अग्नि: स्तूयते। यजुर्वेदे उक्तं , अग्निर्हिमस्य भेषजम्।[33]

**यक्ष्मा**

अग्नेः ज्वाला रोगं दूरं नयति। यथा अश्वः शीघ्रं धावति तथा अग्निः तस्य धूमेन यक्ष्मारोगं शीघ्रं दूरं नयति। यज्ञाग्निद्वारा रक्तपरिष्करणं भवति। उक्तं यथा,

"न तं यक्ष्मा अरुन्धते नैनं शपथो अश्नुते।
यं भेषजस्य गुल्गलो: सुरभिर्गन्धो अश्नुते॥"[34]

**स्पर्शचिकित्साः**

मन्त्रोच्चारणेन यथा जिह्वावाण्योः मेलनं भवति तथैव दशाङ्गुलिविशिष्टहस्तेन सह रोगस्य मिलनेन रोगमुक्तिः भवति। अर्थात् हस्तस्य स्पर्शेण रोगमुक्तिः भवति। उक्तं यथा,

"हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि॥"[35]

**मन्त्रचिकित्सा**

अथर्ववेदे आम्नातमस्ति यत् अत्रिः, कण्वः, जमदग्निः, अगस्तिः प्रभृतय ऋषय: मन्त्रोच्चारणेन अशुभान् तथा रोगवर्धकान् क्रिमीन् नाशयन्ति। तद्यथा,

"अत्रिवत् व: क्रिमयो हन्मि कण्वज्जमदग्निवत्।
अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन्॥"[36]

मन्त्रोच्चारणेन समूलं विनाशं यान्ति क्रिमयः। परिवेशत: अपि मन्त्रशक्तिद्वारा क्रिमय: नष्टं यान्ति। तद्यथा,

"हतासि अस्य वेशस्य हतास: परिविशतः।
अथ ये क्षुल्लका इव सर्वे ते क्रिमयो हताः॥"[37]

**उपसंहारः**

आद्यनादितत्त्वस्य सारः वेदः। वेदोक्तः प्रयोग: अद्यापि प्रचलति। सूर्यस्य रश्मिं स्वीकर्तुं उपदिशन्ति अद्यापि वैद्याः। जलचिकित्सा आधुनिकसमयस्य श्रेष्ठा चिकित्सा। अद्यापि सन्ति बहव: ये दैवीशक्तिद्वारा रोगनिवारणं कुर्वन्ति। संगीतश्रवणेन मनस: दुःखं दूरीभवति। तन्नाम वेदे दर्शितं चिकित्साविज्ञानम् अद्य न त्यजन्ति चिकित्सकाः। अद्यत्वे वैदिकचिकित्सा-विज्ञानस्य महत्त्वं सर्वैः अङ्गीकरणीयमेव।

**सहायकग्रन्थाः**


- ऋग्वेदसंहिता, श्रीरामशर्माआचार्यः, शान्तिकुञ्ज, हरिद्वारम्
- अथर्ववेदसंहिता, श्रीरामशर्माआचार्यः, शान्तिकुञ्ज, हरिद्वारम्
- ऋग्वेदसंहिता, सायणभाष्यसहितम्
- अथर्ववेदसंहिता, सायणभाष्यसहितम्
- सामवेदसंहिता, श्रीरामशर्माआचार्यः, शान्तिकुञ्ज, हरिद्वारम


[31] अथर्ववेदः, २.३.४-६

[32] अथर्ववेदः. २.८.४

[33] यजुर्वेदः,२३.१०

[34] अथर्ववेदः, १९.३८.१-२

[35] ऋग्वेदः,१०.१३७.७

[36] अथर्ववेदः, १.३२.३

[37] अथर्ववेदः, १.३२.५

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# वैदिकभाषायामुपसर्गाणां व्यवहारः

**ड. गगनचन्द्रदे**


## प्रबन्धसारः

*संस्कृतसरस्वत्या वेदमयी वाणी, देववाणी, आदिभाषा इत्यादीनि नामानि सन्ति। संस्कृतभाषायामादिमा ग्रन्था वेदा निबद्धाः सन्ति। "आदौ वेदमयी दिव्या" इति महाभारतवचनानुसारं संस्कृतभाषा "वेदमयी वाणी" इत्युच्यते। "देवीं वाचमजनयन्त देवाः" (ऋ.सं.-८/१००/११) इति ऋग्वेदीयमतानुसारम् इयं भाषा "दैवी वाणी" इत्यप्युच्यते। भाषाया द्विविधं रूपं भवति- लौकिकभाषारूपं वैदिकभाषारूपञ्च। पाणिनीयव्याकरणशास्त्रे लौकिकानां वैदिकानाञ्च शब्दानां विवेचनं क्रियते इति पतञ्जलिना महाभाष्ये प्रतिपादितम्। संहिताकाले लोकभाषास्वरूपं किमासीदिति स्पष्टतया न किञ्चित् वक्तुं पार्यते।*

*संस्कृतभाषायां सम्पूर्णशब्दराशिर्नामाख्यातोपसर्गनिपातभेदेन चतुर्धा विभक्तो दृश्यते। ऋग्वेदसंहितायां पदविभागस्य बलवत्तरं प्रमाणमुपलभ्यते। तद्यथा-*

*"चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।*
*गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ (ऋ.सं.-१/१६४/४५)*

*संस्कृतवाङ्मयस्य विविधशास्त्रेषूपसर्गशब्दो नानाविधेष्वर्थेषु व्यवहारो दृश्यते। शुक्लयजुर्वेदस्य प्रस्तावनायामुव्वटाचार्येण प्रतिपादितम्। यत्-"अथ विंशतिरुपसर्गाः क्रियाविशेषकरा इति सामान्यतोऽर्थः। विशेषार्थास्त्वनन्ता एव। महाभाष्ये पतञ्जलिना उक्तम्-*

*"को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्।" (म.भा.-२/१/१)*

*वैदिकभाषायामुपसर्गाणां व्यवहारः कीदृशः परिलक्ष्यते? अर्थात् (१) वैदिकभाषायामुपसर्गाणां प्रयोगः, (२) वैदिकभाषायां पादपूरणार्थका उपसर्गाः, (३) वैदिकभाषायां वीप्सामूलका उपसर्गाः, (४) वैदिकभाषायां प्रादयो भिन्ना उपसर्गाः, (५) वैदिकसाहित्ये धात्वर्थे उपसर्गाणां प्रयोगः इत्यादि विषये प्रबन्धेऽस्मिन् आलोच्यते।*


भाषासङ्कटकतत्त्वानां सङ्कलने, उच्चारणे, निर्धारणे, संख्याने च यादृशी तत्त्वबुभुत्सैकतानता दृश्यते वैदिकवाङ्मया-र्णवे, न तादृशी अभिनिवेशिनी तत्त्वदृष्टिः अवलोक्यतेऽन्यासु भारोपीयासु भाषासु। महाकविकालिदासेनोक्तं यत् –

"स वृत्तचूलश्चलकाकपक्षकै-
रमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत्॥"[1] इति

पद्धतिमधिकृत्य आधुनिकभारोपीयभाषा- सरिन्मुखेन वैदिकवाङ्मयार्णवं प्रवेष्टुमवगाहितुं वा पार्यते। खीष्टशताब्दीतोऽष्टसहस्राब्दीतः प्राक् प्रवाहितो वैदिकवाङ्मयार्णवः प्राच्याधुनिकभारोपीय-भाषामयीषु धारासु शतधा विभज्यमानोऽप्यजस्त्ररूपेण स्वकीयां मौलिकीं स्रोतोवहतां प्रख्यापयति संस्कृतभाषामुखेन। एवंविधायां संस्कृतभाषा-यामाविष्कृताः सर्वा ज्ञानशाखाः स्वीयामात्मोपलब्धिं प्रथयन्ति वैदिकसाहित्ये। पारिषत्कृतेरपि शब्दसाध्व-साधुविज्ञानस्य, अर्थराशेः, सङ्कोचविस्तरस्य,

[1] रघुवंशमहाकाव्यम् - ३/२८।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

वर्णागमस्य, वर्णविकारस्य, वर्णनाशस्य, वर्णविपर्ययस्य, धात्वर्थस्य, धात्वर्थातिशयस्य च तत्त्वपार्यवसानिको निर्णयस्तत एवोररीक्रियते। वस्तुत: सर्वविद्यायां निर्णयानां कृते श्रुतिस्तु स्वत: प्रमाणभूतैव।

संस्कृतभाषायां सम्पूर्णशब्दराशिः नामाख्यातोपसर्गनिपातभेदेन चतुर्धा विभक्तो दृश्यते। ऋग्वेदसंहितायां पदविभागस्य बलवत्तरं प्रमाणमुपलभ्यते। तद्यथा –

"चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥"[2]

निरुक्तकारेण प्रतिपादितम् "कतमानि तानि चत्वारि पदानि – नामाख्यातोप-सर्गनिपाताश्चेति वैयाकरणाः।"[3] महाभाष्य-कारेण तदेव समर्थितम्। यत् – "चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च"[4]। तत्र उद्योतकारेण प्रतिपादितं यत् – "नामाख्यातेति - नामशब्देन सुबन्तं, नमत्याख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्तेः। आख्यातं तिङन्तम्। उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन"[5]।

संस्कृतवाङ्मयस्य विविधशास्त्रेषु उपसर्गशब्दस्य नानाविधेष्वर्थेषु व्यवहारो दृश्यते। उप + सृज् + घञ् = उपसर्गः। उपसृज्यते इत्युपसर्गः। अथवा उपसृजतीत्युपसर्ग इति व्युत्पत्तिः। आचार्यसायणाचार्येण ऋग्वेदभाष्ये उक्तम् - "प्रागुपसृजत आख्यातपदस्येत्युपसर्ग:"[6] इति। दुर्गाचार्य्यस्त्वन्यथैव व्याकरोति उपसर्गशब्दं निरुक्तव्याख्यायाम् "उप उपगृह्य आख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः"[7] इति। नाट्यशास्त्रेऽपि उपसर्गशब्दस्य व्युत्पत्तिर्भाषाशास्त्र-सम्मता दृश्यते –

"प्रातिपदिकार्थयुक्ता धात्वर्थानुपसृजन्ति ये स्वार्थे।
उपसर्गा ह्युद्दिष्टास्तस्मात्संस्करतस्तस्मिन्॥"[8]

अर्थात् प्रातिपदिकार्थसहिता एत उपसर्गा धात्वर्थान् स्वार्थे उपसृजन्ति अतिरिक्तमर्थविम्बं प्रोद्भावयन्त्युत्पादयन्ति वा। प्रमाणयति च व्याख्यामिमाम् अभिनवगुप्ताचार्यः "धात्वर्थानुपसृजन्ति उपरागेणान्यादृशान् कुर्वन्ति। तेनोपरागेण प्रातिपदिकार्थस्य युक्तसम्बन्धे प्रकरोतीति हि शब्दः" इति। निरुक्तस्य महेश्वरव्याख्यायामुपसर्गशब्दो व्याख्यातुकामेन महेश्वरेणोक्तम् "उपेत्य नामाख्यातयोरर्थस्य विशेषं सृजन्ति उत्पादयन्ति इत्युपसर्गा:[9] इति।

**उपसर्गः** – "धातोः पूर्ववर्त्तिविंशति-संख्यकप्राद्यव्ययम्। यथा – प्र, परा, अप्, सम्, नि, अव, अनु, निर्, दुर्, वि, अधि, सु, उत्, परि, प्रति, अभि, अति, अपि, उप, आङ्। अस्य प्रमाणम् –

"निपाताश्चादयो ज्ञेया उपसर्गास्तु प्रादयः।
द्योतकत्वात् क्रियायोगे लोकादवगता इमे॥"[10]

उव्वटाचार्येण प्रतिपादितं यत् – "अथ विंशतिरुपसर्गाः क्रियाविशेषकरा इति सामान्यतोऽर्थः। विशेषार्थास्त्वनन्ता एव"[11] इति। शौनकोऽपि बृहद्देवतायां वक्ति यत् –

"उपसर्गास्तु विज्ञेयाः क्रियायोगेषु विंशतिः॥

---

[2] ऋग्वेदसंहिता - १/१६४/४५।

[3] निरुक्तम् - १३/९॥

[4] महाभाष्यम् पस्पसाह्निकम् – पृ.३।

[5] महाभाष्यम् पस्पसाह्निकम् उद्योतः – पृ.३१।

[6] ऋग्वेदसंहिता – सायणभाष्यम् - १/१६४/४५।

[7] निरुक्तम्-दुर्गाव्याख्या - १/१/३।

[8] नाट्यशास्त्रम् - अभिनवगुप्तव्याख्या - १४/२६।

[9] निरुक्तम्-महेश्वरव्याख्या - १/१/३।

[10] शब्दकल्पद्रुमः-प्रथमकाण्डः – पृ.२३१।

[11] शुक्लयजुर्वेदस्योव्वटाचार्यप्रस्तावना।

विवेचयन्ति ते त्वर्थो नामाख्यात-विभक्तिभिः॥"[12] अर्थात् क्रियायागे उपपन्ना उपसर्गा विंशतिः, किन्तु तेषामर्थास्त्वनन्ता एव। यतो हि नामाख्यातविभक्तिभिस्तैर्नवनवा अर्था उद्भाव्यन्ते। अत एव पतञ्जलिना उक्तम् – "को हि नाम समर्थो धातुप्रातिपदिकप्रत्यय-निपातानामर्थानादेष्टुम्"[13]। उपसर्गः त्रिधा। यथा – "धात्वर्थं बाधते कश्चित्"। यथा आदत्ते। "कश्चित्तमनुवर्तते" यथा - प्रसूते। "तमेव विशिनष्ट्यन्यः" यथा – प्रणमति। "उपसर्गगतिस्त्रिधा"[14]। अपि च मुग्धबोधटीकाकार-दुर्गादासेन उक्तम् –

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
नीहारहारसंहारप्रतीहारप्रहारवत्॥"[15]

**(क) वैदिकभाषयामुपसर्गाणां प्रयोगः**

१) "ते प्राग्धातोः" (१.४.८०), २) "छन्दसि परेऽपि" (१.४.८१), ३) "व्यवहिताश्च" (१.४.८२) अर्थात् उपसर्गा धातोः प्राक् प्रयोक्तव्याः। प्राक् प्रयोगे प्राप्ते छन्दसि परेऽप्यभ्यनुज्ञायन्ते। न च परेषां प्रयुज्यमानानां संज्ञाकार्यं किञ्चिदस्ति। केवलं परप्रयोगेऽपि क्रियायोग एषामस्तीति ज्ञाप्यते। व्यवहिताश्च गत्युपसर्गसंज्ञकाः छन्दसि दृश्यन्ते।

**१. छन्दसि पूर्वप्रयोगस्योदाहरणम्। यथा**

(i) प्रयाह्यच्छतो यविष्ठा। प्र + या = प्रयाहि। ऋग्वेदः - 10.1.7

(ii) यथा नकुलो विच्छिद्य संदधात्यहिं पुनः। सम् + धा = संदधाति। शौनकीयसंहिता – 6.139.5 (iii) यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा।अव + यज् = अवयजामहे। माध्यन्दिसंहिता – 3.45 (iv) तद्धेदमृभवो नानुगच्छथ। अनु + गम् = अनुगच्छथ। ऋग्वेदः - 1.161.11

(v) उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः।आ + भा = आभाहि। ऋग्वेदः - 1.48.9

(vi) अपो वसाना दिवमुत्पतन्ति। उद् + पत् = उत्पतन्ति। ऋग्वेदः - 1.164.47

(vii) न ते गिरो अपि मृष्ये तुरस्य।अपि मृष् = अपिमृष्ये। कौथुमसंहिता – 2.1799

(viii) प्रजानन् यज्ञमुप याहि विद्वान्त्स्वाहा॥ उप या = उपयाहि। माध्यन्दिनसंहिता – 8.20

(ix) यस्य द्यावो न विचरन्ति मानुषम्। वि चट् = विचरन्ति। कौथुमसंहिता – 1.373

(x) ज्यावाजं परिणयन्त्याजौ। परि णी = परिणयन्ति॥ ऋग्वेदः - 3.33.24

**२. छन्दसि परप्रयोगस्योदाहरणम्। यथा**

(i) क्रतुं वृञ्जन्त्यपि वृत्रहत्ये। वृज् + अपि = वृञ्जन्त्यपि। ऋग्वेदः - 6.3.2

(ii) येना हंसि न्याउत्रिणं तमीमहे। हन् + नि = हंसि नि। कौथुमसंहिता – 1.394

(iii) इन्द्रस्य वोचं प्रकृतानि वीर्या। वच् + प्र = वोचं प्र। ऋग्वेदः - 2.21.3

(iv) परैणान्देवः सविता ददातु परा। दा + परा = ददातु परा॥ शौनकीयसंहिता – 8.3.16

(v) हन्ति रक्षो बाधते पर्यरातिम्। बाध् + परि = बाधते परि। कौथुमसंहिता – 1.540

(vi) यजत्येव द्विषो देवानामव द्विषः। यज् + अव = यजति अव। शौनकीयसंहिता – 20.67.1

(vii) वयो न सीदन्नधि बर्हिषि प्रिये। सद्ट + अधि = सीदन्नधि। ऋग्वेदः - 1.85.7

(viii) याभिरिन्द्रमनयन्नत्यरातीः। नी + अति =अनयत् अति। माध्यन्दिनसंहिता - 10.1

(ix) यमदीषामदो मनस्तदैतूप मामिहा। इ + उप = एतु उप। शौनकीयसंहिता – 19.52.4

(x) मायाविनं वृत्रमस्फुरन्निः। स्फर् + निस् = अस्फुरत् निस्। ऋग्वेदः - 2.11.9

**३. छन्दसि व्यवहितप्रयोगस्योदाहरणम्। यथा**

---

[12] बृहद्देवता – २/९/६।

[13] महाभाष्यम् – २/१/१।

[14] जैनशाकटायनीयधातुपाठः – १२।

[15] मुग्धबोधव्याकरणम्-दुर्गादास – पृ.१९।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

(i) उप ये त्वा गृणन्ति वन्हयः। उप + गृ = उप... गृणन्ति। ऋग्वेदः - 1.48.12

(ii) वि होत्रा दधे वयुनाविदेक इन्मही। वि + धा = वि...दधे माध्यन्दिनसंहिता - 5.14

(iii) परित्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। परि + धी = परि धीमहि। शौनकीसंहिता – 8.3.22

(iv) कुवितमस्य प्र हि व्रजं गोमन्तं दस्युहागमत्। प्र + गम् = प्र.......गमत्॥ ऋग्वेदः – 6.45.24

(v) याश्च ते हस्त इषवः परा ता भगवो वप। परा + वप् = परा...वप। माध्यन्दिनसंहिता – 16.9।

(vi) सं त्वा दधामि पृथिवीं पृथिव्या। सम् + धा = सं.........दधामि। शौनकीयसंहिता – 12.3.23।

(vii) अन्वेनं विप्रा ऋषयो मदन्ति। अनु + मद् =अनु......मदन्ति। ऋग्वेदः - 1.162.7।

(viii) निर्गा अकृन्तदोजसा। निर् + कृत = निर......अकृन्तत्। कौथुमसंहिता – 1/585।

(ix) आ च परा च चरति। आ + चर् = आ.......चरति। शौनकीयसंहिता – 7.9।

(x) अभि त्वा पूर्वऽपीतये सृजामि सौम्यं मधु। अभि + सृज् =अभि......सृजामि। ऋग्वेदः - 1.19.9।

**(ख) वैदिकभाषायां पादपूरणार्थका उपसर्गा:**

"प्रसमुपोद: पादपूरणे" (8.1.6) एषां द्वे स्त: पादपूरणे (सि.कौ.) प्र सम् उप उद् इत्येतेषां पादपूरणे द्वे भवतः, द्विर्वचनेन चेत् पाद: पूर्यते। लोके श्लोकचरणपूर्णतायां त्वादयः प्रवर्त्तन्ति। यथा – "तु हि च स्म ह वै पादपूरणे"[16]। परन्तु प्र सम् उप उद् एते उपसर्गाः प्रयागाभावात् भाषायामनर्थकं स्यात्। पादपूरणार्थे यथा –

(i) प्रप्रायमग्निर्भरतस्य शृण्वे। (ऋ. 7.8.4)।

(ii) संसमिधुवसे वृषन्। (ऋ.10.191.1)।

(iii) उपोप मे परा भृश। (ऋ.1.126.7)।

(iv) किं नोददु हर्षसे दातवा उ। (ऋ.10.176.2)।

(v) प्रप्रक्षयाय पन्यसे जनाय। (कौथुमसंहिता – 2.935)।

(vi) उदुत्ते मधुमत्तमा गिरस्तोमास ईरत। (मैत्रायणीसंहिता – 1.3.39)।

(vii) उपोप ह वा एनं पशवो यान्ति नापयन्ति य एवं वेद। (मौत्रायणीसंहिता - 4.2.8)।

(viii) सं सं स्रवन्तु पशव: समश्वा: सम पुरुषा॥ (शौनकीय संहिता – 2.263)। एवंप्रकारेण "प्र"उपसर्गस्य द्वाविंशतिस्थलेषु, "सम्" उपसर्गस्य अष्टसु स्थलेषु, "उप" उपसर्गस्य चतुर्दशस्थानेषु, "उद" उपसर्गस्य त्रिषु स्थलेषु सूत्रानुसारं प्रयोगो दृश्यते।[17]

पादपूरण इति किम्? प्रदेवं देव्या धिया (ऋ. - 10.176.2)। अत्र पादपूर्णत्वात् न दित्वकार्यम्।

**(ग) वैदिकभाषायां वीप्सामूलका उपसर्गाः**

वैदिकसंहितास्वेतादृशा उपसर्गाणां व्यवहारो दृश्यन्ते। यस्तेषां स्वतन्त्रपदसामर्थ्यमथ च स्वतन्त्रार्थसामर्थ्यं क्रियानिराकाङ्क्षत्वेन, नामनिराकाङ्क्षत्वेन चाभिव्यक्तं भवति। वैदिक संहितायाम् एकस्यैवोपसर्गस्याभ्यासेन वीप्सया प्रयोगो अवलोक्यन्ते। यथा –

(i) अधोऽधः (नीचैर्नीचैः) – "अध" इत्युपसर्ग ऋग्वेदे वीप्सया प्रयुक्तः। तथा हि मन्त्रः – "अधा शधीत निर्ऋतेरुपस्थेऽधेनं वृका" इति (ऋ.सं.10.95.14)। अस्मिन् मन्त्रेऽधशब्दोऽर्थभूयस्त्वायाभ्यस्तः। यथा – "अध + अध + शी(ङ्) - स्वप्ने।अधोऽध: शयीत – भूमौ शयीत इत्यर्थः।

(ii) अपाप (उत्कृष्टतयापोहति)। ऋग्वेदे "अप" इत्यस्याभ्यासो दृश्यते। यथा – अपाप शक्रस्ततनुष्टिमूहति तनूशुभं मघवा यः कवासख" इति (ऋ.स.- 5.34.3)। अप + अप + उह (वितर्के) = अपापोहति = अत्युत्कृष्टतयापोहति। इत्यर्थः।

[16] अमरकोषः-अव्ययवर्गः – पृ.४४४।

[17] पाणिनीय वैदिकसूत्रमीमांसा – पृ.५६९।

(iii) अभि + अभि = अभ्यभि (पौनःपुन्येन) छन्दसि "अभि" इत्यस्याभ्यासो बहुबोपलभ्यते। यथा – "अभि त्वा गोतमा गिरा जातवेदो विचर्षणे द्युम्नैरभि प्रणानुमः" इति (ऋ. - 1.78.1)।अत्र स्कन्दस्वामिनोक्तं यत् - "अभि" इत्युपसर्गः "प्रणोनुम" इत्याख्यातेन सम्बध्यते।अभि अभि प्रणोनुमः। यत्र पौनःपुन्येनोपसर्गाभ्यासः, तत्र तत्सम्बन्धिनः क्रियापदस्याप्यभ्यासो द्रष्टव्यः।अभिप्रणोनुमः, अभि प्रणोनुमः इति। अत्र स्कन्दाचार्यो निर्दिशति यद् उपसर्गाभ्यासादख्यातस्याप्यभ्यासः कर्त्तव्योऽर्थभूयस्त्वाय।

(iv) परा + परा = परापरा (अत्यन्तपरा) - अत्यन्तदूर्ध्ववर्तिनी इत्यर्थः। ऋग्वेदे परा इत्यपुसर्गस्याप्यभ्यासोऽवलोक्यते। यथा – मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्" इति (ऋ.सं.- 1.38.6)। युष्मत्प्रसादादेव दूरवर्तिनीत्यर्थः" इति।

## (घ) वैदिकसाहित्ये प्रादयो भिन्ना उपसर्गाः

वैदिकवाङ्मये उपसर्गसंख्यासीमा-निर्धारणे महदन्तरायभूतार्थातिशययोगाज-धृक्षेव। अत्राधस्तात् केचनैतादृशाः "उपसर्गाः क्रियायोगे" इति परिभाषाऽनुविद्धा अनुस्यूताश्च वैदिकोपसर्गाः प्रस्तूयन्ते, येषां प्रयोगा निरुक्तादनु स्थगितप्रायाः, किन्तु वैदिकसाहित्ये तु ते उपसर्गत्वेनामृष्टा व्याख्यातृभिर्व्याख्याताश्च। यथा –

(i) अपाक् (अधोगमनार्थे) – "एवैवापागपरे सन्तु दूढयो" (ऋ.सं. - 10.45.7) अत्र अपाक् शब्द उपसर्गरूपेण प्रयुक्तः। सायणाचार्येण उक्तम् – अपरे अपाक् सन्तु, अधोगन्तारो भवन्तु इति। अपाक् + अस् (भुवि) = अपाक् सन्तु।

(ii) अरम् (वारणार्थे)। हविष्मन्तो अरंकृतः (ऋ.सं.- 1.14.5) सायणाचार्येण प्रतिपादितम् – अरंकृतः - अलंकुर्वन्तीत्यरंकृतः। परवर्त्तिकाले संस्कृतसाहित्ये तु अलम् इति निपातो व्यवह्रियते। तथाहि - अरम् = कृ (करणे) =अरंकृतः) अलंकृतः = भूषित इत्यर्थः। दृश्यते च वैदिकरेफध्वनेर्लौकिक-संस्कृतभाषायां लत्वम् र् > ल, यथा – रघुः, रघ्वी > लघ्वी चेति।

(iii) अर्वाक् (अभिमुखार्थे) – यथा - अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिवा मदाय" इति (अ.वे.-20.9.2) विशेषतो गम्, भू, पत्, कृ, प्रभृतिभिर्धातुभिः सह अस्योपसर्गता दृश्यते।

(iv) आशु (शीघ्रार्थे) – "आयर्ददाशुर्वाजेभिराशुषाणाः" इति (ऋ.सं.- 1.147.1)। "आशु + षण (संभक्तौ = आशुषाणाः - शीघ्र संभक्तारः। एवमेव आप, त्रै, प्रभूतिभिरिति धातुभिः सह आशुशब्द-उपसर्गत्वेन प्रत्युक्तः। तैत्तिरीयसंहितायां भट्टभास्करेणोक्तम् - आशुपसर्गस्य अक्षरयोः स्थानविनिमयः॥

(v) कुवित् (बह्वर्थे)। "मन्त्रं वोचेम कुविदस्य वेदत्" (ऋ.सं. - 2.35.2)।

(vi) ज्योक् (चिरार्थे) - ज्योगभुवन्ननुधूपितासो हत्वी तेषामाभरा नो वसूनि" इति (ऋ.सं.- 2.31.10)।

(vii) न (अतिशयार्थे) - देवो भुवन्नवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत्" (ऋ.सं. - 4.23.4)।

(viii) पुरु (बह्वर्थे) – "क त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदब्भस्वान्" इति (ऋ.सं.- 6.63.1)।

(ix) पुरस् (अग्रगमनार्थे, सत्कारार्थे च) – " श्रद्दोवा अदधतागच्छसुरोधां य एवं विद्वान्" इति (तै.सं.- 7.4.1)।

(x) मा (निषेधे, अङ्गीकारे च) मा इति शब्दो यद्यपि निपातस्तथापि बहुत्रास्य व्यवहारः क्रियानुषङ्गतयोपलभ्यते। लुङ्-लङ्लकारयोरडागमं निषेधयति, तेनापि सिद्ध्यति यदयं वैदिकभाषायामुपसर्गतायाऽपि प्रयुज्यमान आसीत्। तथा च – "इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतत्" (ऋ.सं.- 10.8.4)। अत्र मा शब्द क्रिययाऽनुषक्तव्यः इति अर्थात् क्रियासाकाङ्क्षस्सन् उपसर्गतयाऽस्य व्यवहारः।

(xi) वृथक् (पृथगर्थे) – "यतन्ते वृथगग्नयः" (ऋ.सं.- 8.34.4)।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

(xii) वषट् (देवहविर्दाने) – "स्वाहा देवहविर्दाने श्रौषड वौषट् स्वधा"।

(xiii) शू = (अव्यक्तवाचि) – "यत्त सादे सहसा शूकृतस्य पार्ष्या वा कशया वा तुतोद" इति (ऋ.सं. - 1.62.17)।

(xiv) सना (चिरार्थे) – "आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पति" इति (ऋ.सं. - 10.24.3)।

(xv) सीत् (उच्चशब्दनिर्घोषे) – "मन्द्रा मध्यास्तथा तारा: सप्रपादस्तु सीत्कृतम्" इति। (सिद्धशब्दार्णवः - 254.55)।

(xvi) हुरुक् (कुटिलार्थे) – "महाँ अदब्धो वटुणो हुरुग्यते" इति (ऋ.सं.- 9.77.5)। एवं वैदिकभाषायामेव विमृश्यमाणानामथ च वैदिकमन्त्रेष्वेव लब्धप्रयोगवतां केचनोपसर्गाणां व्यवहारा: अत्रोपलक्षणतयोदाहृताः।

### (ङ) वैदिकसाहित्ये धात्वर्थे उपसर्गाणां प्रयोगः

उपसर्गाच्छन्दसि धात्वर्थे (5.1.118) धात्वर्थविशिष्टे साधने वर्तमानत्स्वार्थे वतिः स्यात्। यदुद्वतो निवत: (ऋ.10.142.4) धातो: प्रागेव प्रायश उपसर्गाः प्रयुज्यन्ते। तत्र धातुर्धात्वर्थः क्रिया, अर्थ: प्रयोजनं यस्य साधनस्य तस्मिन् साधने वर्तमानात् उपसर्गात् स्वार्थे वतिप्रत्ययो भवति छन्दसि विषये। यथा – उद्गत इत्यर्थे, उद् + वति = उद्वतः, निर्गत इत्यर्थे नि + वति = निवतः। एवमुदाहरणं यथा –

(i) आ + वति = आवतः। आवतस्त आवत: परावत: आवतः॥ (शौ. - 5.30.1)

(ii) उद्। वति = उद्वतः। या: प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः। (ऋ. - 7.50.4)

(iii) प्र + वति = प्रवतः। सप्त प्रति प्रवत आशयानम्। (ऋ. - 4.19.3)

(iv) परावति = परावतः।अथो शक्र परावतः। (ऋ. - 3.37.11))

(v) नि+वति = निवतः। योऽस्मत् पाकतर उन्निवत। (तै. - 3.24.411)।

एवं प्रकारेण सूत्रस्यास्य प्रयोगो वेदे चतुर्विंशतिस्थलेषु दृश्यते।[18]

वैदिकभाषाया गवेषणप्रसङ्गे केचनैतादृशा अप्युपसर्गा दृष्टिपथमायाताः, येषां सङ्कलनमाचार्यपाणिनिस्वीकृत-निपाताव्ययेष्वेव दृश्यते। भारतीयवाङ्मयस्य अनुसन्धानेनेदमपि कथयितुं शक्यते यदुत्तरोत्तरम् उपसर्गाणां संख्या तनुतरायते कृशायते वा। वैदिक-साहित्ये निपातोपसर्गाणां चिन्तनमर्थनिर्धारणं च पदविज्ञानदृष्ट्या नावलोक्यते, अपितु द्योतकत्व-वाचकत्वदृशा ते विमृष्टाः। अत एव महामति-पतञ्जलिनापि सङ्केतितं यत् – "उपलब्धौ यत्नः क्रियताम्। महान् शब्दस्य प्रयोगविषयः॥" इति शम्।

ଓଃଃ

## सहायकग्रन्थसूची


- ऋग्वेदसंहिता-अनु•रामेश्वरम,हरफप्रकाशनी, कोलकाता,२०११
- यजुर्वेदसंहिता-अनु•श्रीविजनविहारी गोस्वामी,हरफप्रकाशनी,कोलकाता,२०११
- वैदिकधात्वर्थविचार-प्रो. सत्यदेवनिगमालंकारः, प्रतिभाप्रकाशन, दिल्ली, २०१२
- वैदिकव्यारणम्-भवानीप्रसादभट्टाचार्यः-संस्कृतपुस्तकभण्डारम्,कोलकाता,१९८६
- पाणिनीयवैदिकसूत्रमीमांसा-सत्यदेवनिगमालंकारः, प्रतिभाप्रकाशन, दिल्ली, २००९
- रघुबंशमहाकाव्यम्-सञ्जीवनीटीका-मोतिलाल बनारसी, दिल्ली, २०१०
- अमरकोषः-रामाश्रमीटीका-चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९७३
- महाभाष्यम्-सम्पा•गुरुप्रसादशास्त्री-राष्ट्रिय-संस्कृत-संस्थानम,नई दिल्ली,२००६
- निरुक्तम्-दुर्गाव्याख्या-चौखम्बा सुरभारती प्रकाशन, वाराणसी,१९९५
- शब्दकल्पद्रुमः-राधाकान्तदेवः-राष्टिय-संस्कृत-संस्थानम्-नई दिल्ली,२००६


[18] पाणिनीयवैदिकसूत्रमीमांसा – पृ.३४४।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# व्याकरणशास्त्रे पदविचारः

श्रीमान् सुमन्तचौधुरी

**प्रबन्धसारः**

*जनाः परस्परं मनोगतभावप्रकटनाय वाक्यमेव उत्तममाध्यमरूपेण व्यवहरन्ति। तच्च वाक्यं भवति पदसमष्टिः। पदमाधारीकृत्य वर्तते दार्शनिकानां विविधा विमतिः। नैयायिकैः वृत्तिमत्त्वं पदत्वं, मीमांसकैः आनुपूर्वीविशिष्टवर्णसमुदायवत्त्वं, प्रयोगार्हानन्वितैकार्थबोधकत्वे सति वर्णसमुदायत्वमित्येवं विविधं पदलक्षणं प्रतिपाद्यते। अस्मिन् प्रबन्धे तु पदविषयिणी वैयाकरणचर्चा क्रियते। तत्र पाणिनिमते, भर्तृहरिमते, शृङ्गारप्रकाशकारमते च पदानां विविधा भेदा आलोचिताः। तत्र पाणिनिः सुबन्तस्य तिङन्तस्य च पदसंज्ञां स्वीकृत्य पुनः त्रिभिः सूत्रैः पारिभाषिकपदत्वमालोचितम्। भर्तृहरिः साध्वसाधुभेदेन शब्दस्य द्वैविध्यं स्वीकृत्य पुनः अन्वाख्येयप्रतिपादकभेदेन शब्दस्य भेदद्वयं कल्पितम्। किञ्च, वैयाकरणग्रन्थेषु आलोचिताः मुख्यं, लाक्षणिकं, व्यञ्जकं चेति अन्येऽपि भेदा अत्र दर्शिताः। तदनु शृङ्गारप्रकाशकारदिशा पदानां क्रियारूपं, कारकरूपम्, उपस्काररूपं चेति भेदत्रयं प्रकल्प्य क्रियारूपस्य कारकरूपस्य च षड्भेदाः, उपस्काररूपस्य च पञ्च भेदा उदाहरणपुरःसरं दर्शिताः। अन्तिमे च पदानां विविधभेदेषु सत्स्वपि अर्थवत्त्वं शक्तिमत्त्वं वा पदस्य लक्षणमिति सिद्धान्तितम्।*

## उपोद्घातः

अखिलेऽस्मिन् प्रपञ्चे मनोगतभाव- प्रकाशनाय जनैः वाक्यव्यवहारशैली आदृता। वाक्यं च भवति पदानाम् अनेकेषां संसर्गात्मकम्। अतः भावबोधनाय यथा वाक्यस्य आवश्यकता अस्ति तथैव पदानामपि। पद्यते गम्यते अर्थः अनेनेति पदम्। लोके अर्थबोधनाय यत्प्रयुज्यते तस्य पदमिति संज्ञा। उच्यते तावत् दण्डिना काव्यादर्शे -

"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥"

इदं पदमेव भिन्नेषु शास्त्रेषु भिन्नभिन्नार्थेषु व्यवह्रियते। यथा वेदान्ते पदशब्देन ब्रह्मणो बोधः, सर्वे वेदा यत्पदमामनन्ति इत्यादिश्रुतेः। गान्धर्ववेदे रागविशिष्टा गीतिः पदाभिधेया भवति। वास्तुशास्त्रे पदशब्देन निर्दिष्टपरिमाणविशेषस्य बोधो भवति। ज्योतिश्शास्त्रे तु अयमेव पदशब्दः कालविशेषवाचकः। केचन अवान्तर-वाक्यानामपि पदत्वमङ्गीकुर्वन्ति। तथाहि श्रूयते कश्चिच्छ्लोकः-

"श्लोकपादः पदं केचित् सुप्तिङन्तमथापरे।
परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे॥" इति।

एवं पदशब्दस्य दृश्यते नानार्थेषु प्रयोगः। विभिन्नेषु दर्शनेषु अपि पदमादाय महती चर्चा शास्त्रकारैः विहिता। अस्मिन् प्रबन्धे व्याकरणदिशा पदस्वरूपमालोच्यते।

## पाणिनिमतम्

वैयाकरणाः शब्दं ब्रह्मत्वेन स्वीकुर्वन्ति। तस्य शब्दस्य किं स्वरूपमित्यादिविषये महाभाष्ये पस्पशाह्निके निरूपितम् आचार्यपतञ्जलिना। सिद्धान्तभूतस्य स्फोटरूपशब्दस्य अष्टौ भेदाः वर्णस्फोटादि-रूपेण परिकल्पिताः। अष्टविधस्फोटेषु पदस्फोटः अन्यतमः। वर्णस्फोटस्वीकारेण समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति, प्रतिवर्णमर्थस्मरणस्यानुभव-विरुद्धत्वात्, प्रत्येकं

ISSN : 2583-2271
Vol. - I, No. 1: 2021

वर्णानामर्थवत्त्वे प्रातिपदिकत्वापत्तौ नलोपः प्रातिपदिकान्तस्य इत्यादिभिश्च धनम्, वनम् इत्यादौ नलोपाद्यापत्तेश्च पदस्फोटः अवश्यं स्वीकर्तव्यः। एवं व्याकरणे पदस्य महदावश्यकता वर्तते। पाणिनीयशास्त्रे पदसंज्ञाविधायकानि चत्वारि सूत्राणि सन्ति। तानि तावत् - "सुप्तिङन्तं पदम्" (अष्टा. १-४-१४), "नः क्ये" (अष्टा. १-४-१५), "सिति च" (अष्टा. १-४-१६), "स्वादिष्वसर्वनामस्थाने" (अष्टा. १-४-१७) चेति।

**सुप्तिङन्तं पदम् (अष्टा. १-४-१४) -** सुप् च तिङ् च इति विग्रहे इतरेतरद्वन्द्वसमासे सुप्तिङौ इति रूपम्। सुप्तिङौ अन्ते यस्य इति विग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासे सुप्तिङन्तम् इति रूपम्। द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायेन अन्तपदस्य सुपा तिङा च सम्बन्धो भवति। तेन सुबन्तं तिङन्तमिति लभ्यते। सुबन्तं तिङन्तं च पदसंज्ञं स्यादिति सूत्रार्थः।

अत्र सुपा तिङा च प्रत्याहारस्य ग्रहणम्। सुप् इत्यनेन स्वादिसुबन्ताः एकविंशतिः प्रत्यया (सु, औ, जस्, अम्, औट्, शस्, टा, भ्याम्, भिस्, ङे, भ्याम्, भ्यस्, ङसि, भ्याम्, भ्यस्, ङस्, ओस्, आम्, ङि, ओस्, सुप् चेति) गृह्यन्ते। तिङा च तिबादयः अष्टादशप्रत्ययाः (तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इड्, वहि, महिङ् चेति) गृह्यन्ते। देवः, देवेन, करिष्यति, अकरिष्यत् चेत्यादीनि इहोदाहरणानि।

तथाहि देवशब्दस्य "कृत्तद्धितसमासाश्च" (अष्टा. १-२-४६) इति सूत्रेण प्रातिपदिकसंज्ञायां ततः प्रथमैकवचनविवक्षायां सौ देवः इति रूपम्। अत्र देवः इत्यस्य सुबन्तत्वात् प्रस्तुतसूत्रेण पदत्वं सिध्यति। एवमेव करिष्यति इत्यादीनामपि तिङन्तत्वात् पदत्वं सिध्यति।

ननु सूत्रे सुबित्यनेन कथं प्रत्याहारग्रहणम्, सप्तमीबहुवचनस्य विद्यमानत्वात् तस्य ग्रहणं कस्मान्न भवतीति? चेदुच्यते, **न ङिसम्बुद्ध्योः** (अष्टा. ८-२-८) इति प्रतिषेधात्। सप्तमीबहुवचनस्य सुपो ग्रहणे ङिसम्बुद्ध्योः पदत्वाभावान्नलोपस्य प्राप्तिरेव नास्तीति प्रतिषेधोऽनर्थकः स्यादिति सुबित्यनेन प्रत्याहारस्यैव ग्रहणं स्वीकर्तव्यम्।

पदसंज्ञायां सत्यां **ससजुषो रुः** (अष्टा. ८-२-६६) इत्यनेन रुत्वं, **खरवसानयोर्विसर्जनीयः** (अष्टा. ८-३-१५) इति सूत्रेण विसर्जनीयत्वं, **तिङ्ङतिङः** (अष्टा. ८-१-२८) इति सूत्रेण निघातस्वरः चेत्यादीनां विधानं भवति। किञ्च अस्य सूत्रस्य महदेकं प्रयोजनं भवति लोके शब्दानां प्रयोगार्हत्वसम्पादनम्। उक्तञ्च भाष्यकारेण **अपदं न प्रयुञ्जीत** इति। अर्थात् अपरिनिष्ठितं न प्रयोक्तव्यमिति।

**नः क्ये (अष्टा. १-४-१५) -**अस्मिन् सूत्रे पदद्वयं नः इति प्रथमैकवचनान्तं पदम्, न इत्यत्र अकार उच्चारणार्थकः। क्ये इति सप्तम्येकवचनान्तं पदम्। पूर्वसूत्रात् सुबिति पदमिति च पदद्वयमनुवर्तते। सुबित्यनेन सुबन्तस्य ग्रहणम्। तच्च नकारेण विशिष्यते। प्रत्ययग्रहणेन तदन्तग्रहणमिति परिभाषया अत्र न इत्यनेन नान्तमिति लभ्यते। तेन सूत्रार्थो भवति क्ये परतः नान्तं सुबन्तं पदसंज्ञं भवति इति।

सूत्रे क्ये इति पदेन क्यच् क्यङ् चेति प्रत्यययोः सामान्यग्रहणं, न तु क्यषः, "लोहितडाज्भ्यः क्यष्वचनम्" (अष्टा. ३-१-१३) इति वक्ष्यमाणतया हलन्तात्क्यषः अभावात्।

क्यचि उदाहरणं तावत् राजीयति इति। तथाहि आत्मनो राजानमिच्छतीति "सुप आत्मनः क्यच्" (अष्टा. ३-१-८) इति सूत्रेण क्यचि अनुबन्धलोपे राजन् य इति स्थिते क्यचि परे राजन् इत्यस्य प्रस्तुतसूत्रेण पदत्वात् "नलोपः प्रातिपदिकान्तस्य" (अष्टा. ८-२-७)

ISSN : 2583-2271
Vol. - I, No. 1: 2021

इति सूत्रेण नलोपे, "क्यचि च" (अष्टा. ७-४-३३) इतीत्त्वे राजीय इति जाते तस्य "सनाद्यन्ता धातवः" (अष्टा. ३-१-३२) इत्यनेन धातुसंज्ञायां ततः वर्तमानकालार्थे लटि ततः तिपि विभक्तिकार्ये राजीयति इति रूपम्।

क्यङि उदाहरणं तावत् राजायते इति। तथाहि राजेवाचरतीति "कर्तुः क्यङ् सलोपश्च" (अष्टा. ३-१-११) इति क्यङि, अनुबन्धलोपे राजन् य इति स्थिते क्यङि परे राजन् इत्यस्य प्रस्तुतसूत्रेण पदत्वात् "नलोपः प्रातिपदिकान्तस्य" (अष्टा. ८-२-७) इति सूत्रेण नकारलोपे राज य इति जाते "अकृत्सार्वधातुकयोः" (अष्टा. ७-४-२५) इति सूत्रेण दीर्घे राजाय इति जाते तस्य "सनाद्यन्ता धातवः" (अष्टा. ३-१-३२) इति सूत्रेण धातुसंज्ञायां ततः वर्तमाने लटि तिपि विभक्तिकार्ये राजायते इति रूपम्। अनेन सूत्रेण पदसंज्ञाविधानस्य फलं "नलोपः प्रातिपदिकान्तस्य" (अष्टा. ८-२-७) इति सूत्रेण नलोपविधानम्।

**सिति च (अष्टा. १-४-१६) -** अस्मिन् सूत्रे पदद्वयं सिति इति सप्तम्येकवचनान्तं पदं, चेति अव्ययपदम्। सकारः इत् यस्येति विग्रहे बहुव्रीहिसमासे सित् इति रूपं, तस्मिन् सिति इति। सिति प्रत्यये परतः पूर्वं पदसंज्ञं स्यादिति सूत्रार्थः। अहंयुः, शुभंयुः चेत्यादीनि इहोदाहरणानि। तथाहि अहम् अस्यास्तीति विग्रहे अहम् इति विभक्तिप्रतिरूपकादव्ययाद् "अहंशुभमोर्युस्" (अष्टा. ५-२-१४०) इति सूत्रेण युसि अनुबन्धलोपे अहम् यु इति स्थिते युसः सित्त्वात् तस्मिन् परे अहम् इत्यस्य प्रस्तुतसूत्रेण पदसंज्ञायां "मोऽनुस्वारः" (अष्टा. ८-३-२३) इत्यस्य मान्तस्य पदस्य अन्त्यस्य मकारस्य अनुस्वारे अहंयुरिति रूपम्। एवं शुभंयुरित्यत्रापि ज्ञेयम्। अनया पदसंज्ञया पुरस्तादपवादन्यायेन भसंज्ञाया बाधो भवति। अनेन सूत्रेण पदसंज्ञायां सत्यां "वा पदान्तस्य" (अष्टा. ८-४-५९) , "मोऽनुस्वारः" (अष्टा. ८-३-२३) चेत्यादीनि सूत्राणि प्रवर्तन्ते। अस्य सूत्रस्य प्रयोजनं भसंज्ञाबाधनं, तत्प्रयुक्तकार्यस्य च अभावविधानम्।

**स्वादिष्वसर्वनामस्थाने (अष्टा. १-४-१७) -** कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यादिति सूत्रार्थः। राजभ्याम्, राजभिः, राजता चेत्यादीनीहोदाहरणानि। तथाहि राजन्प्रातिपदिकात् भ्यामि अनुबन्धलोपे राजन् भ्याम् इति स्थिते भ्यामः कप्प्रत्ययावधित्वात् स्वादित्वात् असर्वनामस्थानत्वात् तस्मिन् परे पूर्वस्य राजन् इत्यस्य प्रस्तुतसूत्रेण पदत्वात् "नलोपः प्रातिपदिकान्तस्य" (अष्टा. ८-२-७) इति सूत्रेण नलोपे राज भ्याम् इति जाते ततः संयोगे राजभ्याम् इति रूपं सिद्धम्। अस्य सूत्रस्य फलं जश्त्वकुत्वादिविधानम्।

## भर्तृहरिमतम्

आचार्यभर्तृहरिणा ब्रह्मकाण्डे साध्वसाधुभेदेन शब्दस्य द्वैविध्यं वर्णितम्। एतावुभावपि अन्वाख्येयप्रतिपादकभेदेन भिन्नौ, प्रयोगे तु साधोर्धर्मः, प्रत्ययश्चेत्युभयमपि फलम्, असाधोस्तु प्रत्यय एव फलम्। तथाहि महाभाष्ये उच्यते - "समानायामर्थावगतौ शास्त्रेण धर्मनियमः क्रियते" इति।

**क) अन्वाख्येयपदम् -** अन्वाख्यातुमिष्टः शक्यो योग्यो वान्वाख्येयः, प्रकृतिप्रत्ययरू-पविभागपूर्वकं विविच्याख्यायते यः सः अन्वाख्येय इत्यर्थः। स तु पदं वाक्यं च। रामः, दाशरथिः इत्यादौ रम् घञ् सु, दशन् रथ इञ् सु इति विभागानामन्वाख्यानं व्याकरणेन विधीयते। इमे एवान्वाख्येयाः शब्दाः। वाक्यस्याप्यन्वाख्यानं भवत्येव। अयं कर्ता, इयं क्रिया, इदं च कर्म, अयं व्यापाराश्रयः, इदं फलाश्रयम्, इत्यादि

ISSN : 2583-2271
Vol. - I, No. 1: 2021

अन्वाख्यानं वाक्ये अपि दृश्यते। अतः पदं वाक्यं च अन्वाख्येयम्।

**ख) प्रतिपादकपदम्** - प्रतिपादयन्त्यर्थं ये ते प्रतिपादकाः। ते च वाक्यानि पदानि प्रकृतयः प्रत्ययाश्च। वाक्यं स्वरूपबोधनद्वारा स्वार्थं प्रतिपादयति। पदं स्वार्थं वाक्यार्थं च बोधयति। प्रकृतिः प्रत्ययश्च स्वं स्वमर्थं प्रतिपादयतः। यथा भू इति प्रकृतिः सत्तारूपमर्थं, ति इति वर्तमानकालं, प्रथमपुरुषम्, एकवचनं च प्रतिपादयति। भू ति इति समुदितं भवति इति पदं पदार्थं प्रतिपादयति। एवं वाक्ये अपि। एतत्प्रतिपत्त्युपायभूतं प्रतिपादकत्वं वाक्ये पदे प्रकृतौ प्रत्यये च विद्यत एव। तथापि प्रकृतिप्रत्ययाभ्यां पदं, पदैश्च वाक्यं प्रतिपाद्यं भवतीति, प्रकृतिप्रत्ययौ तु न केनापीति, प्रतिपादकत्वं प्रकृतौ प्रत्यये चैव समुपलभ्यते अतः प्रकृतिप्रत्यययोरेव प्रतिपादकत्व् अभ्युपगम्यते। तथाह्युच्यते वाक्यपदीये -

"अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः॥
कार्यकारणभावेन योग्यभावेन च स्थिताः।
धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु॥"[1] इति।

सामान्यतः वैयाकरणाः पदस्य त्रैविध्यं स्वीकुर्वन्ति - मुख्यं, लाक्षणिकं, व्यञ्जकं चेति।

**१. मुख्यम्** -अभिधावृत्त्या यत्र अर्थस्य निर्धारणं भवति तत् मुख्यं पदम्। तत्पदं त्रिविधं - रूढं, यौगिकं, योगरूढं चेति।

**क) रूढम्** – शास्त्रकल्पितावयवा-र्थभानाभावे समुदायार्थनिरूपितशक्तिमत् रूढम्। यथा मणिनूपुरादि। तथाहि भ्वादिगणपठितात् शब्दार्थकात् मण्धातोः औणादिके इन्प्रत्यये मणिरिति रूपम्। एवमेव स्तुत्यर्थकात् नुधातोः "सम्पदादिभ्यः क्विप्" इति वार्तिकेन क्विपि सर्वापहारलोपे नूः इति रूपम्। अग्रगमनार्थकात् पुर्धातोः "इगुपधज्ञाप्रीकिरः कः" (अष्टा. ३-१-१३५) इति सूत्रेण कप्रत्यये पुर इति रूपम्। नुवः पुरः इति विग्रहे नूपुरः इति रूपम्। उभौ अपि शब्दौ शब्दकर्तृरूपमर्थं स्तुतिसम्बन्ध्यग्रगमनकर्तृरूपं चार्थं न बोधयतः, परन्तु समुदायशक्त्या रत्नविशेषं, अलङ्कारविशेषञ्च बोधयतः। अतः शास्त्रकल्पितानां प्रकृतिप्रत्ययरूपावयवार्थानां प्रतीत्यभावे समुदायेन रत्नविशेषार्थः, अलङ्कारविशेषार्थो वा गम्यते, तन्निरूपितशक्तिमत्त्वात् मणिशब्दस्य नूपुरशब्दस्य वा रूढत्वं सङ्गच्छते।

**ख) यौगिकम्** – शास्त्रकल्पितावयवार्थ-निरूपितशक्तिमद् यौगिकम्। अर्थात् शास्त्रकृत्कल्पितेषु अवयवेषु यः अर्थो वर्तते तन्निरूपितशक्तिमत्पदं भवति यौगिकपदम्। यथा पाचकादिपदम्। तथाहि पाकार्थकात् पच्धातोः कर्तरि अर्थे "ण्वुल्तृचौ" (अष्टा. ३-१-१३३) इति सूत्रेण ण्वुलि अनुबन्धलोपे अकादेशे पाचक इति रूपं सिध्यति। अत्र धातोः प्रत्ययस्य चः यः अर्थः तन्निरूपिता शक्तिर्वर्तते इति हेतोः पाचक इति यौगिकं पदम्।

**ग) योगरूढम्** – शास्त्रकल्पितावयवार्था-न्वितविशेष्यभूतार्थनिरूपितशक्तिमत् योगरूढमिति। अर्थात् शास्त्रकृत्कल्पिता-वयवार्थेषु अन्वितो यो विशेष्यभूतार्थः तन्निरूपिता समुदायबोधकता या शक्तिः तद्वद्भवति योगरूढं पदम्। यथा पङ्कजादिपदम्। अत्र अवयवार्थानां पङ्काज्जायते इत्यादीनां समुदायार्थस्यस्य पद्मरूपार्थस्य च बोधो भवति। तेनात्र शास्त्रकल्पिता-वयवार्थपङ्कजनिकर्तृत्वरूपार्थान्वितपद्मरूप-विशेष्यभूतार्थनिरूपितशक्तिमत्त्वात्पङ्कज- पदस्य योगरूढत्वम्।

एतत्त्रयं विहाय मीमांसकाः अन्यमपि एकं पदं स्वीकुर्वन्ति। तदस्ति यौगिकरूढम्।

---

[1] वाक्यपदीये ब्रह्मकाण्डम्, २४, २५ श्लोकौ।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

शास्त्रकल्पितावयवार्थसमुदायार्थनिरूपितशक्तिमत् यौगिकरूढमिति। अर्थात् येषां पदानां यौगिके अर्थे रूढे चार्थे प्रयोगः पृथक् पृथक् भवति तत् यौगिकरूढम्। यथा अश्वगन्धादिपदम्। अश्वगन्ध इति पदम् ओषधिविशेषे रूढम्, अश्वसम्बन्धिगन्धवत्तया वाजिशालांशबोधे यौगिकम्। एवमेव मण्डपपदं गृहविशेषे रूढं, मण्डपानकर्तरि यौगिकमिति।

**२. लाक्षणिकम्**

लक्षणया जातं लाक्षणिकम्। लक्षणावृत्त्या यत्र अर्थस्य निर्धारणं भवति तल्लाक्षणिकम्। लक्षणा हि स्वशक्यसम्बन्धरूपा। तथाहि अत्र लाक्षणिकत्वेनाभिमतं पदं स्वशब्देन गृह्यते। तेन स्वस्य लाक्षणिकास्यार्थस्य, शक्येन शक्त्योपस्थापितार्थेन सह यः सम्बन्धः सामीप्यादिः स लक्षणा इत्युच्यते। अन्वयानुपपत्तिस्तात्पर्यानुपत्तिर्वा लक्षणाया बीजम्। यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य प्रवाहविशेषे शक्यार्थे घोषस्य अनन्वयात् तात्पर्यानुपपत्तेर्वा लक्षणया तटरूपार्थस्य बोधो भवति। अतः गङ्गापदमत्र लाक्षणिकम्। नागेशभट्टस्तु अप्रसिद्धशक्तिं स्वीकृत्य लक्षणां तत्र अन्तर्भावयति।

**३. व्यञ्जकम्**

व्यञ्जनावृत्तिमत् पदं भवति व्यञ्जकम्। नागेशमते व्यञ्जना हि मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थ-विषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेष इति। शब्दतदर्थपदपदैकदेशवर्णरचना-चेष्टादिषु सर्वत्र व्यञ्जनायाः सत्त्वात् तद्विशिष्टस्य पदस्य व्यञ्जकमिति। व्यञ्जनास्वीकारे एव निपातानां द्योतकत्वं स्फोटस्य च व्यङ्ग्यता हरिणा प्रतिपादिता। द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वमिति।

**शृङ्गारप्रकाशकारमतम्**

शृङ्गारप्रकाशे पद्यते अनेन अर्थ इति विग्रहे पदशब्दं निष्पाद्य तस्य क्रियारूपं, कारकरूपम्, उपस्काररूपं चेति भेदत्रयं प्रकल्पितम्। तेषां विवरणमधस्तात् प्रदीयते।

**क) क्रियारूपं पदम्-** साध्यार्थाभिधायि क्रियारूपम्। तस्यार्थस्तावत् साध्यस्य धातोः व्यापाररूपार्थस्य वाचकं यत् तत् क्रियारूपं पदमिति। षड्विधम् - भावपदम्, कर्मपदं, कर्तृपदं, भावकर्मपदं, भावकर्तृपदं, कर्मकर्तृपदं चेति।

१) **भावरूपम्** - यया क्रियया (तिङा) भावस्य अभिधानं भवति तद्भावरूपं पदम्। यथा पच्यते, अपाचि, पक्ष्यते देवदत्तेन, आस्यते आसि, आसिष्यते भवता चेत्यादीनि उदाहरणानि।

२) **कर्मपदम्** - यया क्रियया (तिङा) कर्म उक्तं भवति तत्कर्मपदम्। यथा पच्यते ओदनः सूदेन, गम्यते ग्रामः पान्थेन, आस्यते मासो भृतकेन चेत्यादीनि उदाहरणानि।

३) **कर्तृपदम्** - यया क्रियया (तिङा) कर्ता उक्तो भवति तत्कर्तृपदम्। यथा पचति चैत्रः, तपति सुवर्णं सुवर्णकारः, सृजते धर्मं धार्मिकः चेत्यादीनि उदाहरणानि।

४) **भावकर्मपदम्** - यस्यां क्रियायां भावः कर्मत्वेन अन्वेति तद्भावकर्मपदमित्युच्यते। यथा इच्छामि भुञ्जीत भवान्, इच्छामि भुङ्क्तां भवान्, पश्य मृगो धावति, स्मरसि देवदत्त काश्मीरेषु वत्स्यामः चेत्यादीनि उदाहरणानि।

५) **भावकर्तृपदम्** - यस्यां क्रियायां भावस्य कर्तृरूपेण अन्वयो भवति तद्भावकर्तृपदमित्युच्यते। यथा चोरस्य रुजति, चोरस्य बाधते, अस्ति गच्छामो वयम्, अस्त्यत्र काश्चिद् गां पश्यति। एवमेव पाको

ISSN : 2583-2271
Vol. - I, No. 1: 2021

वर्तते, अन्वेषणा वर्तते।

**६) कर्मकर्तृपदम्** - यस्यां क्रियायां कर्म कर्तृत्वेन अन्वेति तत् कर्मकर्तृपदमित्युच्यते। यथा रज्यति वस्त्रं स्वयमेव, कुष्यति पादस्स्वयमेव, अवकिरते हस्ती चेत्यादीनि उदाहरणानि।

कृदन्तं क्रियारूपमपि पूर्वोक्तप्रकारेण षड्विधं भवति। इह तैर्यातम्, प्रकृतः कटो भवता, कृतवान् कटम्, क्रियाः क्रियन्ते, पाको वर्तते, भिदेलिमानि काष्ठानि चेत्यादीनि यथाक्रममुदाहरणानि।

**ख) कारकरूपं पदम्** - कारकरूपपदस्य लक्षणं तावत् साधनार्थाभिधायित्वं कारकपदत्वमिति। साधनं नाम क्रियानिष्पादकम्। तदर्थस्य वाचकं यत् तत् कारकपदमिति। एतदपि षड्विधम् - कर्तृपदं, कर्मपदं, करणपदं, सम्प्रदानपदम्, अपादानपदम्, अधिकरणपदं चेति। तेषामपि अवान्तरभेदास्तत्र प्रदर्शिताः।

**ग) उपस्कारपदम्** - उपस्कारो नाम अध्याहारः। साध्यसाधनयोर्भूषणादि-भूतमुपस्कारम् इति उपस्कारपदलक्षणं श्रृङ्गारप्रकाशे। अर्थात् साध्यस्य वा भवतु साधनस्य वा तयोः भूषणाद्यर्थस्फुरणाय यत्पदमध्याह्रियते तत् उपस्कारमतम् इति।

तादृशं पदं पञ्चविधम् - विशेषणरूपं, निपातादिरूपम्, आख्यातादिरूपं, सम्बोधनादिरूपं, हेत्वादिरूपं चेति।

**१. विशेषणरूपम्** - विशिष्यते अनेनेति विशेषणम् इतरस्माद्यावर्तकमित्यर्थः। इदं विशेषणपदं त्रिविधं - क्रियाविशेषणं कारकविशेषणम्, उपसर्गश्च। साधु पचति, भीष्ममुदारं दर्शनीयं कटं करोति, एहि मन्ये रथेन यास्यति चेत्यादीनि यथाक्रमम् अत्रोदाहरणानि।

**२. निपातादिरूपम्** - कर्मप्रवचनीयाः अव्ययानि च। यथा अहं च त्वं च वृत्रहन्, असाम्प्रतं जेतुम् चेत्यादीनीहोदाहरणानि।

**३. आख्यातादिरूपम्** - कृतस्तद्धिताश्च। यथा - रैपोषं पुष्यति, ब्राह्मणवद् ब्रवीति चेत्यादीनि उदाहरणानि।

**४. सम्बोधनादिरूपम्** - सम्बोधनादयः आमन्त्रणमवधिभावो लिङ्गञ्च, यथा- हे देवदत्त, भुक्त्वा व्रजतीति, स इति। सम्बन्धादयश्शेष इति। उपपदम्, सहार्थश्च, यथा- राज्ञः पुरुषः, कुशलं देवदत्तायेति, पुत्रेण सहायात चेत्याद्युदाहरणानि।

**५. हेत्वादिरूपम्** - हेतुर्लक्षणं तादर्थ्यं च। यथा विद्यया यशः, कमण्डलुना छात्रः, यूपाय दारु चेत्यादीनीहोदाहरणानि।

तत्र साध्यार्थाभिधायि भवति क्रियापदं, साधनार्थाभिधायकं कारकपदं, साध्यसाधनयोः भूषणादिभूतं भवति उपस्कारपदम्।

## उपसंहारः

सर्वेषु एव दर्शनेषु पदमाश्रित्य दृश्यते विचारः। दर्शनभेदात् दृश्यन्ते पदानां बहवो भेदाः। एवं पदस्य बहुषु भेदेषु सत्स्वपि अर्थवत्त्वमेव तेषामाधारभूतम्। सर्वेषु एव दर्शनेषु यद्यपि पदस्य लक्षणं भिन्नं भिन्नं दृश्यते, भेदाश्च प्राप्यन्ते पृथक् पृथक् तथापि सर्वत्र अर्थवत्त्वमेव पदत्वमिति निष्कर्ष आगच्छति। यथा श्रृङ्गारप्रकाशे पदस्य बहवो भेदा उल्लिखिताः, परन्तु तत्र पदस्य लक्षणं पद्यते गम्यते अर्थः अनेन इति प्रातिपादितम्। एतेनापि अर्थवत्त्वमेव पदत्वमिति आयाति। एवं मीमांसकानां वा भवतु, नैयायिकानां साहित्यिकानां वा सर्वत्र अर्थवत्त्वमेव पदत्वमिति सिद्धान्तः। वैयाकरणैरपि यद्यपि अर्थवत्त्वं पदत्वमिति स्वीकृतं, "सुप्तिङन्तं पदम्" इति सूत्रात् तथापि तेषां पारिभाषिकमपि पदमस्ति। तदर्थं सूत्रत्रयमपि प्रणीतम्। अर्थवत्त्वं पदत्वमिति स्वीक्रियते चेत् वाक्यादिषु अतिव्याप्तिर्भवतीति कृत्वा दार्शनिकैः पदलक्षणे अर्थवत्त्वम् आधारत्वेन स्वीकृत्य भिन्नं भिन्नं

लक्षणं प्रतिपादितम्। एवं शक्तिमत्त्वं पदत्वमिति पदस्य लक्षणं स्वीकृत्य प्रातिपदिकानां प्रत्ययानाम् उपसर्गाणां निपातानां च पृथक्पदत्वं स्वीकुर्वन्ति तत्रापि धातुना सहितस्य एव उपसर्गस्य प्रयोगः भवति, प्रत्ययानामपि प्रकृतिभिः सह प्रयोगः, लोके तस्मादेव अर्थबोधात्।

एवं शास्त्रेषु स्वस्वसिद्धान्तप्रतिपादनाय अर्थवत्त्वं वा शक्तिमत्त्वं वा पदत्वं स्वीक्रियते। परन्तु तेन उपसर्गादीनां ग्रहणसम्भवे अपि धातुभिः सहैव तेषां प्रयोगः इत्यलमतिविस्तरेण।

**सहायकग्रन्थाः**


- नागेशभट्टः। (२०११)। *परमलघुमञ्जूषा किरणावलीव्याख्योपेता*। दाहालः, लोकमणिः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- भर्तृहरिः। (२००७)। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।
- भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। *वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। *वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। *वैयाकरणसिद्धान्तकौमुदी (तृतीयो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- भोजराजः। (२००७)। शृङ्गारप्रकाशः (प्रथमो भागः)। द्विवेदी, रेवाप्रसादः; द्विवेदी, सदाशिवकुमारः (सम्पा.)। देहली : इन्दिरागान्धिराष्ट्रियकलाकेन्द्रम् कालिदाससंस्थानञ्च।

# श्रीशिवरामेन्द्रसरस्वतीविरचितरत्नप्रकाशदिशा कारके इति सूत्रार्थविचारः

**सुकान्त मान्ना**

**प्रबन्धसारः**

*महाभाष्यप्रदीपव्याख्यानानि इति ग्रन्थः एम्. एस्. नरसिंहाचार्यैः त्रिसप्तत्यधिक-नवदशतमे ईशवीयाब्दे सम्पादितः पण्डिचेरीस्थ-फ्रेन्च-इन्स्टिटिउट्-संस्थाद्वारा प्रकाशितः। अस्मिन् ग्रन्थे महाभाष्यप्रदीपयोः प्रायः नव व्याख्यानानि वर्तन्ते। तेषु महाभाष्यसिद्धान्तरत्नप्रकाशः इत्याख्या व्याख्या विशिष्टा। अस्य ग्रन्थस्य कर्ता श्रीहरिहरेन्द्रभगवत्पादशिष्यः श्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रः। तेषां विषये तथा अधिकं तथ्यं न लभ्यते। युधिष्ठिरमीमांसकानां मते एतेषां कालः १६०० वर्षात् परमस्ति। ततोऽधिकम् एतेषां विषये नोपलभ्यते।*

*इदं व्याख्यानम् अन्येभ्यः व्याख्यानेभ्यः नितरां विलक्षणं वर्तते। व्याख्यानानि सामान्यतः व्याख्येयग्रन्थार्थप्रकाशाय प्रवर्तन्ते। तत्रत्यानां पङ्क्तीनाम् आशयप्रकाशनं कुर्वति क्वचित् मतभेदे सति तम् अंशम् उल्लिखति। किन्तु भाष्यव्याख्याभूतः अयं ग्रन्थः न तथा। अस्य प्रदीपखण्डने एव महती रुचिः। प्रायः प्रतिपङ्क्ति प्रदीपस्य खण्डनमेव दृश्यते। भाष्यपङ्क्त्यर्थं स्वमतानुकूलेन व्याख्याय ततःपरं तद्व्याख्याभूतप्रदीपपङ्क्तीम् उद्धृत्य खण्डयति व्याख्याकारः। अस्मिन् पत्रे मया कारके इति सूत्रविषये तेषाम् आचार्याणां यत् मतं तस्य युक्तायुक्तविचारः क्रियते।*

***दृष्टान्तः***

*कारके इत्यत्र किमिदमिति प्रश्नस्य उत्तरत्वेन भाष्यकारेण उक्तं संज्ञानिर्देशः इति। अर्थात् कारके इत्यनेन कारकसंज्ञानिर्देशः क्रियते। ततः पुनः प्रश्नः कृतः यत्- किं वक्तव्यमेतदिति। तस्य उत्तरं दत्तम्- न हि, इह हि व्याकरणे इत्यादि। किं वक्तव्यमेतद् इति प्रश्नः कुतः उद्भूतः इत्यत्रैव कैयटरत्नप्रकाशकारयोः मतभेदः। कैयटस्य आशयः- यत्र यत्र संज्ञापदनिर्देशः तत्र तत्र प्रथमान्तेनैव निर्देशः दृश्यते इति प्रश्नस्य बीजम्। कारके इति तु सप्तम्यन्तमिति तस्य पृथक् निर्देशः कर्तव्यो न वा इति प्रश्नाशयः। रत्नप्रकाशकारस्य तु एतावत् पर्यन्तं यत्र यत्र संज्ञानिर्देशः तत्र तत्र संज्ञिनिर्देशः। कारके इत्यत्र संज्ञामात्रनिर्देशात् प्रश्नः जायते इति। किं प्रकृतेऽपि संज्ञिनिर्देशः कर्तव्यः न वा इत्येव प्रश्नाशयः इति फलति। किन्तु रत्नप्रकाशकारेण यथा प्रतिपादितं तन्न युक्तमिति मे मतम्। यतो हि भाष्यकारेण न हि, इह हि व्याकरणे इत्यादिना उत्तरेण ज्ञायते यत् प्रश्नस्य आशयः कारके इति संज्ञानिर्देशः इति कथं ज्ञायते इति। संज्ञिनिर्देशः कर्तव्यो न वा इति प्रश्नस्य उत्थापनं तु परं क्रियते भाष्यकारेण। तदेव यदि अस्य आशयः स्यात् तर्हि उत्तरत्र कारके इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः इति युक्तं न स्यात्। अतः कैयटमतमेव प्रकृते युक्ततरं भाति मे। किञ्च प्रथमायाः भाव्यमानविभक्तित्वखण्डनमपि न प्रबलम्। नाभि नभं च इत्यस्य वार्तिकत्वात्।*

## उपोद्घातः

महाभाष्यप्रदीपव्याख्यानानि इति ग्रन्थः एम्. एस्. नरसिंहाचार्यैः त्रिसप्तत्यधिक-नवदशतमे ईशवीयाब्दे सम्पादितः पण्डिचेरीस्थ-फ्रेन्च-इन्स्टिटिउट्-संस्थाद्वारा प्रकाशितः। अस्मिन् ग्रन्थे महाभाष्यप्रदीपयोः प्रायः नव व्याख्यानानि वर्तन्ते। तेषु महाभाष्यसिद्धान्तरत्नप्रकाशः इत्याख्या व्याख्या विशिष्टा। अस्य ग्रन्थस्य कर्ता श्रीहरिहरेन्द्रभगवत्पादशिष्यः श्रीशिवरामेन्द्रसरस्वती-योगीन्द्रः। तेषां विषये तथा अधिकं तथ्यं न लभ्यते। युधिष्ठिरमीमांसकानां मते एतेषां कालः १६०० वर्षात् परमस्ति। ततोऽधिकम् एतेषां विषये नोपलभ्यते।

इदं व्याख्यानम् अन्येभ्यः व्याख्यानेभ्यः नितरां विलक्षणं वर्तते। व्याख्यानानि सामान्यतः व्याख्येयग्रन्थार्थप्रकाशाय प्रवर्तन्ते। तत्रत्यानां पङ्क्तीनाम् आशयप्रकाशनं कुर्वति क्वचित् मतभेदे सति

ISSN : 2583-2271
Vol. - I, No. 1: 2021

तम् अंशम् उल्लिखति। किन्तु भाष्यव्याख्याभूतः अयं ग्रन्थः न तथा। अस्य प्रदीपखण्डने एव महती रुचिः। प्रायः प्रतिपङ्क्तौ प्रदीपस्य खण्डनमेव दृश्यते। भाष्यपङ्क्त्यर्थं स्वमतानुकूलेन व्याख्याय ततःपरं तद्याख्याभूतप्रदीपपङ्क्तीम् उद्धृत्य खण्डयति व्याख्याकारः। अस्मिन् पत्रे मया कारके इति सूत्रविषये तेषाम् आचार्याणां यत् मतं तस्य युक्तायुक्तविचारः क्रियते।

## सूत्रस्य सामान्यः अर्थः

"कारके" इति षड्विधेषु पाणिनीयसूत्रेषु अधिकारसूत्रम्। कारके इति सप्तम्यन्तं पदम्। सप्तम्याः यद्यपि सामान्येन अधिकरणादिषु अर्थेषु विधानं, प्रकृते तु प्रथमार्थे एव सप्तमीति स्वीक्रियते। अर्थात् कारकमित्यस्य योऽर्थः स एव कारके इत्यस्यापि। किं नाम कारकम् इत्यत्र यद्यपि आचार्येषु मतवैविध्यं दृश्यते तथापि करोतीति कारकमिति भाष्यमतानुसारं क्रियानिष्पादकस्य कारकत्वं फलति। कारकमिति महासंज्ञाबलात् इदं सूत्रं संज्ञासूत्रमपि। एवञ्च कारके इति संज्ञाधिकारः इति फलितम्।

## भाष्यस्थस्य किमिदमिति प्रश्नस्य कैयटकृताशयखण्डनम्

"कारके" (पा.सू. १-४-२३) इति सूत्रे भाष्ये आदौ एव भाष्यकारेण प्रश्नः कृतः यत् किमिदमिति। तत्र किमिदमिति प्रश्नस्य आशयं प्रतिपादयति कैयटः-

(१) "सप्तमीनिर्देशान्न तावत् संज्ञात्वेनाधिकारः, संज्ञायाः भाव्यमानत्वेन प्रथमान्तनिर्देशस्य न्याय्यत्वात्। (२) अथ विशेषणत्वेनाधिकारः, तदा कारकाद्दत्तश्रुतयो-रेवाशिषि इत्यादावपादानादिसंज्ञा-विकलस्य अपि कारकस्य ग्रहणं स्यात्। षड्विधस्यैव चेष्यते। तद्यतिरिक्तं च कारकमस्ति, यथा नटस्य श्रृणोतीति प्रश्नः"।

अस्य च अयम् आशयः- (१) तत्र "कारके" इति अधिकारसूत्रम्। कीदृशः अधिकारः इति चेत् संज्ञाधिकारः। पाणिनीयशास्त्रे यत्र यत्र संज्ञानिर्देशः प्रायः सर्वत्रैव प्रथमान्तेन निर्देशः दृश्यते, यथा "वृद्धिरादैच्" इति। प्रकृते वृद्धिरिति संज्ञा विधीयते अथवा भाव्यते। भाव्यमानस्य च प्रथमान्तेनैव निर्देशः कर्तव्यः। अतः वृद्धिः इत्यस्य प्रथमान्तेन निर्देशः कृतः। तथैव "कारके" इत्यत्र यदि संज्ञानिर्देशः तर्हि प्रथमान्तेन निर्देशः कर्तव्यः आसीत् कारकमिति। किन्तु सप्तम्यन्तेन निर्देशः कृतः।

(२) किञ्च "कारके" इति यदि विशेषणत्वेन अन्वेति इति उच्यते अर्थात् कारके इति विषयसप्तमी। तस्य च क्रियायाम् इत्यर्थः। तच्च उत्तरत्र विशेषणत्वेन अन्वेति। तेन क्रियायां यद् ध्रुवं तस्य अपादानसंज्ञा भवति इत्यर्थः इति चेन्न। तथा चेत् कारकाद्दत्तश्रुतयोरेवाशिषि इत्यत्र अपादानादिकारकविशेषात् अन्यत्रापि स्यात्। अर्थात् षष्ठ्यादौ अपि अस्य प्रवृत्तिः स्यात्। यथा नटस्य श्रृणोतीति। अतः कारके इति विशेषणत्वेनापि अन्वेतुं न शक्नोति। अतः कारके इति संज्ञानिर्देशे विशेषणत्वेन निर्देशे च दोषात् कीदृशः अयं निर्देशः इति प्रश्नकर्तुः आशयः इति कैयटः।

रत्नप्रकाशकारः कैयटकृतस्य किमिदमिति प्रश्नकर्तुः आशयस्य सर्वथा खण्डनं कृतवान्। रत्नप्रकाशकारः कथयति- "करोति क्रियामिति कारकं, साधनमित्यर्थः। तत्र प्रथमार्थे व्यत्ययेन सप्तमी। सेयमपादानादिसंज्ञकानाम् अन्वर्था संज्ञाधिकृता। तदेतावदविद्वान् पृच्छति किमिदमिति। कस्य अयं निर्देश इत्यर्थः" इति। अस्यायमाशयः- कारक इति संज्ञाधिकार एव। किन्तु कश्चित् तं विषयम् अजानन् एव पृच्छति कारके इति कीदृशः निर्देशः इति। एवञ्च कस्यचिदज्ञस्य अयं प्रश्नः न तु दोषविदः इति।

ततः परं ग्रन्थकारः कैयटं प्रतिपङ्क्ति उद्धृत्य खण्डयति। यथा - यदुक्तं कैयटेन- सप्तमीनिर्देशात् न तावत् संज्ञात्वेनाधिकारः, संज्ञायाः भाव्यमानत्वेन प्रथमान्तनिर्देशस्य न्याय्यत्वात् इति। तेन एवं खण्डितम्। भाव्यमाना विभक्तिः सर्वदा प्रथमा एव स्यात् इत्यत्र नास्ति नियमः। प्रथमाभिन्नापि विधीयमाना विभक्तिः दृश्यते। यथा "नाभि नभं च"

ISSN : 2583-2271
Vol. - I, No. 1: 2021

इति सूत्रे नाभिशब्दस्य नभादेशः विधीयते। तच्च द्वितीयान्तम्। अतः तत्कारणं न भवितुमर्हति। एवमेव विशेषणत्वेन क्रियापरस्य कारकशब्दस्य अन्वये यदुक्तं "कारकाद्दत्तश्रुतयोः.." इत्यादि तदपि खण्डितम्। यतो हि व्याख्यानतः तत्र विशेषप्रतिपत्तिः भवितुमर्हति। का व्याख्या इति चेत् कारके इति स्वरितनिर्देशात् तस्य अधिकारत्वम्। अधिकारशब्दस्य च भाष्यादौ अधिकं कार्यमित्यर्थः प्रतिपादितः एव। अर्थात् "कारके" इति स्वरितनिर्देशात् कारकसामान्यात् न, अपि तु अपादानादि-कारकविशेषादेव इति अधिकं ज्ञानं भविष्यति। अतः तदपि न कारणं प्रश्नस्य। एवञ्च प्रश्नकर्तुः आशयः यथा प्रतिपादितः कैयटेन सः सर्वथा खण्डितः।

### कारके इत्यत्र प्रथमाभावे कैयटाशयखण्डनम्

कैयटेन प्रश्नकर्तुः यथा आशयः प्रतिपादितः तदनुसारेणैव संज्ञानिर्देशः इति भाष्यस्थोत्तरस्यापि व्याख्यानं कृतम्- "सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः"। अर्थात् "कारके" इत्यत्र संज्ञानिर्देशश्चेत् प्रथमा स्यात्, किन्तु अत्र सप्तमी दृश्यते। तत् कथमिति चेत् प्रकृते सुब्व्यत्ययः अस्ति। अर्थात् "सुपां सुलुक्....." इत्यादिना सु इति प्रथमायाः स्थाने ङि इति सप्तमी अस्ति। अर्थात् तस्या अपि प्रथमार्थ एव। तेन च सञ्ज्ञानिर्देशः सिद्धः। तत्र "सुपां सुलुक्....." इत्यस्य स्थाने सुपां सुपो भवन्तीति वक्तव्यमिति काशिकाकारः। तन्मतमेव कथयति कैयटः सुपां सुपो भवन्तीति इति।

तच्च खण्डितम्। यतो हि कारके इति संज्ञानिर्देशः इह हि व्याकरणे इति भाष्यवचनेनैव ज्ञायते। अर्थात् व्याकरणे तादृशाः शब्दाः प्रयुज्यन्ते, ये लोके प्रसिद्धाः। यथा संख्या, अतीत इत्यादि। अथवा कृत्तिमाः शब्दाः प्रयुज्यन्ते। यथा टि, घु इत्यादि। किन्तु ध्रुवम् इत्यादयः ये शब्दाः, ते न लोके प्रसिद्धाः नापि कृत्तिमाः। तर्हि एते कीदृशाः इति चेत् अन्ततः संज्ञाशब्दाः इत्येव वक्तव्यम्। अतः संज्ञात्वज्ञानार्थं प्रथमान्तनिर्देशस्य आवश्यकता नास्ति। अतः महाभाष्योक्तवचनं तस्य संज्ञात्वप्रतिपादकपरं न तु सुब्व्यत्ययसूचकमिति भावः।

### संज्ञिनिर्देशे प्रदीपरत्नप्रकाशौ

"कारके" इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः इत्यत्रापि प्रदीपरत्नप्रकाशयोः आशयभेदः दृश्यते। किमर्थमयं प्रश्नः इत्यत्र प्रदीपस्याशयस्तावत्- "कारके" इति अधिकारसूत्रम्। तस्य च "ध्रुवमपायेऽपादानमि"त्यादौ अधिकारात् ध्रुवादिकं संज्ञित्वेन लब्धुं शक्यते। तर्हि अयं प्रश्नः कुतः इति चेत् प्रकृते ध्रुवमिति सामान्यं संज्ञी। इष्टं तु विशिष्टः संज्ञी। अर्थात् यत् क्रियायाः साधकं ध्रुवं तस्य कारकमिति संज्ञा इत्येवमेव इष्टम्। अतः साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यमिति प्रदीपाशयः।

रत्नप्रकाशकारस्तु एतत् नाङ्गीकरोति। तेषाम् आशयस्तावत्- "कारके" इति सूत्रात् पूर्वं यानि संज्ञासूत्राणि विद्यन्ते तेषु सर्वेषु संज्ञिनिर्देशः अस्ति। किन्तु प्रकृते नास्तीत्यतः अत्र संज्ञानिर्देशः कर्तव्यः इत्येतावन्मात्रम्।

विशिष्टस्य संज्ञिनः अलाभात् संज्ञिनिर्देशः कर्तव्यः इति आशयः प्रदीपेन स्वबुद्धिकौशलेन प्रतिपादितः इति मे मतम्। अत्र सामान्यः संज्ञानिर्देशः कर्तव्यः, न तु विशिष्टसंज्ञिनिर्देशः। भाष्यकारेण स्वयं तस्य उत्तरं दत्तम्- "साधकं निर्वतकं कारकसंज्ञं भवतीति वक्तव्यमि"ति। एतेन अस्य प्रश्नस्य सामान्यसंज्ञिनिर्देशे एव तात्पर्यं न तु विशिष्टसंज्ञिनिर्देशे इति वक्तुं शक्यते। अतः तावत् दूरचिन्तनम् अत्र न युक्तम् इति मे मतिः। अतः रत्नप्रकाशकारस्य आशयः अत्र युक्ततरः।

### संज्ञिनिर्देशाभावे दोषविचारः

संज्ञिनिर्देशाभावे ग्रामस्य समीपादागच्छतीत्यादौ अकारकस्य ग्रामस्यापि अपादानत्वं स्यात्। कथं ग्रामस्य अपादानता इत्यत्र कैयटस्य आशयस्तावत्- यथा शाखायाः पत्रं पतति चेदपि वृक्षात् पत्रं पततीति व्यवहारः भवति तथैव ग्रामस्य समीपात् यः आगच्छति सः ग्रामादपि आगच्छीति ग्रामस्य अपादानत्वं स्यात्। तदर्थं साधकं कारकमिति संज्ञिनिर्देशः कर्तव्यः।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

संज्ञिनिर्देशे तु ग्रामस्य अकारकत्वात् न अपादानत्वमिति कैयटः।

रत्नप्रकाशकारः अन्यथैव प्रतिपादयति। तेषां मते संज्ञिनिर्देशाभावे ध्रुवमात्रस्य अपादानसंज्ञा स्यात्। अर्थात् अकारकस्यापि ध्रुवस्य अपादानत्वं स्यात्। तेन ग्रामस्य समीपादागच्छतीत्यत्र समीपस्येव ग्रामस्यापि ध्रुवत्वाविशेषात् तस्यापि अपादानत्वं स्यात्। अतः संज्ञिनिर्देशः कर्तव्यः। तेषां मते कैयटोक्तं न युक्तम्। यतो हि कैयटेन यो वृक्षशाखादृष्टान्तः प्रदत्तः तयोः अवयवावयविनोः अभेदेन व्यवहारात् तथा सम्भवति अपि ग्रामसमीपयोः तथाभावात् न युक्तम्।

अस्य समाधानपरभाष्यस्य आशयः प्रदीपेन यथा उपस्थापितः तस्यापि खण्डनं रत्नप्रकाशकारेण कृतम्। एवं प्रायः नवतिप्रतिशतं विशेषतः कैयटस्य आशयम् अयम् आचार्यः खण्डयति।

**समीक्षा**

प्रश्नोत्तरात्मिकया शैल्या रचितं भाष्यम्। तत्र प्रश्नानां कर्ता भगवान् पतञ्जलिः स्वयम् अथवा तच्छिष्यः इति भवितुमर्हति। प्रश्नकर्ता यः कोऽपि भवतु उत्तरं तु भगवता स्वप्रश्नानुसारम् अथवा शिष्यकृतप्रश्नस्याशयम् अवबुध्यैव प्रदत्तम्। यदि केवलं प्रश्नाः एव स्युः तर्हि मादृशाः तदाशयावगतौ समर्थाः नापि स्युः, किन्तु तदुत्तराण्यपि प्रदत्तानि, तेन उत्तरानुसारं वयम् अनुमातुं शक्नुमः यत् तस्य तस्य प्रश्नस्य आशयः कः इति। रत्नप्रकाशकारेणाधिकतया कैटककृतभाष्य-प्रश्नाशयः एव खण्डितः। अतः अयं प्रसङ्गः मयोत्थापितः। यद्यपि सम्पूर्णं ग्रन्थं यदि पश्यामः क्वचिद् कैयटखण्डनस्य अयुक्तत्वात्, तत्खण्डनस्य दौर्बल्यदर्शनाच्च कैयटखण्डनबुध्यैव ग्रन्थकारः प्रवृत्तः इति वक्तुं शक्यते। यथा- "कारके" इत्यत्र "किमिदमि"ति प्रश्नस्य उत्तरत्वेन भाष्यकारेण उक्तं संज्ञानिर्देशः इति। अर्थात् "कारके" इत्यनेन कारकसंज्ञानिर्देशः क्रियते। ततः पुनः प्रश्नः कृतः यत्- "किं वक्तव्यमेतदि"ति। तस्य उत्तरं दत्तम्- "न हि, इह हि व्याकरणे" इत्यादि। किं वक्तव्यमेतद् इति प्रश्नः कुतः उद्भूतः इत्यत्रैव कैयटरत्नप्रकाशकारयोः मतभेदः। कैयटस्य आशयः- "यत्र यत्र संज्ञापदनिर्देशः तत्र तत्र प्रथमान्तेनैव निर्देशः दृश्यते" इति प्रश्नस्य बीजम्। "कारके" इति तु सप्तम्यन्तमिति तस्य पृथक् निर्देशः कर्तव्यो न वा इति प्रश्नाशयः। रत्नप्रकाशकारस्य तु एतावत् पर्यन्तं यत्र यत्र संज्ञानिर्देशः तत्र तत्र संज्ञिनिर्देशः। कारके इत्यत्र संज्ञामात्रनिर्देशात् प्रश्नः जायते इति। किं प्रकृतेऽपि संज्ञिनिर्देशः कर्तव्यः न वा इत्येव प्रश्नाशयः इति फलति। किन्तु रत्नप्रकाशकारेण यथा प्रतिपादितं तन्न युक्तमिति मे मतम्। यतो हि भाष्यकारेण न हि, इह हि व्याकरणे इत्यादिना उत्तरेण ज्ञायते यत् प्रश्नस्य आशयः कारके इति संज्ञानिर्देशः इति कथं ज्ञायते इति। संज्ञिनिर्देशः कर्तव्यो न वा इति प्रश्नस्य उत्थापनं तु परं क्रियते भाष्यकारेण। तदेव यदि अस्य आशयः स्यात् तर्हि उत्तरत्र कारके इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः इति युक्तं न स्यात्। अतः कैयटमतमेव प्रकृते युक्ततरं भाति मे। किञ्च प्रथमायाः भाव्यमानविभक्तित्वखण्डनमपि न प्रबलम्। नाभि नभं च इत्यस्य गणसूत्रत्वात्।

**सहायकग्रन्थाः**


- आचार्युलु के. वि. रामकृष्णः। *भूषणसारतत्त्वप्रकाशिका।* २०१०। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्।
- नागेशः। *लघुशब्देन्दुशेखरः(कारकप्रकरणम्)।* २००२। तेजःपालशर्मा(सम्पा०)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
- पतञ्जलिः। *महाभाष्यम्(हिन्दिव्याख्यासहितम्)।* २००८(तृ.सं)। मीमांसकः युधिष्ठिरः(व्याख्याता)। रेवली : रामलाल कपूर ट्रस्ट।
- पतञ्जलिः। *व्याकरणमहाभाष्यम् (प्रदीपोद्यतसहितम्)।* १९९८। शर्मा शिवदत्तः(सम्पा०)। दिल्ली : चौखम्बसंस्कृतप्रतिष्ठानम्।
- भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (प्रथमाभागः)।* १९६१(प्र. सं)। शर्मा परमेश्वरानन्दः(सम्पा०)। वाराणसी : मोतीलाल वनारसीदास।
- *महाभाष्यप्रदीपव्याख्यानानि (चतुर्थभागः)।* १९७८(प्र.सं)। नरसिंहाचार्यः, एम्. एस्. (सम्पा०)। पण्डिचेरी : फ्रेञ्च इन्स्टिटिउट्।

# न्यायवर्त्मानुसारिव्याख्यानां करणविमृष्टौ प्रभावः

**श्रीजीव-गोस्वामी**


## प्रबन्धसारः

*कार्यमात्रस्य सन्ति नैकानि कारणानि। तेषु कारणेषु एकतमस्य कारणान्तरापेक्षया असाधारणत्वात्करणाभिधानं भवति। किन्तु तस्य करणस्य असाधारणत्वस्य स्वरूपनिर्णये मतवैभिन्न्यात् तत् करणमपि स्वरूपान्तरतां याति। अत्रेदं वाच्यम्, यदिदं प्रसिद्धं "**फलायोगव्यवच्छिन्नं कारणं करणमि**"ति प्राचां वाचा, "**व्यापारवत् कारणं करणमि**"ति च नवानां वाणीति तत्रोच्यते न हि सर्वेषामेव प्रत्नानां नयोऽयं "**फलायोगव्यवच्छिन्नं कारणं करणमि**"ति, परं केषाञ्चनैव। व्यत्ययञ्च उद्योतकरेणोक्तं वार्त्तिकस्थमिदं वच एव साधयति – "**इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणम्**" (न्यायवार्तिकम्) इति। अतस्तेनात्र इन्द्रियस्य प्रमाणत्वाङ्गीकारात् सन्निकर्षरूपव्यापारविशिष्टं करणमेव तदभिप्रेतमित्यनुमानं लघुक्लेशम्। वस्तुतो यत् प्रसिद्धं तस्य पूर्णतो विपरीतम् ईरितं तर्कसङ्ग्रहस्य नीलकण्ठीटीकायाम् "असाधारणं कारणं करणम्" इति।*

*"**व्यापारवत् कारणं करणमि**"त्यस्य व्यापारविशिष्टकारणस्य करणत्वमित्यर्थत्वे घटप्रत्यक्षे घटस्यापि करणता, तत्र घटचक्षुस्संयोगस्य व्यापरत्वात्, तस्य च उभयनिष्ठत्वात्। एवं घटस्य तादृशसंयोगवत्त्वाद् घटेनापि करणेन भाव्यमिति चेन्न, व्यापारसम्बन्धावच्छिन्नकारणताश्रयमेव करणत्वेनात्र विवक्षितम्, तादृशकारणताश्रयं च चक्षुरिन्द्रियमेव भवति, घटस्तु विषयतासम्बन्धावच्छिन्नकारणताश्रयो भवतीति न स करणम्। ननु कोऽत्र व्याख्यानप्रभावः? प्रज्ञावतः सुबोधम् एतत्। कथम् अन्यथा व्याख्यात्रा अवगम्य व्यलेखि, न च मन्दमतीनां गतिरचनाय इति वाच्यम्, यतो **यस्य नास्ति स्वयंप्रज्ञा शास्त्रं तस्य करोति किम्** इति चेदुच्यते, सत्यम्, गम्यं हि तत् मेधाविना, न तु कोमलधिया, न च कश्चन आ जन्मनः कृतविद्यः। पर-नय-पराकरण-पराणां विपक्षीयाणां कर्कश-विचार-करवालैर्यथा न मुकुलमतीनां वादगतिः खण्डिता भवति, यथा च विद्यार्थिबुद्धिः निपुणसरणिर्भवति तद् उद्दिश्यैव ईदृशं सूक्ष्मं विश्लेषणम्।*

*व्यापारवतो व्यापारस्यैव वा करणत्वम् आधिक्येन स्वीकृतम्। तत्र च, यैस्तु फलायोगव्यवच्छिन्नस्य करणत्वमङ्गीकृतं तैरपि व्यापारवाचकपदादुत्तरं तु न तृतीया प्रयुज्यते, किन्तु तद्-व्यापारवद्-वाचकपदादुत्तरम् एव, अत एतद् वक्तुं शक्यते यत् तेषां नये व्यापार एव मुख्यं करणम्, व्यापारवत् च गौणं करणम्, तत्र व्यापारवति धर्मिणि धर्मारोपात् करणत्वमारोप्यते, तद्वाचकात् च पदाद् अतः तृतीया तस्यापि गौणतया करणत्वात्। व्यापारवतः करणत्ववादिनां नये तु एतद्-दृष्ट्या लाघवम्। एतच्च व्याख्यासु करणवाचक-पद-प्रयोगदर्शनत एव भवति सुगमम्।*


## उपोद्घातः

"यमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्" इति न्यायसूत्रानुसारं मोक्षो हि निखिलास्तिक-दर्शनशास्त्रप्रयोजनम्। परमसति शास्त्रार्थबोधे कथं तत्साध्यसाधनम् इत्यतः शास्त्रार्थ-बोधकव्याख्यानामपि प्रयोजनसाधकत्वं भवति। किन्तु शास्त्रगतमेकैकपदमपि भवति बह्वर्थबोधकम्, अतस्तादृशगम्भीरार्थबोधक-पदबहुलशास्त्रव्याख्यानामपि भूयस्त्वम्। इह तु शास्त्रविशेषस्य न्यायस्य विषयविशेषं करणरूपमधिकृत्य विचारलवः प्रस्तुतः।

## प्रयोजनम्

व्याख्यानपदेन हि भाष्यटीकावार्त्तिक-वृत्तिविवृत्यादीनां समेषां भवति ग्रहणम्, तेषां च तात्पर्यबोधकत्वं भवति समानो धर्मः, तद्धर्मसामान्याच्च समेषां व्याख्यानत्वम्। किन्तु तात्पर्यबोधकत्वमिति खलु तात्पर्यस्य निश्चयात्मकज्ञानोत्पादकत्वम्? तच्च व्याख्यानानां क्वचिद् एव तिष्ठति, बहुत्र संशयात्मकं जायते ज्ञानमिति संशयात्मकज्ञानोत्पादकत्वात् कथं तत्र तत्र तेषां व्याख्यानत्वमिति चेन्न, संशयस्य विचाराङ्गतया विचारस्य च निश्चयजनकत्वात् तेषामपि

 ISSN : 2583-2271
Vol. - I, No. 1: 2021

परम्परया निश्चयात्मकज्ञानोत्पाद-कत्वमिति सर्वं भद्रम्। ननु विवक्षितार्थबोधः खलु अपेक्षितः, सति च तस्मिन् व्याख्यानान्यपि अपार्थानि इत्यपि न, पामरमतिषु कदाचिद् यथार्थोऽपि शास्त्रार्थः अयथार्थ इव भाति, अपि च कस्यचित् प्रतिपादितार्थस्य अप्रमापि प्रमा इव प्रतीयते इति तादृशास्थलेषु शिष्यबुद्धिवैशारद्यलक्ष्यक एव व्याख्यातॄणां प्रयास इति बोध्यम्। यथोक्तम् उदयनाचार्येण किरणावल्याम् –

"अतिविरसमसारं मानवार्त्ताविहीनं
प्रविततबहुवेलप्रक्रियाजालदुःस्थम्।
उदधिसममतन्त्रं तन्त्रमेतद्वदन्ति
प्रखलजडधियो ये तेऽनुकम्प्यन्त एते॥"[1]

करणस्वरूपस्य तु निर्णये कृतेऽपि नैकदर्शनेषु अत्र तु न्यायमते कथं तत्स्वरूपं प्रत्यपादि न्यायमतानुसारिव्याख्यासु च कथं तत्स्वरूपप्रकटने विहितः प्रयास इत्येव आलोचयिष्यते। वस्तुतस्तु यद्यपि ग्रन्थकारैः टीकाकृद्भिरेव च तेषां कृतिषु करणस्वरूपं विचारितचरम्, तथापि तत्र तत्र विचारणायां कस्तेषां विशेषः स एवात्र मदीयप्रबन्धविषयः।

**विमर्शः**

कार्यमात्रस्य सन्ति नैकानि कारणानि। तेषु कारणेषु एकतमस्य कारणान्तरापेक्षया असाधारणत्वात्करणाभिधानं भवति। किन्तु तस्य करणस्य असाधारणत्वस्य स्वरूपनिर्णये मतवैभिन्न्यात् तत् करणमपि स्वरूपान्तरतां याति। अत्रेदं वाच्यम्, यदिदं प्रसिद्धं "फलायोगव्यवच्छिन्नं कारणं करणमि"ति प्राचां वाचा, "व्यापारवत् कारणं करणमि"ति च नवानां वाणीति तत्रोच्यते न हि सर्वेषामेव प्रत्नानां नयोऽयं "फलायोगव्यवच्छिन्नं कारणं करणमि"ति, परं केषाञ्चनैव। व्यत्ययञ्च उद्योतकरेणोक्तं वार्त्तिकस्थमिदं वच एव साधयति – "इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणम्"[2] इति। अतस्तेनात्र इन्द्रियस्य प्रमाणत्वाङ्गीकारात् सन्निकर्षरूपव्यापारविशिष्टं करणमेव तदभिप्रेतमित्यनुमानं लघुक्लेशम्। इदञ्च वाचस्पतिवचः तात्पर्यटीकायाम् "इन्द्रियमेव तत्तत्सन्निकर्षादिना साक्षात्प्रमा-हेतुः"[3] इति करणस्य व्यापारवत्त्वरूपमेव समर्थयति। अपि च भाषापरिच्छेदस्य मङ्गलप्रकरणे उक्तमिदं – "विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः"[4] इति तादृशप्रसिद्धिं स्खलयति। वस्तुतो यत् प्रसिद्धं तस्य पूर्णतो विपरीतम् ईरितं तर्कसङ्ग्रहस्य नीलकण्ठीटीकायाम् "असाधारणं कारणं करणम्" इत्यस्य व्याख्यायाम् – "व्यापारवत्त्वे सति इत्यपि वक्तव्यम्। अतश्चक्षुस्संयोगादौ नातिव्याप्तिः। श्रोत्रमनस्संयोगः, शब्दो वा व्यापारः सम्भवत्येवेति न श्रोत्रेन्द्रिये करणलक्षणाव्याप्तिरिति वदन्ति। यद्विलम्बात् प्रकृतकार्यानुत्पादः तत्कारणत्वस्य असाधारणत्वात्मकतया कालादिषु तादृश-कारणत्वाभावान्नातिव्याप्तिः। व्यापारत्वेनाभि-मतेन्द्रियसंयोगादिकम् एव करणम्। अत एव मणिकारैरप्युक्तं *तच्च लिङ्गपरामर्शः* इति ग्रन्थेनेति तु नव्याः।"[5] इति।

"व्यापारवत् कारणं करणमि"त्यस्य व्यापारविशिष्टकारणस्य करणत्वमित्यर्थत्वे घटप्रत्यक्षे घटस्यापि करणता, तत्र घटचक्षुस्संयोगस्य

1 Shivachandra Sarvabhauma. Kiranvali, page - 7

2 Nyayavarttika, page – 14, ed. Tarkatirtha, Amarendramohan, Nyayatarkatirtha, Taranath, 2nd edition 1985, Munshiram Manoharlal Publishers Pvt. Ltd., Calcutta

3 Nyayavarttika-tatparya-tika, page – 17, ed. Tarkatirtha, Amarendramohan, Nyayatarkatirtha, Taranath, 2nd edition 1985, Munshiram Manoharlal Publishers Pvt. Ltd., Calcutta

4 Bhashaparichheda, Page – 8, Visvanatha Nyayapanchanana; Ed. Bhattachacharya Pachanana, 2016 (First published 1970), Mahabodhi Book Agency, Kolkata

5 Nilakantha-Prakashika, Commentry of Tarkasmgraha-Dipika, page – 239, Nilakantha-Shastri; Ed. Vangiya, Sharma, Satkari, 4th edition 2003, Chowkhamba Sanskrita Bhavan, Varanasi

व्यापारत्वात्, तस्य च उभयनिष्ठत्वात्। एवं घटस्य तादृशसंयोगवत्त्वाद् घटेनापि करणेन भाव्यमिति चेन्न, व्यापारसम्बन्धावच्छिन्न-कारणताश्रयमेव करणत्वेनात्र विवक्षितम्, तादृशकारणताश्रयं च चक्षुरिन्द्रियमेव भवति, घटस्तु विषयतासम्बन्धावच्छिन्नकारणताश्रयो भवतीति न स करणम्। अयञ्च परिष्कारो विहितः कारकचक्रे, तर्कसङ्ग्रहदीपिकाया नृसिंहप्रकाशिकाटीकायाञ्च। ननु कोऽत्र व्याख्यानप्रभावः? प्रज्ञावतः सुबोधम् एतत्। कथम् अन्यथा व्याख्यात्रा अवगम्य व्यलेखि, न च मन्दमतीनां गतिरचनाय इति वाच्यम्, यतो **यस्य नास्ति स्वयंप्रज्ञा शास्त्रं तस्य करोति किम्** इति चेदुच्यते, सत्यम्, गम्यं हि तत् मेधाविना, न तु कोमलधिया, न च कश्चन आ जन्मनः कृतविद्यः। पर-नय-पराकरण-पराणां विपक्षीयाणां कर्कश-विचार-करवालैर्यथा न मुकुलमतीनां वादगतिः खण्डिता भवति, यथा च विद्यार्थिबुद्धिः निपुणसरणिर्भवति तद् उद्दिश्यैव ईदृशं सूक्ष्मं विश्लेषणम्। यथा तत्र भवति संशयः व्यापारवन्मात्रस्यैव किं करणत्वमिति? यद्यपि सर्वेषु कारणेषु एव कारणता अस्ति तथापि भिन्नसम्बन्धेन अस्ति, यत्र च सा कारणता व्यापारसम्बन्धेन तदेव करणमिति लक्षणस्य तात्पर्यव्याख्यानम्, अन्यथाव्याख्यानखण्डनम्, शिष्यबुद्धिवर्धनं च इति कर्मत्रयं भवति सम्पादितम्। वस्तुतो व्यापारवत एव करणत्वे तु कर्तुरपि करणतापत्त्या चैत्रश्चैत्रेण पचति, काष्ठं चैत्रेण पचतीत्यादयः प्रयोगाः प्राप्नुयुः। अतो व्यापारे कर्तृव्यापाराधीनत्वं निवेशनीयम्। न च कर्तुश्चेष्टादिरूपव्यापारस्य तदीयकृत्यादिरूप-व्यापाराधीनतया तद्विशेषणदानेऽपि कर्तुः करणत्वं दुर्वारमेव इति वाच्यम्, स्वभिन्नत्वेन कर्तुर्विशेषणीयत्वात्। अन्यथा कुठारादिकरण-कच्छिदादौ दात्रादेरपि स्वरूपयोग्यतया करणत्वापत्तेः। इदञ्च व्युत्पत्तिवादग्रन्थे गदाधरभट्टाचार्येण विश्लेषितम्। व्युत्पत्तिवाद-ग्रन्थस्य तु प्रकरणग्रन्थत्वात् तस्याप्यत्र ग्रहणार्हता।

किञ्च, फलायोगव्यवच्छिन्नस्य कारणस्य करणत्वे का तावद् हानिः यदनुरोधेन तन्मतवर्जनेन व्यापारवत् करणमित्येव ग्राह्यम् इति विचार्यम्। मणिग्रन्थे च सन्निकर्षवादे "विशिष्टप्रत्यक्षे च विशेषणज्ञानं न करणं व्यापाराभावात्"[6] इत्युल्लेखात् फलाव्यवहित-पूर्ववर्तिकारणस्य कथं तावत् न करणत्वमित्यस्य हेतुतया व्यापाराभाव एव प्राप्यते। इदं तु तत्त्वम्, किञ्चित्कार्योत्पत्तौ प्रत्येकं कारणमेव किञ्चिद्-व्यापारविशिष्टं भवति, करणं च व्यापाररहितम् अपि कार्योत्पादकं भवतीति न सम्भवति इत्यत एव फलायोगव्यवच्छिन्नकारणस्य व्यापारवत्त्वा-भावात् करणत्वम् अनङ्गीकृत्य तद्विशिष्टस्य एव व्यापारवत्त्वात् करणत्वम् अङ्गीक्रियते। ननु सर्वं कारणं किञ्चिद्-व्यापारविशिष्टम् इति चेत् व्यापारेणापि व्यापारवता एव भाव्यम्, तस्यापि कारणत्वादिति चेन्न, अनवस्थापत्तेः। मणिकृतामपि अत्रैव स्वरसः। यद्यपि तेन अनुमानग्रन्थस्य आदावेव "तत्र व्याप्तिविशिष्ट-पक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणम-नुमानं तच्च लिङ्गपरामर्शो न तु परामृष्यमाणं लिङ्गमिति वक्ष्यते"[7] इत्यत्र परामर्शस्यैव करणत्वाभिधानात् व्यापारस्यैव करणत्ववादि-त्वमिव तस्य प्रतीयते तथापि परं तेन स्वयम् – "यत्तु व्यापाराभावान्न परामर्शः करणमिति तथैव किन्तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः। न च परामर्शस्य संस्कारो व्यापारः परामर्शस्य च चरमकारणत्वेन संस्कारोत्पाद-नसमये अनुमित्युत्पादनात्"[8] इत्यनेन व्यापारवत एव करणत्वं समर्थितम्। अत एव मथुरानाथतर्कवागीशमहोदयेन तदीयटीकायां स्थलद्वयस्थ-विरोध-सङ्गत्यर्थं मणिग्रन्थारम्भे करणत्वेन उक्तस्य परामर्शस्य व्याप्तिज्ञानम् इत्यर्थः कृतः।

---

6 Kamakhyanatha Tarkavagisha. Tattvachintamani, Pratyakshakhanda, page - 552
7 Kamakhyanatha Tarkavagisha. Tattvachintamani, Anumanakhanda, page - 2
8 Srijivananda Vidyasagar. Tattvachintamani, Anumanakhanda, page - 45

इतश्च अपरं मतम् उद्भावितं भट्टजयन्तेन। फलायोगव्यवच्छिन्नं कारणं करणमिति मतानुसारमेव करणं न किञ्चिद् एकं कारकम्, किन्तु कारकसामग्री एव इति प्रतिपादितम्। कश्चात्र तदीयविशेष इति चेत्, उक्तकरणलक्षणस्य हि सर्वेषु एव कारकेषु भवति सङ्गमनमिति समेषां कारकाणां करणतापत्तिर्भवति, यतः प्रकृतकार्यस्य कारणेषु एकतरस्य अनुपस्थितौ एव फलायोगो भवति, तदुपस्थितिमात्रमेव च स फलायोगो भवति व्यवच्छिन्नः। अतः सर्वाणि कारणानि करणानि भवेयुरिति ईदृशशङ्कावकाशः। तत्र च वस्तुत एकतरस्य कारणस्य अभावात् सामग्र्यभावः, सामग्र्यभावे च कार्याभावः, यत्र च एकतरकारणोपस्थितौ कार्योत्पत्तिस्तत्रापि तत्कारणसमवधानात् कारणसामग्री भवति, सत्यां च सामग्र्याम् एव कार्यम् उत्पद्यते इति सामग्र्या एव फलायोगव्यवच्छेदकत्वात् तस्या एव करणत्वं समुचितमिति भूरिविचारैः शङ्काध्वंसपुरस्सरं संसाधितम्। यथोक्तं तेन – "अविरलजलधरधाराप्रबन्धबद्धान्धकारनिवहे बहुल-निशीथे सहसैव स्फुरता विद्युल्लतालोकेन कामिनीज्ञानमादधानेन तज्जन्मनि सातिशय-त्वमवाप्यते। एवमितरकारककदम्बसन्निधाने सत्यपि सीमन्तिनीमन्तरेण तद्दर्शनं न सम्पद्यते। आगतमात्रायामेव तस्यां भवतीति तदपि कर्मकारकमतिशययोगित्वात् करणं स्यात्, तस्मात् फलोत्पादाविनाभावि-स्वभावत्वमवश्यतया कार्यजनकत्वमतिशयः। स च सामग्र्यामन्तर्गतस्य न कस्यचिदेकस्य कारकस्य कथयितुं पार्यते। सामग्र्यास्तु सोऽतिशयः सुवचः। सन्निहिता चेत् सामग्री, सम्पन्नमेव फलमिति सैवातिशयवती।"[9] इति। भट्टजयन्तस्य इदं तु मतं न समादृतम्।

**उपसंहारः**

अन्तत उच्यते, व्यापारवतो व्यापारस्यैव वा करणत्वम् आधिक्येन स्वीकृतम्। तत्र च, यैस्तु फलायोग-व्यवच्छिन्नस्य करणत्वम् अङ्गीकृतं तैरपि व्यापारवाचकपदादुत्तरं तु न तृतीया प्रयुज्यते, किन्तु तद्-व्यापारवद्-वाचकपदादुत्तरम् एव, अत एतद् वक्तुं शक्यते यत् तेषां नये व्यापार एव मुख्यं करणम्, व्यापारवत् च गौणं करणम्, तत्र व्यापारवति धर्मिणि धर्मारोपात् करणत्वमारोप्यते, तद्वाचकात् च पदाद् अतः तृतीया तस्यापि गौणतया करणत्वात्। व्यापारवतः करणत्ववादिनां नये तु एतद्-दृष्ट्या लाघवम्। एतच्च व्याख्यासु करणवाचक-पद-प्रयोगदर्शनत एव भवति सुगममिति शिवम्।

ശ്ശ

---
[9] Amit Bhattacharya. Nyayamanjari, page - 78

ISSN : 2583-2271
Vol. - I, No. 1: 2021

**सहायकग्रन्थाः**


- Shastri, Dhundhiraja. *Shabdasaktiprakashika.* Banaras: Jai Krishnadas Haridas Gupta, 1934
- Bhattacharya, Amit. *Nyamanjari*. Kolkata: Sanskrit Book Depot, 2006
- Jawaji, Panduranga. *Tarkasangraha.* Bombay: Nirnaya Sagar Press, 1933
- Nyaya-Tarkatirtha, Taranatha. *Nyayadarshanam.* Calcuta: Munshiram Manoharlal Publishers Pvt. Ltd, 1985 (1936-44)
- Vangiya Satkarisharma. *Tarkasangraha.* Varanasi: Chaukhambha Sanskrit Sansthan, 2003
- Tarkavagish, Kamakhyanath. *Tattvachintamani*. Calcuta: The Asiatic Society, 1892
- Sarvabhauma, Shivachandra, *Kiranavali*. Calcuta: The Asiatic Society, 1911
- Mishra, Umesha.*Vyutpattivada*. Allahabad: Dikshit Press, 1953 (1927)
- Paramalaghumanjusha
- Yogindrananda, Swamin. *Chitsukhi*. Kashi: Udasina-Sanskrita-Vidyalaya, 1985
- Vaiyakarana-Bhushana-Sara
- Tarkabhasha
- Tarkavagisha, Phanibhushan. *Nyaya Darshana*. Kolkata: Bangiya Sahitya Parishat, (1346-Bangabda)

# आचार्यरघुनाथदिशा पदार्थतत्त्वसमीक्षणम्

**दीपकगराइ**


## प्रबन्धसारः

*पदार्थस्वीकारे विप्रतिपत्तिर्दृश्यते न्यायवैशेषिकविदुषां मतेषु। तत्र नव्यनैयायिकप्रवराचार्यरघुनाथशिरोमणिस्तु तत्कृतपदार्थतत्त्वनिरूपणग्रन्थे स्ववैदुष्यवैदुर्यप्रभया विप्रतिपन्नमतानि स्पष्टत उल्लिख्य प्राचीनाभ्युपेतपदार्थानां कस्यचितनतिरिक्तत्वं कस्यचित् खण्डनं कस्यचिदतिरिक्तत्वं तर्केण युक्त्या वा व्यवस्थापितम्। प्राग्रघुनाथाचार्यैर्ये पदार्थाः स्वीकृतास्तेषु युक्तिवादिना रघुनाथेन ये पदार्थाः युक्तिसिद्धास्त एव पदार्थाः सिद्धान्तरूपेणोररीकृताः, ये च प्राचीनतन्त्रसिद्धाः किन्तु आचार्यरघुनाथसिद्धान्तानुगुण-प्रतिकूलयुक्तिसमन्वितास्तान् पदार्थान् खण्डयित्वा युक्तिं प्रदर्श्य स्वतन्त्रं प्रतिष्ठापितम्।*

*कुत्रचिच्च, न्यायवैशेषिकतन्त्रासिद्धमीमांसकतन्त्रसिद्धपदार्थास्तथा सिद्धान्ता वा तेनाङ्गीकृताः। यथा पूर्वाचार्यतन्त्रसिद्धास्तथा न्यायवैशेषिकैः पृथक्पदार्थत्वेन प्रसिद्धाः दिक्कालादय आचार्यरघुनाथेन विविधयुक्त्या ईश्वरेऽन्तरीकृतास्तथा न्यायवैशेषिकतन्त्रविरुद्धाः शक्ति-स्वत्व-क्षणप्रभृत्यतिरिक्तपदार्थास्तेनाङ्गीकृताः। दीधितिकारस्तार्किकशिरोमणिराचार्य-रघुनाथस्तु दिक्कालयोः पृथक्पदार्थत्वं नाङ्गीकुरुते। पदार्थसूक्ष्मेक्षणपारङ्गमरघुनाथस्तु तयोः पृथक्पदार्थत्वस्य विविधयत्त्या खण्डनमकार्षीत्। तन्मते तु दिक्कालौ हि ईश्वराभिन्नपदार्थविशेषौ तेन तु नानयुक्तिभिर्दिशि ईश्वरेऽन्तर्भावः कृतः।*

*एवं बहुत्रैव पदार्थतत्त्वविषये आचार्यरघुनाथस्य पृथक् तत्त्वमुपभ्यते। यद्युच्यते आचार्यरघुनाथस्य 'पदार्थतत्त्वनिरूपणम्' इत्यादिबहवो ग्रन्थाः समुपलभ्यन्ते, तेभ्य एव तद्दिशा पदार्थतत्त्वं ज्ञातुं शक्यते तर्हि कथं पुनः व्याख्याने प्रवृत्तिरिति पृष्टस्य पेषणं मृतस्य मरणं यथा इति चेन्न, तत्र पर्यालोचनं यद्यपि दृश्यते किन्तु विस्तारितमालोचनं न दृश्यते तथा न्यायवैशेषिकस्वीकृतपदार्थेभ्यः रघुनाथस्वीकृतपदार्थानां स्वीकारे को लाभः, स्वीकारे का युक्तिः, सा समीचीना न वेति इत्यादिविषये समीक्षणात्मकप्रबन्धो नोपभ्यते। अतः विस्तरशः समीक्षात्मकप्रबन्धं प्रतिपादयितुं ममैष प्रयासः। किञ्च, भविष्यति गवेषकाणां कृतेऽपि मत्प्रबन्धपत्रं सहायकं भवेदिति मन्ये।*


## उपोद्घातः

यद्यपि दर्शनस्य कापि निर्दिष्टसंज्ञा नास्ति तथापि व्युत्पत्त्या दर्शनशास्त्रमभिव्यनक्ति केचित्। तथाहि दृश्यते साक्षात्क्रियते परमात्मादिसंज्ञासंज्ञितः परमपुरुषो येन तद्दर्शनमिति। तेनानया व्युत्पत्त्या एव लभ्यते यद्दर्शनशास्त्रमिदं (चार्वाकदर्शनं व्यतिरिच्य) मूलं परमतत्त्वं परमं चरमं श्रेष्ठं वा पुरुषार्थं प्रापयति। लब्धे परमतत्त्वे दुःखानाम् आत्यन्तिकनिवृत्तिर्भवति। (परमतत्त्वमिदं निःश्रेयसमोक्षापवर्गादि- नाम्नापि प्रथितम्) तथाहि विषयेऽस्मिन् श्रुतिरेव मानं "**दुःखेनात्यन्तं विमुक्तश्चरति**" इति।

परन्तु दुःखानामात्यन्तिकनिवृत्तिः कथं सम्भवेदिति पृच्छायां तु विविधदर्शनेषु विविधोपाय उपवर्णितः। न्यायवैशेषिकनये तु पदार्थतत्त्वज्ञानादेव तत्सम्भवेत्।

परन्तु पदार्थस्वीकारे विप्रतिपत्तिर्दृश्यते न्यायवैशेषिकविदुषां मतेषु। तत्र नव्यनैयायिकप्रवराचार्यरघुनाथशिरोमणिस्तु तत्कृतपदार्थतत्त्वनिरूपणग्रन्थे स्ववैदुष्य-वैदुर्यप्रभया विप्रतिपन्नमतानि स्पष्टत उल्लिख्य प्राचीनाभ्युपेतपदार्थानां कस्यचिदनतिरिक्तत्वं कस्यचित् खण्डनं कस्यचिदतिरिक्तत्वं तर्केण युक्त्या वा व्यवस्थापितम्। प्राग्रघुनाथाचार्यैर्ये पदार्थाः स्वीकृतास्तेषु युक्तिवादिना रघुनाथेन ये पदार्थाः युक्तिसिद्धास्त एव पदार्थाः सिद्धान्तरूपेणोररीकृताः, ये च प्राचीनतन्त्रसिद्धाः किन्तु आचार्यरघुनाथ-सिद्धान्तानुगुणप्रतिकूलयुक्तिसमन्वितास्तान् पदार्थान्

खण्डयित्वा युक्तिं प्रदर्श्य स्वतन्त्रं प्रतिष्ठापितम्। तथाह्युच्यते तेन दीधित्यां—

"विदुषां निवहैरिहैकमत्याद् यददुष्टं निरटङ्कि यच्च दुष्टम्।
मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां
तदन्यथैव॥"[1] इति।

कुत्रचिच्च, न्यायवैशेषिकतन्त्रासिद्धमीमांसकतन्त्रसिद्धपदार्थास्तथा सिद्धान्ता वा तेनाङ्गीकृताः। यथा पूर्वाचार्यतन्त्रसिद्धास्तथा न्यायवैशेषिकैः पृथक्पदार्थत्वेन प्रसिद्धाः दिक्कालादय आचार्यरघुनाथेन विविधयुक्त्या ईश्वरेऽन्तरीकृतास्तथा न्यायवैशेषिकतन्त्रविरुद्धाः शक्ति-स्वत्व-क्षणप्रभृत्यतिरिक्तपदार्थाः तेनाङ्गीकृताः। दीधितिकारस्तार्किकशिरोमणिः आचार्यरघुनाथस्तु दिक्कालयोः पृथक्पदार्थत्वं नाङ्गीकुरुते। पदार्थसूक्ष्मेक्षणपारङ्गमरघुनाथस्तु तयोः पृथक्पदार्थत्वस्य विविधयुक्त्या खण्डनमकार्षीत्। तन्मते तु दिक्कालौ हि ईश्वराभिन्नपदार्थविशेषौ तेन तु नानायुक्तिभिर्दिश ईश्वरेऽन्तर्भावः कृतः। तन्मतं विस्तरशो निगद्यतेऽधस्तात्।

**दिक्कालयोरीश्वरेऽन्तर्भावः**

सांख्यशास्त्रे योगशास्त्रे चापि महादिक् महाकालः इत्येवमखण्डतया कालस्य दिशो वा ग्रहणं न कृतम्। तत्र सांख्यतत्त्वकौमुद्यामाचार्यवाचस्पतिमहोदयेन अगादि—

"कालश्च वैशेषिकाभिमत एको नानागतादिव्यवहारभेदं प्रवर्तयितुमर्हतीति, तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रतिपद्यते, सन्त त एवोपाधयः, येऽनागतादिव्यवहार- हेतवः, कृतमत्रान्तर्गडुना कालेनेति सांख्याचार्याः"[2] इति।

**अत्रायमाशयः-** वैशेषिकतन्त्रसिद्धाखण्डै-कमात्रेण महाकालेन महादिशा वातीतादेर्व्यवहारो हि न सम्भवति। अतः खण्डितकालोपाधिः खण्डितदिगुपाधिस्तैः अवश्यमेव स्वीकार्यः इति। तथा च, तन्निखिलदिगुपाधिभिः तन्निखिलकालो-पाधिभिरेव यतो हि प्राच्यादिव्यवहारक्षणादि-व्यवहारोपपत्तेर्नास्ति महादिग्रूप-महाकालरूप-पृथक्पदार्थान्तरस्वीकारेणेति सांख्याः।

योगशास्त्रे च "स पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति योगसूत्रादवगम्यते यदीश्वरो न हि कालेनावच्छिन्नः। तेन स्पष्टत एव प्रतीयते कालपदेन खण्डकालस्यैव ग्रहणं कृतम्। यतो हि परिछिन्नवस्तु एव अवच्छेदकमुपाधिर्वा भवति, न तु विभुपदार्थः। तेन योगशास्त्रकारेणापि खण्डकालोऽङ्गीकृतः। तदनङ्गीकृते तु इदानीं घटः , तदानीं घटः, भावी घटः इति व्यवहारोऽप्यसम्भवः इति चानिष्टापत्तिः। एवं दिग्विषयेऽप्यूह्यम्। यतो हि पदार्थस्वीकारे तत्प्रतीतिः (अनुभवः) तद्व्यवहार एव मानदण्डरूपः।

एवं वस्तुतः सांख्ययोगादिदर्शनैः प्रभावितः सन्नाचार्यरघुनाथशिरोमणिः महाकालस्य महादिशश्च खण्डनमकरोत्। यतो न्यायशास्त्रे विशेषतो नव्यन्याये पदार्थस्वीकारे तदनुभवस्तज्जन्यव्यवहारश्च प्रमाणनिदानम्। आचार्यशङ्करमिश्रेणापि वैशेषिकसूत्रोपस्कारे केवलं सम्बित् अनुभवो वा पदार्थस्वीकृतौ नियामकः इत्युक्तम्।

दिक्कालावाश्रित्यास्माकं योऽनुभवो व्यवहारो वा भवति तत्तु दिगुपाधिस्वरूपखण्डदिशमाश्रित्य तथा कालोपाधिस्वरूपखण्डकालमाश्रित्यैव भवति। अखण्डं महाकालं महादिशमाश्रित्य तु न किमप्यस्माभिरनुभूयते व्यवह्रियते च। सिद्धान्तलक्षणे जगदीशतर्कालङ्कारेणापि 'इदानीम्' 'तदानीम्' इत्येवं प्रतीतिरूपेण खण्डकालं व्यतिरिच्य महाकालो महादिग् वा न हि अस्मदनुभवसिद्ध इत्यगादि। तथाहि तेनोक्तम् "इदानीं महाकालान्यत्वविशिष्टो घटः, कालोऽयं महाकालान्यत्वविशिष्टघटवान् इत्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छेदेन महाकालान्य-त्वविशिष्टघटवत्त्वात्, अन्यथोक्त-प्रतीत्या खण्डकाल एव विशिष्टघटवत्त्वावगाहने वस्तुमात्रस्यैव

1 तत्त्वचिन्तामणिदीधितिः

2 सांख्यतत्त्वकौमुदी,नारायणचन्द्रगोस्वामी

ISSN : 2583-2271
Vol. - I, No. 1: 2021

महाकालेऽसत्त्वप्रसङ्गाद् इदानीं तदानीमित्यादिप्रतीतिव्यतिरेकेण महाकाल-विषयिण्याः प्रतीतेः स्वरसतः कुत्रापि असत्त्वात्, न चैवं खण्डकालस्याधिकरणत्वे मानाभावः पटध्वंसविशिष्टकालः पटवदन्य इत्यादिप्रतीतेः प्रमात्वानुरोधेनैव खण्डकालस्यापि तथात्वादिति सिद्धान्तानुसारिपन्थाः।"[3] इति।

अत एव स्वातन्त्र्येण महाकालमहादिग्गोचरीभूतप्रतीतिव्यवहारयोरभावात् पृथिव्यादिवत् महादिक् महाकालो न हि अतिरिक्तपदार्थविशेषः इति रघुनाथशिरोमणेरभिप्रायः। किञ्च, यदि 'इदानीम्' 'तदानीम्' इत्यादिप्रतीतिविषयः खण्डकालो महाकालरूपेण स्वीक्रियते चेत्तदा 'इदानीं घटोऽस्ति' 'तदानीं घटो नासीत्' इति प्रतीतिर्नोपपद्येत, इदानीमपदवाच्यमहाकाले घटस्य वर्तमानत्वात् तदानीम्पदवाच्यमहाकाले घटवृत्तित्वाभावासम्भवात्। ननु इदानीं घटोऽस्तीत्यादिप्रतीतिविषयो महाकालः सत्त्वेऽपि शुद्धमहाकाल उक्तप्रतीतेरविषयः परं सौरक्रियारूपोपाधिविशेषपरिछिन्नमहाकाल एव तादृशप्रतीतिविषय इति प्राचीनैराक्षिप्यते चेन्मैवम्, सौरक्रियाविशिष्टमहाकालः इदानीं तदानीम् इत्यादिप्रतीतिविषय इति स्वीकारापेक्षया सौरक्रियारूपकालोपाधिरेव तादृशप्रतीतेर्विषयस्तस्य समीचीनत्वात्।

अपि च, प्राचामनुसारं कालो दिक् यथा विभुपदार्थः तद्वदीश्वरोऽपि। "प्राच्यां घटः प्रतीच्यां घटः" तथा "इदानीं घटोऽस्ति तदानीं घटो नासीत्" इत्यादिप्रतीत्यनुरोधेन व्यवहारानुरोधेन वा दिशः कालस्य स्वीकारे तादृशविनिगमनाविरहादीश्वरस्य विभुत्वेन तस्मादेव तादृशप्रतीत्युत्पत्तिसम्भवाद् अधिकपदार्थानस्वीकारेण लाघवाच्च दिशः कालस्य नातिरिक्तपदार्थत्वमिति रघुनाथशिरोमणेः अभिमतम्। तथाहि तेनोक्तं "दिक्कालौ नेश्वरादतिरिच्यते मानाभावात्। तत्तन्निमित्त-विशेषसमवधानवशादीश्वरादेव तत्तत्कार्य-विशेषाणामुपपत्तेः। परेषाम् एकैकस्माद्दिगादेः इव विलक्षणानां प्राच्यादिव्यवहाराणामिति"[4] इति। तथाहि प्राचीनैर्यद् दिक्कालयोरतिरिक्तत्वमङ्गीकृतं तन्न युक्तिसिद्धं तयोस्तदतिरिक्तत्वे मानाभावाद् इत्यर्थः। किञ्च, न चात्र दिक्त्वं पक्षतावच्छेदकीकृत्य अतिरिक्तत्वाभावसाधने सिद्ध्यसिद्धिभ्यां व्याघात इति वाच्यम्। प्राच्यां दिशि घट इति प्रतीतिविषयीभूतविभुत्वस्यैव दिक्त्वरूपत्वात्। न च कालत्वं पक्षतावच्छेदकीकृत्य अतिरिक्तत्वाभावसाधने तद्दोषतादवस्थ्यमिति वाच्यम्। इदानीं घटोऽस्ति तदानीं घटो नासीत् इति प्रतीतिविषयीभूतविभुत्वस्यैव कालत्वरूप-त्वात्। विभुत्वञ्च मूर्तेतरद्रव्यत्वं न तु परममहत्परिमाणरूपम्। ईश्वरात्मनि तस्य निराकरिष्यमाणत्वेन विभुत्वाभावापत्तेः। ननु दिक्कालयोरतिरिक्तत्वानभ्युपगमे पूर्वस्यां घट इदानीं घट इत्याद्यनुगतप्रतीत्यनुपपत्तिः, अपि चेश्वरादेव तथा प्रतीतिनिर्वाह इति न वाच्यम्, प्राच्यां घटः प्रतीच्यां घट इत्यादेरिदानीं घटस्तदानीं घट इत्यादेश्च वैलक्षण्यानु-पपत्तेरीश्वरस्यैकत्वादिति चेन्मैवं, तत्तन्निमित्तविशेषसमवधानवशात् तत्तत्कालो-पाधितत्तद्दिगुपाध्यवच्छिन्नात् तत्तत्कार्य-विशेषाणां प्राच्यां घटः इदानीं घट इत्यादिप्रतीतिसम्भवात्। कालस्य दिशः चैकत्वाद्यथा तत्तदुपाध्यवच्छिन्नाभ्यां ताभ्यामेव प्राच्यां घटः प्रतीच्यां घट इत्यादेरिदानीं तदानीं घट इत्यादेश्च वैलक्षण्यनिर्वाह इति कालदिशोरतिरिक्तत्ववादिन आक्षेपं कुर्वन्ति चेत्तत्रैवं प्रत्यवतिष्ठते आचार्यरघुनाथ-शिरोमणिः तत्तदुपाध्यवच्छिन्नादीश्वरादेव तादृशप्रतीतीनां वैलक्षण्यनिर्वाह इति। तदुक्तं तेन-- "तत्तन्निमित्तविशेषसमवधानवशादी-श्वरादेव

---

3 सिद्धान्तलक्षणम्

4 पदार्थतत्त्वनिरूपणम्, पृष्ठा-३

तत्तत्कार्यविशेषाणामुपपत्तेः"[5] इति। एवं नैयायिकप्रवराचार्यरघुनाथशिरोमणिना दिक्कालयोः पदार्थातिरिक्तत्वं विविधयुक्त्या खण्डयित्वा तयोरीश्वरेऽन्तर्भावः कृतः।

**आकाशस्यापीश्वरेऽन्तर्भावः**

न्यायवैशेषिकदर्शने आकाशं द्रव्यान्यतमपदार्थविशेषम्। तच्चैकं विभु, विभुत्वाच्च नित्यम्। किञ्चाकाशत्वमेकव्यक्ति-मात्रवृत्तित्वान्न जातिः, तच्चाखण्डोपाधिः इत्यवमन्तव्यम्।

प्राचीनतन्त्रानुगुणं शब्दसमवायिकारण-पुरस्कारेण पृथिव्याद्यष्टद्रव्यातिरिक्ताकाश-रूपविलक्षणद्रव्यमाचार्यरघुनाथशिरोमणिना नाङ्गीकृतम्। यतो हि ईश्वरो जन्यमात्रं प्रति निमित्तकारणम्, शब्दस्य जन्यगुणत्वात् तत्प्रत्यपि निमित्तकारणमङ्गीकार्यम्। अत ईश्वरनिष्ठशब्दकारणता उभयवादिसिद्धा , तेन चेश्वरो यथा शब्दस्य निमित्तकारणं तद्वत् समवायिकारणत्वमपि ईश्वरे कल्पनीयम्, आकाशस्य शब्दसमवायिकारणत्वे मानाभावात्। तदुक्तं रघुनाथेन "शब्दनिमित्त-कारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायि-कारणत्वम्"[6] इति।

प्राचीना यद्येवं ब्रूयुर्यद् ईश्वरो यथा चेतनस्वरूपवद् विभुपदार्थस्तद्वज्जीवात्मापि, अतो जीवात्मैव शब्दसमवायिकारणं भवतु इति चेन्न , गौरवात्। तथाहि जीवात्मा यदि शब्दसमवायिकारणं स्यात्तदा तत्र समवायित्वं कारणत्ववच्चोभयमेव कल्पनीयम्। परमीश्वरे तु कारणता प्रागेवोभयवादिसिद्धा, तत्र केवलं समवायित्वकल्पनानिबन्धेन लाघवाद् ईश्वरे एव शब्दसमवायिकारणत्वं सिद्धम्। तदुक्तं श्रीरघुदेवन्यायालङ्कारेण पदार्थतत्त्वनिरूपणस्य टीकायां-- "जन्यमात्रं प्रतीश्वरस्य कारणतायाः क्लृप्तत्वात्तत्र समवायित्वमात्रकल्पनमेवेश्वरस्य शब्दसमवायित्वे विनिगमकं जीवानां तथात्वे कारणत्वसमवायित्वयोर्द्वयोः कल्पने गौरवादिति भावः"[7] इति।

प्राच्यैर्यद्युच्यते यददृष्टो यथा जन्यमात्रं प्रति निमित्तकारणं भवति तद्वत् शब्दं प्रत्यपि। ततश्च यो धर्मो यस्य कार्यस्य जनको भवति, तद्धर्माश्रयधर्मी अपि तत्कार्यजनको भवतीति व्याप्तिबलेन शब्दो जीवजन्यो जीवादृष्टजन्यत्वात् सुखवदित्याद्य-नुमानसम्भवादिति चेन्न विनिगमनाविरहात्। तदुक्तं रघुनाथेन "शब्दस्तज्जन्यस्तदृष्ट-जन्यत्वात् सुखादिवदिति पुनरप्रयोजकम्। अदृष्टस्य शब्दजनकत्वेऽपि तदाश्रयस्य जनकत्वे मानाभावात्"[8] इति।

किञ्चात्रावधेयं यत् शब्दो यदि जीवात्मनो गुणरूपेण स्वीक्रियते तदा जीवसमवेतानां ज्ञान-सुख-दुःखेच्छाप्रयत्न-गुणसमूहानाम् "अहं जानामि", "अहं सुखी", "अहं दुःखी", "अहमिच्छामि", "अहं करोमि" इत्याकारतया यथा मानसप्रत्यक्षो भवति तद्वद् "अहं शब्दवान्" इत्यपि मानसप्रत्यक्षः स्यादित्यसम्भवम्। अतः शब्द ईश्वरगुण इति स्वीकार्यं समीचीनत्वात्।

यदि प्राच्यैरुच्यते ईश्वरो यदि शब्दसमवायिकारणं स्यात्तदा श्रवणेन्द्रियस्य का कथा, यत आकाशस्यातिरिक्तद्रव्य-त्ववादिप्राचीननये कर्णशष्कुलीविवरावच्छिन्ना-काशस्य श्रवणेन्द्रियत्वात्? तदेदमुत्तरं प्रत्युत्तरितम् आचार्यरघुनाथेन नित्यं विभु आकाशं यद्युपाधिविशेषेणावच्छिन्नं सत् श्रवणेन्द्रियरूपेण गृहीतं स्यात्तदा कथं ईश्वरोऽपि कर्णशष्कुलीविवरावच्छिन्नेन श्रवणेन्द्रियरूपेण गृहीतो न स्यात्, तस्यापि नित्यत्वात् विभुत्वाच्च? अतः शब्दोऽपि ज्ञानादिवदीश्वरसमवेत एव। तदुक्तं तेन

[5] पदार्थतत्त्वनिरूपणम्, पृष्ठा-३

[6] पदार्थतत्त्वनिरूपणम्, पृष्ठा-५

[7] श्रीरघुदेवन्यायालङ्कारकृता पदार्थतत्त्वनिरूपणटीका, पृष्ठा-८०

[8] पदार्थतत्त्वनिरूपणम्, पृष्ठा-५

ISSN : 2583-2271
Vol. - I, No. 1: 2021

"श्रोत्रमपि कर्णशष्कुलीविवरावच्छिन्न ईश्वर एव, यथा परेषां तथाविधमाकाशम्"[9] इति।

## वैमत्यम्

रघुनाथस्य सिद्धान्तस्यास्य वैमत्यमपि दृश्यते। तथाहि प्राचीनमतमनुसृत्य वक्तुमलं यन्न्यायवैशेषिकराद्धान्ते परमेश्वरे ज्ञानेच्छाकृतय इति विशेषगुणत्रयमङ्गीकृतम्। तेषाञ्च शाश्वतत्वान्नित्यत्वमभ्युपेयम्। तेन चेश्वरे शब्दः विशेषगुणतया स्वीक्रियते चेत्तदा तस्यापि नित्यत्वमङ्गीकार्यम्, "ये ये ईश्वरसमवेता विशेषगुणास्ते ते नित्याः, यथा नित्यज्ञानादयः" इति व्याप्तिबलेन ईश्वरसमवेतत्वं हेतुरूपेण स्वीकृत्य शब्दस्य नित्यत्वसाधनात्। परमाचार्यरघुनाथेन किं शब्दस्य नित्यत्वं स्वीक्रियते इति प्रश्नः। परन्तु न्यायसूत्रेण विविधैर्हेतुभिर्युक्तिभिश्च शब्दस्य अनित्यत्वं व्यवस्थापितम्। वैशेषिकतन्त्रमपि समानमेवावगाहते। तदुक्तमुपस्कारे-- "नित्यवैधर्म्यात्"[10] इति , "अनित्यश्चायं कारणतः"[11] इति च।

## विशेषपदार्थखण्डनम्

नव्यन्यायवैशेषिकसम्मतसप्तपदार्थेषु विशेषोऽन्यतमः। "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रे- यसम्"[12] इति वैशेषिकसूत्रे द्रव्यादिवत् विषेषोऽपि पृथक्पदार्थः स्वीकृतः। न्यायदर्शने विशेषपदार्थस्योद्दिष्टाभावेऽपि भाष्यवचनाज्ज्ञायते समानतन्त्रवैशेषिकदर्शन- स्वीकृतविशेषपदार्थो महर्षिगौतमस्याभीष्ट इति। तदुक्तं भाष्यकारवात्स्यायनेन "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेष- समवायाः प्रमेयम्"[13] इति।

पदार्थोऽयं नित्यद्रव्यवृत्तिस्तथाश्रय-भेदेऽनन्ताः। अत्र नित्यपदेन पृथिव्यप्तेजोवायूनां परमाणवस्तथा आकाशकालदिगात्ममनसां ग्रहणम्।

तल्लक्षणञ्च प्रथमतो भणितं तर्कसंग्रहेऽन्नंभट्टेन "नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव"[14] इति। ततः परमुक्तं "नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः"[15] इति। अत्र नित्यद्रव्यवृत्तय इत्येव विशेषस्य लक्षणम्।

## खण्डनम्

आचार्यरघुनाथस्तु स्वतोव्यावर्तकत्वेन अतिरिक्तपदार्थरूपेण विशेषो नाङ्गीकुरुते। तन्नये व्यावर्तकधर्मरूपेण यद्विशेषपदार्थस्य कल्पना भवति तद्धि नित्यद्रव्येष्वपि भवितुमर्हति तेषामपि स्वतोव्यार्वतकत्वात् विशेषपदार्थस्वीकृतौ तादृशविनिगमनाभावच्च। तदुक्तं रघुनाथेन "विशेषोऽपि न पदार्थान्तरं मानाभावात्। विनापि व्यावर्तकं धर्मं परेषां विशेषणामिव नित्यानां द्रव्याणामपि स्वत एव व्यावर्तकत्वात्।"[16] इति।

अत्र चेदमुच्यते प्रशस्तपादाचार्येण यद् यद्यपि नित्यद्रव्यवृत्तिविशेषपदार्थः अस्मत्प्रत्यक्षगोचरस्तथापि योगिनां नित्यपरमाण्वाकाशादिवद् विशेषस्यापि प्रत्यक्षसिद्धत्वाद् विशेषः स्वीकार्यः इति। अत्रैवं प्रत्यवतिष्ठते आचार्यरघुनाथः तर्हि तानेव योगिजनान् पृच्छतु यत्तैः पञ्चभावपदार्थातिरिक्तविशेष- पदार्थः प्रत्यक्षीक्रियते ना वा? अत्रेदं तात्पर्यं यद् विशेषपदार्थो न योगिगणप्रत्यक्षसिद्धो मानाभावात्। तदुक्तं रघुनाथशिरोमणिना "योगिनोऽतिरिक्तं विशेषमीक्षन्ते। एवं तर्हि त एव सशपथं पृच्छ्यन्तां किमेतेऽतिरिक्तं विशेषमीक्षन्ते न वेति"[17] इति।

## उपसंहृतिः

बङ्गन्यायसम्प्रदायप्रवर्तकाचार्यरघुनाथशिरोमणिर्न केवलं 'तत्त्वचिन्तामणिः' इति ग्रन्थाध्ययनेन भावनया

[9] पदार्थतत्त्वनिरूपणम्, पृष्ठा-५

[10] वैशेषिकसूत्रोपस्कारः

[11] वैशेषिकसूत्रोपस्कारः

[12] वैशेषिकसूत्रम्-४

[13] न्यायसूत्रवात्स्यायनभाष्यम्

[14] तर्कसंग्रहः, दीपिकाटीका

[15] तर्कसंग्रहः, दीपिकाटीका

[16] पदार्थतत्त्वनिरूपणम्, पृष्ठा-२०

[17] पदार्थतत्त्वनिरूपणम्, पृष्ठा-२०

च तत्त्वानुसन्धानपूर्वकतया दीधितिटीकां विरच्याखिलभारतवर्षे स्वसम्प्रदायं प्रतिष्ठाप्य परिश्रान्तो बभूव अपि तु वैशेषिकदर्शनस्य सूत्रादारभ्य भाष्ये, वार्तिकम् इति न्यायप्रस्थाने, किरणावली न्यायलीलावती इति वैशेषिकप्रस्थानेऽपि तस्य कीर्तिर्ज्योतिष्कायते। तस्य 'पदार्थतत्त्वनिरूपणम्' इति कीर्तिस्तु नव्यन्यायवैशेषिकाचार्यैः सादरं समाद्रियते। अत्र रघुनाथस्य स्वकीयत्वं तथा स्वसयुक्तिकचिन्तनं विस्पष्टं परिस्फुटम्। तेन सद्दढयुक्तिभिर्ये सिद्धान्ताः प्रतिष्ठापितास्तत्र न केवलं न्यायवैशेषिकमतमनुसृतमपि तु प्राभाकर-भाट्टमीमांसाद्वैतवेदान्तादीनामपि मतान्यनुसृतानि। अतोऽत्र कुत्रचिन्न्यायवैशेषिकस्वीकृतपदार्थाः खण्डिताः, कुत्रचिच्च प्राभाकरभाट्टमीमांसादितन्त्रसिद्ध- पदार्था अपि स्वीकृताः इति शिवम्।

## सहायकग्रन्थाः


- रघुनाथः, *पदार्थतत्त्वनिरूपणम्* ; सम्पा०मधुसूदनन्यायाचार्यः, संस्कृतकलेज् , कोलकाता,१९७३।
- गौतमः, *न्यायदर्शनम्;* वात्स्यायनभाष्य-सहितम्, उद्योतकरवार्तिक-सहितम्, विश्वनाथवृत्तिसहितञ्च, सम्पा० तारानाथन्यायतर्कतीर्थः, अमरेन्द्रमोहन-तर्कतीर्थः, मुन्सीराममनोहरलालपाब्लिशार्स् प्राइभेट् लिमिटेड, नवदेहली, कलिकातासंस्कृतसिरीज नं -XVIII, द्वितीयसंस्करणम्, १९८५।
- न्यायपञ्चाननः, विश्वनाथः, *कारिकावली* (मुक्तावली-दिनकरी-रामरुद्रीसमेता) ; सम्पा० हरिरामशुक्लः, चौखम्बा संस्कृत सीरिज आफिस, बनारस, १९५१।
- भट्टः, जयन्तः; *न्यायमञ्जरी* (खण्डः१-३) ; चक्रधररचितग्रन्थिभङ्ग-टीकासहिता, सम्पा० गौरीनाथशास्त्री, संपूर्णानन्दसंस्कृतविश्वविद्यालयः , वाराणसी, प्रथमसंस्करणम्, १९८२।
- उपाध्याय, गङ्गेश, तत्त्वचिन्तामणि (प्रमालक्षण) ; सम्पा० श्रीविश्वबन्धु भट्टाचार्य, प्रका० स्वामी प्रभानन्द, रामकृष्ण मिशन् इन्स्टिटिउट् अव कालचार, कोलकाता, मार्च २०००।
- उपाध्याय, गङ्गेश, तत्त्वचिन्तामणि (व्याप्तिपञ्चक) ; सम्पा. श्रीयुक्त राजेन्द्रनाथ घोष, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता-७०००१३, द्वितीयमुद्रणम्, २०११।
- उदयनाचार्यप्रणीता, न्यायकुसुमाञ्जलिः; पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, कोलकाता, १९९५।
- ताताचार्यः, एन.एस. रामानुजः, *शाब्दबोधमीमांसा* (१-४) ; इन्स्टिट्युट् फ्रेञ्च डि पाण्डिचेरी, राष्ट्रिसंस्कृतसंस्थानम्, नवदेहली, प्रथमसंस्करणम् ,२००५।
- अन्नंभट्टः, *तर्कसंग्रहः* ; सम्पा० नारायणचन्द्रगोस्वामी, संस्कृतपुस्तकभाण्डारः, कोलकाता,१४१३ बङ्गाब्दः।
- विश्वनाथन्यायपञ्चाननः, कारिकावली ; सम्पा० नारायणसून्, राष्ट्रीयसंस्कृतसंस्थानम्, दिल्ली, २००२।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# न्यायमते अनुमानप्रमाणम्

## सुरजित् मण्डलः

---

### प्रबन्धसारः

*मानाधीना मेयसिद्धिः अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्नैव सम्भवति। प्रमाणभेदविषये दार्शनिकानां विमतिदर्शनेऽपि प्रमाकरणं प्रमाणमिति लक्षणविषये विमतिर्नास्ति। प्रत्यक्षमेकमेव प्रमाणमिति चार्वाका वदन्ति। चार्वाकमतिरिच्य सर्वैरनुमानस्य सत्ता स्वीक्रियते। न्यायतन्त्रे प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि सन्ति। प्रमापि प्रत्यक्षानुमित्युपमितिशाब्दभेदेन चतुर्विधा भवति। प्रत्यक्षप्रमायाः करणम् इन्द्रियम्। व्यापारश्च इन्द्रियार्थसन्निकर्षो भवति। अत एव इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं भवतीति प्रत्यक्षस्य लक्षणं साधितं सूत्रकारैः। प्रत्यक्षनिरूपणानन्तरमुपजीव्योपजीवकभावसङ्गत्या अनुमानस्य निरूपणं भवति। उपजीव्यत्वं कारणत्वमुपजीवकत्वञ्च कार्यत्वमिति। अत एव सूत्रकारैरुच्यते "तत्पूर्वकमनुमानं त्रिविधं – पूर्ववत् शेषवत् सामान्यतोदृष्टं च" अर्थात् प्रत्यक्षपूर्वमनुमानं त्रिविधं भवति। यत्र कारणेन कार्यस्यानुमानं तत्पूर्ववदनुमानम्। यथा मेघोन्नतिं दृष्ट्वा वृष्टिर्भविष्यतीति। यत्र कार्येण कारणस्यानुमानं भवति तच्छेषवद् अनुमानम्। यथा धूमं दृष्ट्वा वह्नेरनुमानम्। सामान्यतोदृष्टञ्च अन्यत्र दृष्टस्य यद् अन्यत्र दर्शनं तद् गतिपूर्वकमेव भवति। यथा आदित्यस्य। अनेन प्रकारेण प्राचीनैः अनुमानस्य त्रैविध्यमुपपादितम्।*

*प्रत्यक्षपरिकल्पितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इति न्यायमनुसृत्य नव्यैः अनुमानस्य प्राधान्यं स्वीक्रियते। प्राचीनैरनुमानस्य यत्त्रैविध्यं प्रतिपादितं तत्स्वार्थानुमानपरम्। पञ्चावयवप्रयोज्यं यदनुमानं तत्परार्थानुमानमिति सिद्धान्तमभ्युपेत्य अनुमानस्य स्वार्थपरार्थभेदेन द्वैविध्यं नव्यैः स्वीकृतम्। न्यायाप्रयोज्यानुमानं स्वार्थानुमानं, न्यायप्रयोज्यानुमानं परार्थानुमानमिति। तत्र अनुमितिः प्रमा भवति, अनुमितौ व्याप्तिज्ञानं करणं परामर्शश्च व्यापारो भवति। तस्याः अनुमितेर्लक्षणं तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानम् अनुमितेर्लक्षणविषये आचार्याणां या मतिर्विद्यते तत्करणविषये च यो हि विचारो विद्यते तस्य विस्तृतविवेचनं प्रबन्धे मया अभिहितम्।*

"मानाधीना मेयसिद्धिः" अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्न भवतीत्यतः दार्शनिकैः प्रमाणतत्त्वमभ्युपगतम्। प्रमाकरणमिति प्रमाणलक्षणे दार्शनिकानां वैमत्याभावेऽपि प्रमाणसंख्याविषये महान् मतभेदः दरीदृश्यते। प्रत्यक्षप्रमाणस्य सर्ववादिसम्मतत्वात् चार्वाकैरपि प्रत्यक्षप्रमाणमभ्युपगतम्। चार्वाकमतम् अतिरिच्य प्रायः सर्वैः दार्शनिकैः अनुमानप्रमाणमपि उररीकृतम्। "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति अनुमानप्रमाणस्य महत्त्वमभिलक्ष्य प्रत्यक्षनिरूपणानन्तरं कार्यकारणभावसङ्गत्या तार्किकैरनुमानस्वरूपं निरूपितम्। उक्तं च मणिकारैः "प्रत्यक्षनिरूपणानन्तरं तदुपजीवकत्वात् बहुवादिसम्मतत्वाच्च अनुमानं निरूप्यते"[1] इति। सूत्रकारैः महर्षिभिः गौतमैरपि प्रत्यक्षलक्षणनिर्वचनानन्तरं सूत्रितं यत् "अथ तत्पूर्वकं त्रिविधमनुमानम् पूर्ववत्, शेषवत्, सामान्यतोदृष्टं च"[2] इति। अर्थात् प्रत्यक्षनिरूपणानन्तरं प्रत्यक्षपूर्वकं त्रिविधमनुमानं तैः निरूपितम्। तत्पूर्वकमिति कथनेन इदमेव बोध्यते यत् प्रत्यक्षस्यानुमानकारणत्वं फलितं

---

[1] तत्त्वचिन्तामणिः, अनुमानखण्डः

[2] न्यायसूत्रम् १.१.५

भवति। प्रत्यक्षं च अत्र साध्यसाधनयोर्व्याप्यव्यापक-भावसम्बन्धविषयकं साधनविषयकं च बोध्यं भवति। यथा प्रथमं महानसे वह्निधूमयोः व्याप्तिसम्बन्धप्रत्यक्षं भवति तत्पश्चात् च पर्वते धूमप्रत्यक्षं भवति। तदनन्तरं व्याप्तिस्मर्यमाणस्य पुरुषस्य पर्वतो वह्निव्याप्यधूमवानिति परामर्शः जायते। तादृशपरामर्शानन्तरं तस्य पुरुषस्य पर्वतो वह्निमान् इति अनुमितिर्जायते। उक्तं भाष्यकारेण “तत्पर्वकमित्यनेन लिगलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं चाभिसम्बध्यते, लिङ्गलिङ्गिनोः सम्बद्धयोर्दर्शनेन लिङ्गिस्मृतिरभिसम्बध्यते, स्मृत्या लिङ्गदर्शनेन चाऽप्रत्यक्षोऽर्थोऽनुमीयते”[3] इति।

तत्र अनुमितिकरणमेवानुमानमिति अनुमानसामान्यलक्षणं न्यायज्ञैः भाषितम्। अनुमानपदार्थश्च अनुमीयते अनेन इति खरणव्युत्पत्तिपक्षः तात्पर्यटीकायां वाचस्पतिमित्रैः विपुलतया व्याख्यातः। सीत्रोक्ततत्पूर्वकमित्यस्य व्याख्यानावसरे न्यायमञ्जरीमकारैः “तत्पूर्वं कारणं यस्य तत् तत्पूर्वकमिति व्युत्पत्तौ निर्णयोपमानादौ अतिप्रसङ्ग इति ते द्वे प्रत्यक्षे पूर्वं यस्येति”[4] व्युत्पत्तिरभ्युपगत्। तत्र प्रथमं चाविनाभावग्राहि प्रत्यक्षम्, द्वितीयश्च लिङ्गदर्शनं ते द्वे प्रत्यक्षे अनुमानस्य कारणं स्तः, न तूपमानादेः कारणमिति। वस्तुतः लिङ्गविषयं ज्ञानं ज्ञानविषयीकृतं वा लिङ्गं प्रतिबन्धस्मरणसहितं प्रमाणम्। परोक्षः अर्थः लिङ्ग्यते गम्यतेऽनेनेति लिङ्गम्। लिङ्गमिदं पञ्चलक्षणम्। तानि च लक्षणानि पक्षधर्मत्वं सपक्षसत्त्वं विपक्षायावृत्तिरबाधितविषयत्वम् असत्प्रतिपक्षत्वञ्चेति। तथाहि जयन्तभट्टः –

“पञ्चलक्षणकाल्लिङ्गाद् गृहीतान्नियमे स्मृतेः।
परोक्षे लिङ्गिनि ज्ञानमनुमानं प्रचक्षते॥”[5]

तत्रेदमवधातव्यं यत् प्राचीनानां नये अनुमितौ करणं ज्ञायमानलिङ्गमेवानुमानम्। ज्ञायमानलिङ्गस्य करणत्वमिति निगदन्ति आचार्याः। अर्थात् ज्ञायते यत् तत् ज्ञायमानं वर्तमानव्याप्तिज्ञानविषयं लिङ्गमेवानुमानम्। ज्ञायमानलिङ्गस्य अनुमित्यकरणत्वे युक्तिं प्रदर्शयन्ति नव्याः – यदि ज्ञायमानलिङ्गस्य अनुमितिकरणत्वं स्वीक्रियते तर्हि भविष्यत्कालीनेन धूमेन इयं यज्ञशाला वह्निमती भविष्यति भाविधूमादित्यत्र भूतकालीनेन च धूमेन इयं यज्ञशाला वह्निमती आसीत् अतीतधूमादित्यत्र च अनुमितिर्न भवेत्, यतः वर्तमानकाले ज्ञायमानधूमस्याभावात् इति सर्वमतसिद्धः। अतः तादृशकारणाभावस्य वर्तमानकालीन-ज्ञायमानधूमाभावस्य सत्त्वेऽपि वह्न्यनुमित्या-त्मककार्यस्य सत्त्वाद् भवति व्यतिरेक-व्यभिचारः। व्यभिचारभयेन “व्यापारवदसाधा-रणकारणं करणमि”ति करणलक्षणमभ्युपेत्य नव्यैः व्याप्तिज्ञानस्य अनुमितिकरणत्वं स्वीकृतम्। उक्तं च विश्वनाथेन –

“व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।
अनुमायां, ज्ञायमानं लिङ्गं तु करणं न हि।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा॥”[6] इति।

अत्रेदमपि बोध्यम् ये खलु फलाव्यवहितप्राक्क्षणावच्छिन्नं कारणं करणमिति वदन्ति तेषां नये लिङ्गपरामर्शोऽनुमानमिति। तथाहि अन्नंभट्टः–

“स्वार्थानुमिति-परार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्”[7] इति।

---

[3] न्यायभाष्यम्, पृ. २४

[4] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. १२५

[5] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. १०१

[6] कारिकावली, कारिका ६६-६७

ISSN : 2583-2271
Vol. - I, No. 1: 2021

केशवमिश्रेणापि लिङ्गपरामर्श एव अनुमानमित्यभाषि। "येन ह्यनुमीयते तदनुमानम्। लिङ्गपरामर्शेण चानुमीयते, अतः लिङ्गपरामर्शोऽनुमानम्"[8] इति। मणिकारैस्तु अनुमानस्वरूपमित्थं भाषितं यत् "तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानम् अनुमितिः, तत्करणमनुमानम्। तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति।"[9]

वस्तुतः न्यायसूत्रकाराभिमतं पूर्ववत्-शेषवत्-सामान्यतोदृष्टभेदेन अनुमानं त्रिविधम्। वात्स्यायनेनायं विभागः आदृतः। उद्योतकारैः इयं प्रथमतया अन्वयव्यतिरेकी, अन्वयी, व्यतिरेकी चेति लिङ्गविशेषानुरोधादनुमानस्य त्रैविध्यमुक्तम्। वाचस्पतिमिश्रैस्तु वीतावीतभेदेनानुमानस्य द्वैविध्यमभ्युपगतम्। तत्र वीतं पूर्ववत्सामान्यतोदृष्टभेदेन द्विविधम्। अवीतं पुनः पुनः शेषवत् परिशेष अपरपर्यायं वेति तैः स्वीकृतम्। स्वार्थपरार्थभेदेन इयं प्रथमतया स्वभाष्ये प्रशस्तपादः अनुमानविभागमुपदर्शयत्। अयञ्च द्विविधभेदः नव्यनैयायिकैरपि अद्यावधि स्वीक्रियते विचार्यते च। उपर्युक्तमतेषु नव्यैरनुसृतः स्वार्थपरार्थविभागः सर्वथा न्यायशास्त्रे समादरणीयो भवतीति अनुमानस्य द्वैविध्यमेवाङ्गीकार्यमित्यलम्।

## सहायकग्रन्थाः


- तत्त्वचिन्तामणिः (अनुमानखण्डः) – सम्पा. श्रीकामाख्यानाथ तर्कवागीशः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००६
- न्यायदर्शनम् – व्याख्या. चितनारायण पाठक, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९४
- न्यायमञ्जरी – सम्पा. श्री गौरीनाथशास्त्री, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, १९८३
- कारिकावली – व्याख्या. श्रीसूर्यनारायणशुक्लः, चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, २०६५-विक्रमाब्दः
- तर्कसंग्रहः – व्याख्या. श्रीकृष्णवल्लभाचार्यः, चौखम्बा विद्याभवन, वाराणसी, २००३
- तर्कभाषा – व्याख्या- गजाननशास्त्री मुसलगाँवकर, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९८४


[7] तर्कसंग्रहः, अनुमानप्रकरणम्।

[8] तर्कभाषा, अनुमानप्रकरणम्।

[9] तत्त्वचिन्तामणि, अनुमानप्रकरणम्।

# चार्वाकनये अनुमानादेः प्रमाणत्वखण्डनम्

जयदेवदिण्डा


## प्रबन्धसारः

*दृश्यते अनेन इति दर्शनम्, दृशिर्-प्रेक्षणे इति धातोः "कृत्यल्युटो बहुलम्" इत्यनेन ल्युट्-प्रत्यये दर्शनमिति सिद्ध्यति। येन माध्यमेन सम्यज्ज्ञानं भवति तत्प्रत्यक्षानुमानोपमानशब्दादिकं यथार्थानुभवसाधनभूतं दर्शनम्। दर्शनञ्च द्विविधम्– नास्तिकदर्शनम्, आस्तिकदर्शनञ्चेति। नास्तिकदर्शनञ्च त्रिविधं– चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनञ्चेति। आस्तिकदर्शनञ्च षड्विधम्– सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, पूर्वमीमांसादर्शनम्, उत्तरमीमांसादर्शनञ्चेति।*

*'नास्तिको वेदनिन्दकः' इत्यनुसारेण वेदवाक्येषु ये न विश्वसन्ति त एव नास्तिकाः। प्रत्यक्षमेव प्रमाणत्वेन ये स्वीकुर्वन्ति ते च चार्वका इत्याख्यया आख्यायन्ते। चारुः लोकसम्मत आपातमनोरमो लोकचित्ताकर्षक इति वाको वाक्यमस्य इति चार्वाकः। 'प्रत्यक्षमेवैकं प्रमाणमिति' चार्वाकदर्शने एकमेव प्रमाणं स्वीक्रियते, तच्च प्रत्यक्षम्। तदुक्तं सर्वसिद्धान्तसङ्ग्रहे–*

*प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः।*
*अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते॥ इति।*

*प्रत्यक्षसिद्धं वस्तु एव वर्तते, यतोऽप्रत्यक्षत्वात् किमपि अदृष्टं वस्तु नास्ति। तथा च लोकायतशास्त्रप्रतिपाद्ये प्रमाणस्वरूपे प्रत्यक्षमेव प्रमाणं स्वीक्रियते। एवकारेण प्रमाणान्तराणां प्रत्यक्ष एव अन्तर्भावः। प्रत्यक्षनिबन्धनव्याप्तिमूलकमनुमानम्। तस्मादेव अनुमानस्य पृथक् प्रामाण्यं नास्ति। एवमुपमानमपि न प्रमाणान्तरमिति चार्वाका मन्यन्ते। 'महिष इति पुरुषो मातङ्गीव योषिद्' इत्युपमानात् प्रमाज्ञानासम्भवात्। एवं शब्दोऽपि न प्रमाणं, कस्यापि यथार्थवक्तुरभावात्। चार्वाकनये अर्थापत्तिरपि न प्रमाणम्। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र दिवाभुञ्जानविशिष्टपीनत्वेन रात्रिभोजनस्य कल्पना तु नियमेन भवति, दिवा रात्रौ चाभोजिनोऽप्यामवातादिना पीनत्वदर्शनात्। एवमनुपलब्धिरपि न प्रमाणम्, तत्प्रमेयस्य अभावस्यैव अभावात्। 'भूतले घटो नास्ति' इति प्रत्यक्षं हि केवलभूतलसत्त्वे प्रमाणं, न तु भूतलव्यतिरिक्तभूतलनिष्ठाभावासत्त्वे। एवं चार्वाकनये अनुमानादेः प्रामाण्यनिरासः अल्पीयसा वचसा प्रतिपादितः, विस्तारेण तु प्रबन्धे प्रतिपादयिष्यते।*


## उपोद्घातः

मनुष्यः स्वभावतो मननशीलः प्राणी। मत्वा कर्माणि सीव्यतीति तन्निरुक्तिरपि पूर्वोक्तानुकूला। स हि कोऽहं कस्मादहमित्यादिसमस्याः सततं भावयित्वा "आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[1] इति दर्शनबीजम् उद्भावितवान्। आत्मदर्शने एव सर्वाणि दर्शनानि प्रवृत्तानि। आत्मदर्शनं दुःखनिर्वृत्तयेऽपेक्षितं दुःखनिवृत्तिरेव च सर्वैरभीप्सिता।

भारते दर्शनस्योदयो वेदकाल एवाजायत। ऋग्वेदे प्रजापतिपरमेष्ठी जगते मूलतत्त्वं मीमांसमानः प्राप्यते। स हि "आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास"[2] इत्यादिमन्त्रेषु तदेव तत्त्वं विमृशन् परिप्राप्यते। अपरोऽपि संवनन आङ्गिरसो नामर्षिः "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्"[3] इत्यादिमन्त्रेषु तस्यैव तत्त्वस्यान्वेषणाय लोकान् प्रेरयन् प्रतिभाति। इमे द्वेऽपि मिलित्वा दर्शनानि अङ्कुरयितुं प्राभवताम्।

---

1. बृहदारण्यकोपनिषत्– २।४।५।
2. नासदीयसूक्तम्– १०।१२९।२।
3. संज्ञानसूक्तम्– १०।१९१।२।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

**दर्शनशब्दार्थः**

दृश्यते परिप्राप्यते अनेन इति दर्शनम्, प्रेक्षणार्थकाद् "दृशिर्-प्रेक्षणे" इति धातोः "कृत्यल्युटो बहुलम्" [पाणिनिसूत्रम्– ३।३।११३] इत्यनेन ल्युट्-प्रत्यये दर्शनमिति सिध्यति। येन माध्यमेन सम्यज्ज्ञानं भवति तत्प्रत्यक्षानुमानोपमानशब्दादिकं यथार्थानुभवसाधनभूतं दर्शनम्। उपनिषत्सु सत्यस्य दर्शनाय दृश्-धातोः प्रयोगोऽभूत्। अर्थाज्ज्ञानचक्षुषा यद् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम्। दर्शनं च द्विविधम्– नास्तिकदर्शनम्, आस्तिकदर्शनं चेति। 'नास्तिको वेदनिन्दकः'[4] इति स्मृत्यनुसारेण वेदवाक्येषु सर्गापवर्गेषु ये न विश्वसन्ति त एव नास्तिकाः इत्यभिधेयेन लोकेषु जनैः अभिधीयन्ते। नास्तिकदर्शनं च त्रिविधं– चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनं चेति। बौद्धानां चत्वारः सम्प्रदायाः प्रसिद्धाः– योगाचारः, माध्यमिकः, सौत्रान्तिकः, वैभाषिकश्चेति। एते षड्विधाः नास्तिकाः लोकेषु प्रसिद्धाः।

"नास्ति वेदोदितो लोक इति येषां मतिः स्थिरा।
नास्तिकास्ते तथास्तीति मतिर्येषान्त आस्तिकाः॥
अवैदिकप्रमाणानां सिद्धान्तानां प्रदर्शकाः।
चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः॥"

**चार्वाकदर्शनम्**

चार्वाकदर्शनं जडवादनाम्ना व्यवह्रियते। यस्य दार्शनिकसिद्धान्तानुसारेण जडभूतस्यैव चरमसत्त्वमभ्युपगम्यते यतश्च चैतन्यं मनो वा समुद्भवति स जडवादो नामेति व्यपदिश्यते। चार्वाकदर्शनमेव भारतीयदर्शनस्य जडवादस्यैको दृष्टान्तो मन्यते। प्रत्यक्षमेव प्रमाणत्वेन ये स्वीकुर्वन्ति ते च चार्वका इत्याख्यया आख्यायन्ते। चारुः सुन्दरः लोकसम्मत आपातमनोरमो लोकचित्ताकर्षको वाको वाक्यमस्य इति बहुव्रीहौ चार्वाकशब्दो निष्पद्यते। अदृष्टार्थापेक्षया हि दृष्टसुखार्थं दृष्टदुःखनिवृत्त्यर्थं वा प्रवर्तते निसर्गतो जन्तुः। स्वर्गसुखावाप्तये यज्ञादिकर्मणि प्रवर्तमाना विरला एव। तथा नरकदुःखभीत्या पापकर्मणः सकाशान्निवर्तमाना विरला एव प्राणिनो दृश्यन्ते। ततश्च स्वाभाविकप्रवृत्त्यनुसारेण कस्यचिदुक्तिः श्रुता चेत्तामनायासेनैव चारुत्वेन गृह्णाति लोक इति लोकवृत्त्यनुसारिण्या उक्तेश्चारुता सम्पाद्यते। हेमचन्द्रस्य मतानुसारेण "चर्वन्ति भक्षयन्ति तत्त्वतो न मन्यन्ते पुण्यपापादिकं परोक्षजातमिति चार्वाकाः"[5] इति। "नयते चार्वी लोकायते चार्वी बुद्धिः तत्सम्बन्धादाचार्योऽपि चार्वी, स च लोकायते शास्त्रे पदार्थान्नयते"[6] इति वामनजयादित्यवचनात् ज्ञायते यत् चार्वी नाम कश्चिदाचार्यः पदार्थं व्याख्यातवान्। बृहस्पतेः शिष्येण चार्वाकनाम्ना केनचन प्राक्तनर्षिणा एतस्य दर्शनस्य सिद्धान्तः प्रचारितः। तस्माद् दर्शनमिदं चार्वाकनाम्ना प्रसिद्धम्। चारुबृहस्पतिर्देवगुरुस्तस्य वाचमुपदेशम् नुसरतीति चार्वाकः। चार्वाकनाम्ना दैत्येन चैतन्मतस्य प्रचारः सम्पादितः। अत एतत् चार्वाकदर्शनम् इत्यभिधीयते। भौतिकं दर्शनं चार्वाकस्य पारिभाषिकोऽर्थः। आसीच्चार्वाकः कस्यचन जनस्य नाम इत्यपि सम्प्रदाये प्रसिद्धः। स तदनुसारिणश्च जडवादस्य प्रवक्तारो बभूवुः। तेषां सिद्धान्तितं चार्वाकदर्शनस्य नामान्तरं लोकायतम्। लोकायतं वेत्तीति लौकायतिको लोकायतिको वेति सिध्यति।

लोकायतदर्शनं, बार्हस्पत्यदर्शनं, नास्तिकदर्शनम् इत्यादिभिः अभिधानेनापि अभिधीयते चार्वाकदर्शनम्। प्रेयोमार्गस्तु श्रेयोमार्गात् सरलतरः रुचिकरश्च भवत्येव। प्रायेण सर्वप्राणिनस्तावद्–

"यावज्जीवं सुखं जीवेत् नास्ति मृत्योरगोचरः।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥"

इति लोकगाथाम् अरुन्धाना अर्थकामा एव पुरुषार्थं मन्यमानाः पारलौकिकम् अर्थम् अपह्नुवानाः

[4]. मनुस्मृतिः– २।११।

[5]. उणादिसूत्रम्, पृ० ३७।

[6]. काशिकावृत्तौ– १।३।३६।

चार्वाकमतम् अनुवर्तमाना एव अनुभूयन्ते। अत एव चार्वाकमतस्य लोकायतम् इति अन्वर्थपरम् अपरं नामधेयम्। अथवा इदमेव दर्शनं लोके बाहुल्येन प्रचरितत्वात् लोकायतदर्शननाम्नापि व्यवहृतम्। उपनिषत्पुराणमहाभारत-प्रबोधचन्द्रदयादिषु दर्शनान्तरेषु च बार्हस्पत्यसूत्राणामितस्ततः समुल्लेखाज्ज्ञायते आसीच्चार्वाकदर्शनस्य सूत्रकार आचार्यो बृहस्पतिरिति। बृहस्पतिप्रणीतत्वाद् दर्शनस्यास्य बार्हस्पत्यदर्शनमिति नामान्तरम्। अथवा बृहस्पतिः लोकायतश्चार्वाकः पुरन्दरः कम्बलाश्वरश्चेति दाशर्निकैः बहुभिः भौतिकवादिभिः बार्हस्पत्यैः परिचालितेषु बार्हस्पत्यसूत्रेषु मध्येऽस्य मतस्याधिकः प्रचारः चार्वाकनाम्ना दैत्येन सम्पादितः। अतस्तादृशं नाम सञ्जातम्। परं तु तत्रभवतः कोऽपि स्वतन्त्रो ग्रन्थोऽद्यत्वे प्रायेण नोपलभ्यते। परं तु पतञ्जलिसमये दर्शनेऽस्मिन् ग्रन्थाः प्राप्यन्ते स्म। "न यासयोः" [पाणिनिसूत्रम्– ७।३।४५] इति सूत्रभाष्ये पतञ्जलिना उक्तम्– "वर्णिका भागुरी लोकायतस्य। वर्तिका भागुरी लोकायतस्य।"[7] इति। "वर्णिका व्याख्यानानीत्यर्थः। भागुरी टीकाविशेष"[8] इति तद्भाष्योपरि कैयटः। "लोकायतशास्त्रस्य व्याख्यानरूपो ग्रन्थविशेष इत्यत्र"[9] इति नागेशः उद्योते व्याख्यानानीत्यस्य अर्थं प्रोवाच। तत्काले चार्वाकदर्शनग्रन्थानां प्रचारः आसीत्। परं तु वर्तमाने तु ग्रन्थाः नोपलभ्यन्ते न वा कोऽपि तस्य समर्थको नाम सुसङ्घटितः सम्प्रदायो परिप्राप्यते। भारतीयदर्शनेषु च तस्य मतं पूर्वपक्षरूपेण उद्धृत्य खण्ड्यते इति परामृश्यते। आस्तिकदर्शनकारैरस्य दर्शनस्य तथा निन्दा कृता तथा दर्शनमिदम् अस्तङ्गतम्।

चार्वाकदर्शनस्य मूलं वेदेष्वेव वर्तमानमासीत्– 'न प्रेत्य संज्ञास्ति' मरणात् परतः किमपि नास्ति। 'भस्मीभूतस्य देहस्य पुनरागमनं कुतः' इत्यमेव पूर्वपक्षीयविचारधारा चार्वाकदर्शनस्य मूलम्। एते च चार्वाकाः त्रिविधया भावनया एतेषां तत्त्वं कथयन्ति। ते च वैतण्डिक-स्थूल-सुशिक्षितसंज्ञाभिः प्रसिद्धाः। एतेषां मते जगद् आकस्मिकं चातुर्भौतिकम्, अचेतनस्य भूतचतुष्टयस्य मेलनाच्चैतन्यमुत्पद्यते। 'पृथिव्यप्तेजोवायुरिति तत्त्वानि। तत्समुदाये शरीरेन्द्रियविषयसंज्ञा'[10] इति बार्हस्पत्य-सूत्रम्। विनष्टेषु सत्सु स्वयं विनश्यति। तदाहुः "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, स न प्रेत्य संज्ञास्ति"[11] इति। तच्चैतन्यविशिष्टो देह एव आत्मा, देहातिरिक्ते प्रमाणाभावात्। अङ्गनालिङ्गनादि-जन्यं सुखमेव पुरुषार्थः। न चास्य 'दुःखसंभिन्नतया पुरुषार्थत्वम् एव नास्ति' इति मन्तव्यम्। न हि मृगाः सन्ति इति शालयो नोप्यन्ते, न हि भिक्षुकाः सन्ति स्थाल्यो नाधिश्रीयन्ते। ऐहिकं दैहिकं क्षणिकसुखमेव स्वर्गः कण्टकादिव्यथाजनितं दुःखमेव नरकम्। देहोच्छेदः मोक्षः। लोकसिद्धो राजा परमेश्वरः। देहात्मवादे च स्थूलोऽहं, कृशोऽहं, कृष्णोऽहम् इत्यादि सामानाधिकरण्योत्पत्तिः। एतानि च श्रीधरी-नीलकण्ठीप्रभृतिटीकासु उपलभ्यन्ते। तथा च– 'अथ लोकायतम्।' 'पृथिव्यप्तेजोवायुरिति तत्त्वानि।' 'तत्समुदाये शरीरेन्द्रियविष्य-संज्ञा।' 'तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवद् विज्ञानम्।' 'चैतन्यविशिष्टः कायः पुरुषः।' 'काम एवैकः पुरुषार्थः।' 'मरणेवापवर्गः।' इति। कामापराख्यं सुखमेव जीवनस्य चरमलक्ष्यत्वेन अङ्गीकुर्वद् दर्शनमिदं सुखवादीति नाम्ना कथ्यते, वेदविरोधितया नास्तिकं तथा ईश्वरस्य दार्शनिकतत्त्वेन अस्वीकारात् अनीश्वरवादि चेति व्यपदिश्यते।

## प्रत्यक्षमेवैकं प्रमाणम्

'प्रत्यक्षमेवैकं प्रमाणमि'ति चार्वाकदर्शने एकमेव प्रमाणं स्वीक्रियते, तच्च प्रत्यक्षम्। तदुक्तं

---

7. महाभाष्यम्, षष्ठं खण्डम्, पृ० २०२-२०३।

8. तत्रैव, प्रदीपः।

9. तत्रैव, उद्योतः।

10. बार्हस्पत्यसूत्रम्– ३१।

11. बृहदारण्यकोपनिषत्– २।०४।१२।

सर्वसिद्धान्तसङ्ग्रहे–

"प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः।
अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते॥" इति।

प्रत्यक्षसिद्धं वस्तु एव वर्तते, यतोऽप्रत्यक्षत्वात् किमपि अदृष्टं वस्तु नास्ति। अदृष्टं दृष्टं भवत्यत्यदृष्टवादिनोऽपि न वदन्तीति। तथा च लोकायतशास्त्रप्रतिपाद्ये प्रमाणस्वरूपे प्रत्यक्षमेव प्रमाणं स्वीक्रियते। एवकारः अन्यव्यवच्छेदार्थकः। तेन अनुमानादिप्रमाणानाम् असद्भावत्वम्। प्रत्यक्षं विहाय नेदं दर्शनं दर्शनान्तरमतान्यनुमानशब्दादीनि प्रमाणानि प्रमाणत्वेन मन्यते।

प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकञ्चेति। यदाह अन्नम्भट्टः तर्कसङ्ग्रहे "तद् द्विविधं– निर्विकल्पकं सविकल्पकञ्च। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चिदिति। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति"[12] इति। अयं घट इति संज्ञाविशिष्टं पदार्थविषयकं प्रत्यक्षं सविकल्पकम्। यत्र संज्ञादेर्ज्ञानं न भवति केवलं वस्तुनोऽनुभवो भवति तन्निर्विकल्पकं प्रत्यक्षम्। प्रत्यक्षज्ञानस्य करणं प्रत्यक्षं प्रमाणमुच्यते। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रञ्चेति पञ्चविधं बाह्यं प्रत्यक्षात्मकं ज्ञानं मानसमिति चैकविधमान्तरमिति साकल्येन षड्विधं प्रत्यक्षं शास्त्रेषु मन्यते। किन्तु चार्वाकमते न सर्वं प्रत्यक्षं प्रमाणं, भ्रमज्ञानस्य अभ्युपगमात्।

प्रत्यक्षप्रमाणं सर्वशास्त्रसम्मतम्। प्रत्यक्षमन्तरेण व्याप्तिज्ञानं साध्यसाधनभावो वा न निर्णेतुं शक्यते। प्रत्यक्षं विना उपमानोपमेयभावो न कल्प्यते, सति प्रत्यक्षव्यवहारे च शब्दस्यार्थो बोद्धुं युज्यते। अतः सर्वेषां प्रमाणानां मूलत्वात् प्रत्यक्षं प्रमाणमेव स्वीकर्तव्यम्, अन्यत् सर्वं न प्रमाणम्। भौतिकवादिनां चार्वाकानां मूलसिद्धान्तस्यानुकूलं यद् इन्द्रियगोचरतैव सत्यतायाः प्रयोजकम्। इन्द्रियेण यद् गम्यते बोध्यते ज्ञायते वा तदेव सत्यं प्रामाणिकं स्वीकर्तव्यं विश्वासार्हं च भवति। तस्माद् प्रत्यक्षमेव प्रमाणम्। अनुमानादीनां प्रमाणत्वाभावात् पञ्चभूतेषु प्रथमस्य भूतचतुष्टयस्य सत्ता स्वीक्रियते। आकाशस्य प्रत्यक्षाभावेन प्रत्यक्षैकप्रमाणवादिभिः चार्वाकैर्नाकाशः स्वीक्रयते। आकाशस्य ज्ञानमनुमानेन भवति। चार्वाकनये त्वनुमानस्य प्रामाण्यास्वीकाराद् आकाशस्यास्तित्वं नाङ्गीक्रियते। अनुमानादीनां प्रामाण्यत्वे तु चार्वाकैः आकाशस्यापि सत्ता स्वीक्रियेत।

## अनुमानादीनां प्रमाणत्वनिरासः

चार्वाकभिन्नाः सर्वेऽपि भारतीय-दार्शनिकाः अनुमानं प्रमाणत्वेन स्वीकुर्वन्ति। अनु पश्चान्मानं ज्ञानमित्यनयोः अनुमानशब्दयोः अनुमानमिति निष्पद्यते। प्रत्यक्षनिबन्धनव्याप्तिमूलकमनुमानम्। दृष्टानु-भूतनियममाश्रित्य कस्यचिददृष्टस्य अननुभूतस्य च वस्तुनः सत्ता अनुमीयते। अनुमानं लिङ्गलिङ्गिपूर्वकं भवति। तच्च व्याप्तिज्ञानावलम्बि वर्तते। व्याप्तिश्च रहितसम्बन्धः। 'यत्र धूमस्तत्र तत्राग्निः', इति अनुपाधिकसाहचर्यनिमयो हि व्याप्तिः इत्युच्यते। व्याप्तिसूचकवाक्यस्य सत्यता न प्रमाणसिद्धा अतो नानुमानमपि स्वीकरणार्हम्। 'यत्र धूमस्तत्र तत्राग्निः', 'पर्वतोऽयं धूमवान् तस्मादत्र पर्वतेऽग्निरवश्यमेव' इत्येतां व्याप्तिमवलम्ब्य अनुमानेन पर्वतस्य वह्निमत्त्वं प्रमाणीक्रियते। अनुमानमिदं तदैव स्वीकर्तुं शक्यं यदैव व्याप्तिसूचकवाक्यस्य सत्यता प्रमाणसिद्धा स्यात्। यानि यानि धूमाग्निमन्ति तेषां सर्वेषां स्थानानां निरीक्षणाभावात् प्रत्यक्षस्य सीमितत्वात् वर्तमानमाकाल-वर्तिनामेव धूमाग्निविशिष्टानां स्थानानां प्रेक्षणमपि सिद्धीभवितुं न शक्यं कुतः पुनर्भूतभाविस्थलानाम्। एवं स्थिते व्याप्तिवाक्यस्य सत्यताभावात् नामुमानं प्रमाणम्। वह्निधूमयोः सामान्यलक्षण-प्रत्यासत्त्या सकलधूमवह्नीनाम् अलौकिक-प्रत्यक्षसम्भवाद् व्याप्तिग्रहः सुलभः इति नैयायिकमतं न युक्तं सामान्यस्यैव चार्वाकमतेऽस्वीकृतत्वात्। घटादिव्यक्त्यपेक्षया

---

[12]. तर्कसङ्ग्रहः, प्रत्यक्षपरिच्छेदः, पृ० १५७।

अतिरिक्तं किञ्चिद् घटत्वादिकं न प्रत्यक्षीक्रियते येन सामान्यकल्पना अर्थवती स्यात्। घटोऽयमिति प्रत्यक्षं तु घटसद्भावे प्रमाणं न तु घटगतसामान्यसद्भावे। अन्यथा आकाशस्य सत्ता स्वीकार्या स्यात्। प्रत्यक्षैकवादिनश्चार्वाकस्य मते त्वाकाशो न स्वीक्रियते। आकाशस्वीकारे तु अनुमानप्रमाणस्यापि स्वीकारापत्तिः। किञ्च जलशून्ये तप्ते लौहपिण्डे केवलाग्निवद् गोपालघुटिकादौ केवलधूमस्यापि प्रत्यक्षकृतेन भूयोदर्शनेन व्यभिचारनिरासासम्भवः एव। अत उपाधिरूपव्यभिचाररहितः कश्चित् सम्बन्धो व्याप्तिनामा न सम्भवति। अतो निर्दोषमसन्दिग्धं व्याप्तिज्ञानं न सम्भवति। एवञ्च व्याप्तिग्रहासम्भवाद् अनुमानं न प्रमाणम्।

अनुमानं लोकव्यवहारसाध्यमित्यपि चार्वाकैः न स्वीक्रियते। लोकव्यवहारेऽपि अनुमानम् अनपेक्षितं सम्भावनयैव लोकव्यवहारस्य गतार्थत्वात्। सम्भावनावशादेव मानवः तत्तत्कर्मणि प्रवर्तते। किञ्च अनुमानवादिनां धूमानलयोः कार्यकारणभावात् तत्साहचर्यस्यापि न्यायसङ्गतत्वात् इत्येतत्कथमपि चार्वाकैर्न स्वीक्रियते कार्यकारणभावस्य असत्त्वात्। स्वभावादेव संसारगतविचित्रता न तु कार्यकारणभावजनिता। मनुष्यस्य सुखसत्त्वे हेतुर्धर्मः किञ्च दुःखसत्त्वे कारणमधर्मः इत्यपि न वक्तव्यम्। मनुष्यः स्वभावादेव सुखं दुःखञ्च भजते इति चार्वाकाः। अग्नेः दाहकत्वं जलस्य शीतलत्वं तु पदार्थस्य स्वभाव एव। एवं चार्वाकाः कार्यकारणभावं निरस्यन्तः स्वभाववादं प्रतिष्ठापयन्ति। जगत उत्पत्तौ विनाशे च प्रधानं कारणं स्वभावमेव।

एवमुपमानमपि न प्रमाणान्तरमिति चार्वाका मन्यन्ते। 'महिष इति पुरुषो मातङ्गीव योषिद्' इत्युपमानात् प्रमाज्ञानासम्भवात्। तथा च गोसदृशपिण्डे संज्ञिनि गवय इति संज्ञायाः यः शक्तिरूपसम्बन्धः स उपमानप्रमाणेन ज्ञायते न तु तादृशसम्बन्धविशेषातिरिक्तं किञ्चिदस्ति। गोसदृशो गवय इति वृद्धवचनन्तु शब्दप्रमाणम्। वने गवयगवाकृतादर्शनं प्रत्यक्षमेव। गोसादृश्यहेतुना तादृशप्राणिनि गवयबोधोऽनुमाने चान्तर्भुक्तः। चार्वकमते अनुमाशब्दाभ्यां व्याप्तिग्रहे या आपत्तिः सैवोपमानेऽपि सङ्घटते। अतो नास्ति उपमानप्रमाणस्य सद्भावत्वम्।

एवं शब्दोऽपि न प्रमाणं कस्यापि यथार्थवक्तुरभावात्। तथा च बालो हि 'गामानय' इत्यादिशब्दस्य गवानयनाद्यर्थ-बोधकत्वम् अवबुध्यते। ततश्च 'गां बधान', 'अश्वमानय' इत्यादिप्रयोगान्तरेषु पदान्तरयोगत्यागरूपौ आवापोद्वापौ दृष्ट्वा गोशब्दः सास्नादिमतो वाचकः, आनयशब्दः आनयनक्रियावाचकः इत्यादिपदार्थविवेकम् अवधारयति। एवं वृद्धव्यवहारेण ज्ञातशब्दार्थो ज्ञायते। वृद्धव्यवहारात् शब्दार्थस्य अनुमानं भवतीति वैशेषिकाः। चार्वाकस्तु अनुमानं व्याप्तिज्ञानस्योपाय इत्युक्तौ यो दोषः आपपति सोऽयं व्याप्तिज्ञानस्योपायः शब्दः इत्यपि बोध्यम्। अतश्चार्वाकः शब्दं न प्रमाणत्वेन स्वीकुर्वन्ति।

किञ्च आप्तवचनस्य स्वीकारादपि आप्तवचनस्य आकर्णाद् योऽर्थबोधो जायते स तु प्रत्यक्षप्रमाणेनैव सिध्यति। किञ्च कस्यापि पुरुषस्याप्तत्वात् प्रामाणिकत्वात् सत्यवचनत्वात् हितेच्छुत्वाच्च तस्य वचसि आस्थायाः संस्थापनमनुमानमेव। अनुमानञ्चानुपदमेव प्रत्याख्यातमत आप्तपुरुषोक्तवाक्ये सत्यधियः प्रतिष्ठापनम् एकान्ततो निस्सारम्। जगद्विषयकप्रत्यक्ष- पदार्थानां वर्णनन्तु तत्कृतं विश्वासार्हं परमदृष्टस्य लोकस्याश्रुतपूर्वपदार्थानां आप्तकृतवर्णनन्तु मनोरञ्जनान्नाधिकं किमपि इत्येतद्विचारं प्रकाशयन्तश्चार्वाकाः वेदानामपि प्रामाण्यं निराकुर्वन्ति। विरोधिवचःप्रकाशन-कारित्वात् निरर्थकशब्द-प्रयोगकारित्वात् अप्रत्यक्षपदार्थविषयक-कल्पनाकारित्वाच्च वेदाः न प्रमाणम्। वेदाः यज्ञेषु घृणितानि कर्माणि अनुष्ठातुमुपदिशन्ति, मांसभक्षणञ्च यागेषु विधित्वेन प्रतिपादयन्ति अतः वेदाः न मान्याः। वेदानां कर्तारश्च सन्ति धूर्ता भण्डा निशाचराश्च–

ISSN : 2583-2271
Vol. - I, No. 1: 2021

"त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः।
जर्फरीतुर्फरीत्यादिपण्डितानां वचः स्मृतम्॥"

एवं चार्वाकाः शब्दप्रमाणं खण्डयन्तो वेदस्य प्रामाण्यमपि निराकुर्वन्ति। चार्वाकाः न सन्ति शब्दप्रमाणवादिनस्तस्मात्ते ईश्वरप्रतिपादिकाः श्रुतीरपि नाद्रियन्ते। शब्दाधारे हि ईश्वरस्यास्तित्वस्वीकरणं न तेषामभितम्। ते अनुमानप्रमाणमपि नाङ्गीकुर्वन्ति। अतोऽनुमानेन नैयायिकाः यस्येश्वरस्य सत्तामुद्घोषयन्ति स ईश्वरोऽपि चार्वाकैः प्रतिषिध्यते। ईश्वरस्य सत्ताभावात् कथं जगदुत्पत्तिश्चेत् स्वभावादेव जगदुत्पत्तिः किञ्च स्वभावादेव तल्लयः। तस्मात् तदुत्पत्तौ तल्लीनतायाञ्च ईश्वरस्य सत्तास्वीकारो नापेक्ष्यते।

चार्वाकनये अर्थापत्तिरपि न प्रमाणम्। 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र दिवाभुञ्जानविशिष्टपीनत्वेन रात्रिभोजनस्य कल्पना तु नियमेन भवति, दिवा रात्रौ चाभोजिनोऽप्यामवातादिना पीनत्वदर्शनात्।

एवमनुपलब्धिरपि न प्रमाणम्, तत्प्रमेयस्य अभावस्यैव अभावात्। 'भूतले घटो नास्ति' इति प्रत्यक्षं हि केवलभूतलसत्त्वे प्रमाणं, न तु भूतलव्यतिरिक्तभूतल- निष्ठाभावासत्त्वे। एवम् अभावोऽपि न प्रमाणम्।

## उपसंहृतिः

नन्वस्तु अनुमानादीनां प्रामाण्याभावः। परन्तु प्रेक्षावन्तो हि पर्वतादौ धूमं दृष्ट्वा अग्निरस्तीत्यनुमानप्रमाणेन निश्चित्याग्निप्राप्त्यर्थं प्रवर्त्तमाना लोक उपलभ्यते। तथा यथार्थवक्त्रा केनचिन्नद्यास्तीरे फलानि सन्तीत्युक्ते शब्दप्रमाणेन नद्यास्तीरे फलानि सन्तीति निश्चित्य फलप्राप्त्यर्थं प्रेक्षावतां फलार्थिनां तत्र प्रवृत्तिर्दृश्यते। प्रत्यक्षैकप्रमाणवादिनां चार्वाकाणां नये त्वनुमानस्य शब्दस्य च प्रामाण्याभावेन लोके दृश्यमाना प्रेक्षावतां प्रवृत्तिर्नोपपद्यते। अत्रोच्यते धूमादिज्ञानानन्त-रमग्न्यादिज्ञाने प्रवृत्तिः प्रत्यक्षमूलतया सम्भावना भ्रान्त्या वा युज्यते। तथा च पूर्वं प्रत्यक्षतो दृष्टोऽग्निः, पश्चात् कियद्भिः क्षणैर्धूमं दृष्ट्वोद्बुद्धसंस्कारोऽग्निं स्मृत्वाग्नौ प्रवर्तते। अथवा धूमाग्न्योः साहचर्येण धूमं दृष्ट्वाग्निभ्रमात्तत्र प्रवृत्तिर्भवति, भ्रान्त्या प्रवृत्तौ सत्यस्याग्नेर्यः प्रतिलम्भो भवति स च काकतालीयन्यायेन मणिमन्त्रौषधादिवद् दादृच्छिकः। कार्यकारणभावमस्वीकुर्वतां चार्वाकाणां मते धूमाग्निज्ञानयोः कार्यकारणभावो न सम्भवति। तत्र भ्रान्त्या प्रवृत्तावपि यादृच्छिकतयैव वस्तुसतोऽग्नेः प्रतिलम्भो भवति। अतो नास्त्यनुमानादेः प्रामाण्यमिति। एवं यथामति अल्पीयसा वचसा चार्वाकनये अनुमानादीनां प्रामाण्याभावः विचारितः।

## सहायकग्रन्थाः


- माधवः। २००४। *सर्वदर्शनसंग्रहः (प्रकाशव्याख्योपेतः)*। शर्मा, उमाशङ्करः (सम्पा.)। वाराणसी : चौखम्बाविद्याभवनम्।
- श्रीमदन्नम्भट्टः। २०१७। *तर्कसंग्रहः (दीपिका-न्यायबोधनी-पदकृत्य-श्रीनिवासमुखोल्लासिनी-श्रीधरमुखोल्लासिनीहिन्दीव्याख्योपेतः)*। गोविन्दाचार्यः (सम्पा०)। वाराणसी : चौखम्बा-विद्याभवनम्।
- गौडः, शशिबाला। २०१२। *दर्शनशास्त्रस्येतिहासः*। गौडः, ज्वालाप्रसादः (सम्पा०)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- शुक्लः, रमेशचन्द्रः। २०१२। *प्रबन्धरत्नाकरः*। वाराणसी : चौखम्बा-विद्याभवनम्।
- साहा, विश्वरूपः। २००५। *नास्तिकदर्शनपरिचयः*। कलिकाता : सदेशः।
- मिश्रः, जगदीशः। २०१६। *भारतीय दर्शन (हिन्दीग्रन्थः)*। वाराणसी : चौखम्बासुरभारती-प्रकाशनम्।
- सेनः, देवव्रतः। २०१४। भारतीय दर्शन (वङ्गभाषीयो ग्रन्थः)। कलिकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# वेदे नारीनामधिकारविमर्शः

## सुचन्द्रा मुखर्जी

### प्रबन्धसारः

*परिवारव्यवस्था भारतीयसमाजस्य एकं मुख्यम् अङ्गं भवति। परिवारस्य च अङ्गद्वयं नारी पुरुषश्चेति। पुरुषं विना नारी यद्वा नारीं विना पुरुषः कदापि सम्पूर्णो भवितुं नार्हति। अतः परिवारे यद्वा समाजे नारीपुरुषयोरुभयोः समानाधिकारो दायभारश्च विद्यत एव। वैदिककाले नारीणां स्थानं यथार्थं सम्मानपूर्णमासीत्। समाजे ताभिः पुरुषवत् समानाधिकारोऽनुभूयते स्म। यथा धार्मिकाधिकारः, सामाजिकाधिकारः, शिक्षाप्राप्त्यधिकारः, सम्पत्तिसंक्रान्ताधिकारः स्वतन्त्रतायाः अधिकारः चेत्यादयः। एतेषामधिकाराणां विषये अस्मिन् प्रबन्धे यथामति चर्चा विहिता।*

### उपोद्घातः

भारतीयसमाजव्यवस्थायाः मुख्यत्वेन परिवार एव स्वीक्रियते। परिवारेऽस्मिन् मुख्यरूपेणाङ्गद्वयं विद्यते – पुरुषो नारी चेति। परस्परमङ्गद्वयमेकम् अपराश्रितमेवावतिष्ठते। अङ्गद्वयमिदं जीवनभूतस्य रथस्य चक्रद्वयमिव। चक्रद्वयेन सम्यक् गमनेनैव जीवनं प्रसन्नतामाप्नोति। एतत्तु सत्यं यत्सुदूरवैदिककालाद् भारतीयसमाजव्यवस्था पुरुषप्रधानासीत्, किन्तु सुष्ठु परिवारसञ्चालनाय नार्य्याः माहात्म्यं पुरुषवदासीत्। यतो हि पुरुषं विना नारी यद्वा नारीं विना पुरुषः कदापि सम्पूर्णो भवितुं नार्हति। अतः परिवारे यद्वा समाजे नारीपुरुषयोरुभयोः समानाधिकारो दायभारश्च विद्यत एव। वैदिककाले नारीणां स्थानं यथार्थं सम्मानपूर्णमासीत्। समाजे ताभिः पुरुषवत् समानाधिकारोऽनुभूयते स्म। यथा धार्मिकाधिकारः, सामाजिकाधिकारः, शिक्षाप्राप्त्यधिकारः, सम्पत्तिसंक्रान्ताधिकारः स्वतन्त्रतायाः अधिकारः चेत्यादयः। एतेषामधिकाराणां सविशदं वर्णनं निम्नधा क्रियते।

### धार्मिकाधिकारः

अथर्ववेदसंहितायामुक्तं यत् "शुद्धाः पूता योषितो यज्ञिया इमाः" इति। अर्थात् नारीभिः शुद्धाभिः पवित्राभिश्च यज्ञः करणीयः। अनेन स्पष्टं यद्वैदिककाले नारीणां धार्मिककार्येऽधिकारः आसीत्। स्त्रीः पुरुषश्चोभौ एकत्र यज्ञमकुरुताम्। ऋग्वेदे आम्नातं यत् स्त्री पुरुषेण सह यज्ञेऽसीदत्तथा च तासां स्त्रीणां यज्ञेऽधिकारः आसीत्। यथोच्यते – 'दम्पती समनसा सुनुतः' इति। स्त्रीं विहाय केनचित्पुरुषेण यज्ञः सम्पाद्यते चेत्स यज्ञः असम्पूर्णः भवतीति तैत्तिरीयब्राह्मणे समुपलभ्यते।[1] अत एव यज्ञस्य सफलतायै स्त्री पुरुषश्चोभयोः समानाधिकारः आसीत्। ऋग्वेदे स्पष्टरूपेण समुपलभ्यते यत्पतिः पत्नी च एकत्र देवतानां पूजामकुरुताम्। अत एवोच्यते – 'अञ्जन्ति दम्पती समनसा'।[2] तेन ज्ञायते यत्पत्नी पत्या समाना एव देवपूजायाम् अधिकारी आसीत्। अथर्ववेदसंहितायामपि स्पष्टतया उल्लिख्यते यत् पतिः पत्नी चोभौ एकत्र यज्ञसम्पादनम् अकुरुताम् – 'यतस्रुचा मिथुना या सपर्यतः'।[3] इत्थमुपर्युक्तवर्णनेन ज्ञायते यद्वैदिककाले धार्मिककार्ये नारीणां पुरुषाणां च समानाधिकारः आसीत्।

### सामाजिकाधिकारः

प्राचीनधर्मशास्त्रीयसामाजिकव्यवस्थायां कन्यायाः स्थानं पुत्रापेक्षया हीनम् इति मन्यते। अथर्ववेदानुसारं वैदिकयुगे पुत्रसन्तानप्राप्तौ पारिवारिकजनाः बहु आनन्दिताः भवन्ति स्म, किन्तु अस्य कथनस्य तात्पर्यं इत्थं न यत्पुत्रीसन्तानप्राप्तौ ते दुःखिताः भवन्ति स्म।

---

[1] तै.ब्रा. – ३/८/३१/२

[2] ऋ. – ४/३/१

[3] अथर्व. – २०/२४/०३

ISSN : 2583-2271
Vol. - I, No. 1: 2021

पुत्रवत् कन्यायाः अपि सर्वे संस्कारा भवन्ति स्म। निरुक्तानुसारं कन्यायाः कमनीयस्वभावत्वात् सर्वे तां स्नेहयन्ति स्म। "कन्या कमनीया भवति"।[4] वैदिकसाहित्ये गृहस्य वातावरणं शान्तं सुखमयञ्च कर्तुं पतिपत्न्योः मधुरसम्बन्धः अपेक्षित आसीत्। अथर्ववेदानुसारं नववधूः गृहप्रवेशकाले स्वकीयं पतिं वदति त्वं केवलं मे पतिस्तथा मां विहाय त्वयापरनार्योः नामोच्चारणं न करणीयम्। यथोच्यते – 'मम केवलो नान्यास्त्रीं कीर्तयाश्चन'।[5] तत्र ऋग्वेदानुसारं पत्या नववधूः प्रार्थयते यत्पत्नी गृहस्य सकलान् सदस्यान् निमन्त्रयेत् पारिवारिकसुखं समृद्धञ्च कुर्यात्।[6] तेन ज्ञायते यद्वैदिकसाहित्ये नारीणां परिवारनियन्त्रणस्य अधिकारः आसीत्।

**शिक्षाप्राप्त्यधिकारः**

वैदिकसाहित्याध्ययनेन ज्ञायते यत् तदा समाजे नारीणां शिक्षाव्यवस्था समुन्नता आसीत्। पुत्रवत् पुत्र्यः अपि शिक्षाग्रहणेऽग्रगण्याः आसन्। पुत्रीणां विवाहयोग्यतासम्पादनाय अध्ययनमनिवार्यम् आसीत्।[7] अतः स्वयं मातापितरौ कन्यां ब्रह्मचर्यजीवने प्रतिष्ठितामकुरुताम्। अध्ययनरतानां छात्राणां श्रेणीद्वयमासीत्। प्रथमं 'ब्रह्मवादिनी' अपरञ्च 'सद्योद्वाहा'। याः छात्रा आजीवनं दर्शनस्य ब्रह्मविज्ञानस्य चाध्ययनं कुर्वन्ति स्म ताः ब्रह्मवादिन्य उच्यन्ते तथा याः छात्र्यः विवाहस्य पूर्वपर्यन्तमध्ययनं कुर्वन्ति स्म ताः सद्योद्वाहा नाम्नाभिधीयते। कन्यानां कृते वेदध्यायनमनिवार्यमासीत्। कुतोहि यस्मात् ताः सर्वाः प्रातः सायं वैदिकप्रार्थनां कुर्वन्ति स्म। पत्या समञ्च ताः मन्त्रोच्चारणं यज्ञे कुर्वन्ति स्म। उच्चशिक्षायाः कृते ताः गुरुकुलं न गच्छन्ति स्म। समाजस्यारुचिकरमन्तव्यस्य भयात् तासां सर्वासां शिक्षाग्रहणस्य व्यवस्था गृहे एव भवति स्म। कन्याभ्यः धर्मस्य दर्शनशास्त्रस्य च शिक्षायाः कृते विशेषव्यवस्था आसीत्। तेन सह नृत्यगीतादीनां शिक्षाग्रहणमपि भवति स्म।[8]

**सम्पत्त्यधिकारः**

वैदिककाले नारी सम्पत्तिविषयका-धिकारतः उपेक्षिता आसीत्। विवाहकाले एव मातापितरौ कन्यायाः उपयुक्तपात्रेण सह सम्पर्कमकुरुताम्। यथासम्भवं वरपणं स्त्रीधनञ्च प्रदाय पतिगृहे प्रेषणमकुरुताम्। विवाहकाले पर्याप्तधनसम्पत्तिप्रदानत्वात्तस्याः कन्यायाः पितुः सम्पत्यामधिकारः नासीत्। उक्तञ्च ऋग्वेदे – "न जाये तान्वो रिक्थमारैक"।[9] किन्तु एतदपि स्पष्टरूपेण समुपलभ्यते यदविवाहितकन्यायाः पितुः सम्पत्यामुपरि यथार्थः अधिकारो विद्यते। यतोहि अविवाहितत्वात्तस्यै वरपणं स्त्रीधनञ्च किमपि विशेषधनरूपेण न दीयते स्म।[10] विषयेऽस्मिन् अविवाहितकन्यायाः भरणपोषणं पिता करोति स्म। पितुः मातुश्च मरणानन्तरं सम्पत्त्याः अधिकारः कन्याया एव।

**स्वतन्त्रतायाः अधिकारः**

वैदिककाले नारीणां कस्मिंश्चित् क्षेत्रे स्वतन्त्रता आसीत्। पतिचयनविषये तासां स्वतन्त्रता आसीत्। कन्या स्वेच्छया पतिचयनं करोति स्म तथा चितवरेण सह तस्याः विवाहो भवति स्म। ऋग्वैदिककाले स्वयंवरस्योल्लेखः समुपलभ्यते – "भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं कृणते जने इत्"।[11] आत्मविश्वासेन स्वमतोपस्थापनाय तदा नववधूभ्यः आशीर्वादप्रदानस्य व्यवस्था आसीत्।[12] एवं स्पष्टं

---

[4] निरुक्तम् – ४/२४

[5] अथर्व. – ७/३७

[6] ऋ. – १०/८५/४६

[7] अथर्व. – ११/५

[8] तै.सं. – ६/५/१०

[9] ऋ. – ३/३१/२

[10] तदेव – २/१७/७

[11] तदेव – १०/२७/०२

[12] तदेव – १०/८५/२६

यद्वैदिकयुगे नारीणां सभायां स्वमतदानस्य स्वतन्त्रता आसीत्।

इत्थमुपर्युक्तवर्णनेन ज्ञायते यद्वैदिककाले नारीणां मर्यादापूर्णं सम्मानजनकं च स्थानमासीत्। पुत्र-पुत्रीणां समानरूपेण पालनपोषणे सति समाजस्य पितृतान्त्रिकत्वात् पुत्राणां दायभारः समाजेऽधिक आसीत्। तथापि तदा नारीणामधिकारः पुरुषाणां समानमासीत्तत्तु स्वीकरणीयमेव इति दिक्।

## सहायकग्रन्थाः

### Primary Sources:


- *Yajurveda kā Subodhabhāṣya*. Ed. by Sripad Damodar Satavlekar. Swadhyay Mandal : Pardi, 1989.
- *Yajurvedabhāṣyam*, Commentary of Maharshi Dayananda Sarasvati, Manav Utthan Sankalpa Sansthan : Delhi, 2010.


### Secondary Sources :


- Dwivedī, Dr. Kapildev. *Vaidika Sāhitya evam Sanskṛti*. Varanasi : Vishvavidyalay Prakashan, 2008.
- Goyel, Dr. Pritiprabha. *Bhāratīya Saṃskṛti*. Jodhapur : Rajasthani Granthagar, 2008.
- Panta, Dr. Lajja. “Vedeṣu Nārīśaktiḥ.” *Prācyavidyānusandhānam,* Year 9, Issue 1 (2014): 37-39.
- Ram, Dr. Babu. “Veda aura Nārī.” *Vedavidyā,* Vol :XXI, Jan - Jun (2013): 155-159.
- Upadhyay, Baldev. *Sanskṛta Vāṅmaya kā bṛhad itihāsa*. Lucknow : Uttar Pradesh Sansthan, 2012.
- Upadhyay, Baldev. *Vaidika Sāhitya aura Sanskṛti.* Varanasi : Sharda Sansthan, 1998.

# देवीसूक्ते सृष्टिप्रक्रिया

## निमाइ साँतरा

### प्रबन्धसारः

*सह-इनि+ष्यञ् प्रत्यययोगेन क्लीवलिङ्गे प्रथमाविभक्तौ एकवचने साहित्यम् इति पदं निष्पन्नं भवति। संस्कृतभाषामवलम्ब्य रचितं यत् साहित्यं तत् संस्कृतसाहित्यम्। संस्कृतसाहित्यं त्रिधा विभक्तं - वैदिकसाहित्यं लौकिकसाहित्यं वैज्ञानिकसाहित्यं च। वैदिकसाहित्यं चतुर्द्धा विभक्तम् - संहिता ब्राह्मणं आरण्यकम् उपनिषद् च। तन्मध्ये संहिता चतुर्द्धा विभक्ता - ऋग्वेदः सामवेदो यजुर्वेदोऽथर्ववेदश्चेति। तन्मध्ये ऋग्वेदसंहितायाः विषयवस्तुवैचित्रं ज्ञानभाण्डारपरिपूर्णम्। तत्र यथा देवताधर्मादिविषयात्मकं सूक्तं प्राप्यते तथैव जगत्सृष्टिभावनालम्बितं दार्शनिकचिन्तासमृद्धं सूक्तमपि दृश्यते। सूक्तेषु मन्त्राः सन्ति। मन्त्राः त्रिविधाः - प्रत्यक्षकृतं परोक्षकृतं आध्यात्मिकं च। तन्मध्ये आध्यात्मिकमन्त्राः स्वल्पासंख्यकाः दृश्यन्ते। आध्यात्मिकसुक्ते 'अहम्' सर्वनामेन कविः भाषणं करोति। ऋग्वेदस्य अल्पसंख्याविधातृनामाध्यात्मिकसूक्तानां विशिष्टभावनासमृद्धं वैचित्र्यात्मकं देवीसूक्तम्। देवीसूक्ते ऋषिः आम्भृणी वाक्। वाक्देवी रूद्रादिदेवात्मना चरति मित्रावरुणादीन् च देवान् धारयति। वाक्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत् विवर्त्तते। इमे दर्शनप्रसिद्धा अर्था देवीसूक्ते प्राप्यन्ते। सूक्तमिदं चातिवादृतं लोकसमाजे देवीनामाङ्कितत्वात्, वङ्गदेशेषु देवीपूजायां प्रयुज्यत्वात्, देव्याः परमात्मनश्च एकात्मकत्वात्।*

आर्यमनीषिणः उज्ज्वलप्रभास्वरूपाया ऋग्वेदसंहिताया विषयवस्तुवैचित्र्यं ज्ञानभाण्डारपरिपूर्णम्। अत्र यथा देवताधर्मादिविषयात्मकं सूक्तं प्राप्यते तथैव जगत्सृष्टिभावनावलम्बितं दार्शनिकचिन्ता-समृद्धं सूक्तमपि दृश्यते। एतानि सूक्तानि वैदिकर्षीणां सृष्टितत्त्वविषयकानि।

यास्काचार्येण वैदिकमन्त्राः प्रत्यक्षकृत-परोक्षकृत-आध्यात्मिकभेदेन त्रिधा विभक्ताः। तथाहि उच्यते– "तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिकाश्च"[1]। एतादृशानां मन्त्राणां मध्ये प्रत्यक्षकृताः परोक्षकृताश्च मन्त्रा वेदे दृश्यन्ते, परन्तु आध्यात्मिकमन्त्राः अतीवाल्पा लभ्यन्ते। तथाहि उच्यते–"परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठाः आल्पश आध्यात्मिका:"[2]। आध्यात्मिक-सूक्तस्य वैशिष्ट्यं भवति यत्- अत्र उत्तमपुरुषस्य 'अहम्' अनेन सर्वनाम्ना कविः भाषणं करोति। ऋग्वेदस्य अल्पसंख्याविधृता-नामाध्यात्मिकसूक्तानां विशिष्टभावनासमृद्धं वैचित्र्यात्मकं देवीसूक्तम्।

ऋग्वेदस्य दशममण्डले वागाम्भृणीयं सूक्तं श्रूयते। अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी सूक्तेनानेन स्वात्मानम् अस्तौत्। तथाहि उच्यते - "अनृमष्टौ वागाम्भृणी तुष्टावात्मानम्"[3]। सच्चित्सुखात्मकः सर्वगतः परमात्मा एव देवता। तेन परमात्मना तादात्म्यमनुभवन्ती ह्येषा वाक्, सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वम् अभवमिति स्वात्मानं स्तौति। उच्यते - "वाङ् नामाम्भृणी। अम्भृणस्य महर्षेः पुत्री। आत्मानं तुष्टाव।

[1] नि. ८/१/१-३

[2] नि.

[3] सर्वाणु

ISSN : 2583-2271
Vol. - I, No. 1: 2021

सेयमेवर्षिका देवता चेत्यर्थः।"[4] आध्यात्मिकमिदं सूक्तम् उत्तमपुरुषयोगात् ऋषिदेवताया अभेदप्रतिपादनाच्च। तथा चोक्तम् – "उत्तमस्य तु वर्गस्य यः ऋषिः सैव देवता" इति।

वाग्देवी रुद्रादिदेवात्मना चरति, मित्रावरुणादीन् च देवान् धारयति। वाक्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत्, शुक्तौ रजतमिव अध्यस्तं सद् दृश्यते। मया च जगदाकारेण विवर्तते। तदा हि ब्रह्मणः तत्तदुपाध्यवच्छेदेन रुद्रादिदेवतारूपेण भेदावभासः किञ्च सा वाक् स्वभक्तेभ्यः धनादिकं प्रयच्छति। "अहं दधामि द्रविणं हविष्मते। सुप्राव्ये यजमानाय सुन्वते।"

ईश्वरो हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान् विदधन्, देशकालाविशेषाभिज्ञतां कर्मिणां कर्मानुरूपं फलं प्रयच्छति। तदुक्तं – "फलमत उपपत्तेः"[5]।

अद्वितीयब्रह्मस्वरूपा सा आत्मानं राष्ट्रीति निर्दिशति- "अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्"[6] इति। परमात्मा हि समग्रस्य सृष्टिप्रपञ्चस्य नियन्ता आत्मनः एव शक्त्या इन्द्रियाणां व्यापारवत्वम्। उच्यते – "मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ई श्रृणोत्युक्तम्"[7] इति। ब्रह्मणः शक्त्या एव सर्वे शक्तिमन्तः। अत एव स्वात्मतया ब्रह्म ज्ञातवती अम्भृणतनया आह – "श्रुधि श्रुतश्रद्धिवं ते वदामि"[8] इति।

कारणभूते परमात्मनि वियदादिकार्यजातं सर्वं वर्तते – तन्तुषु पट इव। परमात्मा च कारणभूतेन मायात्मकेन देहेन कृत्स्नं विकारजातं व्याप्नोति। यथा वायुः परेणाप्रेरितः स्वेच्छया इव प्रवाति तद्वत् ब्रह्माभिन्ना वागपि सर्वाणि भूतजातानि कारणरूपेण उत्पादयन्ती परेण अनधिष्ठिता प्रवर्तते। सर्वस्मात् विकारजातं परस्तात् विद्यमाना सा असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपं महिम्ना एतत् सर्वं भूत्वा स्थिता। इमे दर्शनप्रसिद्धा अर्था देवीसूक्ते प्राप्यन्ते। सूक्तमिदं चातीवादृतं लोकसमाजे देवीनामाङ्कितत्वात्, बङ्गदेशेषु देवीपूजायां प्रयुज्यत्वात्, देव्याः परमात्मनश्च एकात्मत्वात्।

निघण्टौ वाङ्नामासौ गौरी इति पठ्यते। गोरीति देव्या अपि समाख्यानम्। तेन एषा सूक्तद्रष्टी वाक् अम्बिकैव इति वृद्धव्यवहारः। सप्तसतीपाठाङ्गजपे सूक्तस्यास्य विनियोगो दरीदृश्यते। शक्तिस्वरूपाया अम्बिकायाः शक्तिमत ईश्वरस्य च पारमार्थिको भेदो नास्तीति सूक्ते प्रतिपादितम्। अत एव एकैवाहं जगत्यत्र (चण्डी) इत्युक्तिः सङ्गच्छते। उत्तरकाले वैष्णवदर्शनस्य यो भक्तिवादो दृश्यते तस्यैव सूचना अत्र लक्ष्यते – इति चास्य सूक्तस्य अभिमतत्वे कारणम्।

वाग्देवीमुद्दिश्य अपरापि ऋग्दृश्यते दशममण्डले।[9] उक्तं चास्मिन् सूक्ते भद्रैषा लक्ष्मीर्निहिताधिवाचि विश्वव्यापिन्यां वाचि लक्ष्मीः निहितेति।

भर्तृहरिणा वाक्यपदीये ग्रन्थे उच्यते यं वयम् उपनिषदि ब्रह्मतत्त्वेन जानामि, सा तु वाक् इदं जगत् च तस्या एव विवर्तितं प्रक्रियामात्रम्। उच्यते - "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति।

अथर्ववेदे पाठान्तरसहितं देवीसूक्तं प्राप्यते। तत्तु वाग्देवीसूक्तरूपेण परिचितमस्ति। सूक्तस्यास्य आथर्वणिककर्मणि तथा गृह्यकर्मणि विनियोगः प्राप्यते।

---

[4] षड्गुरु.

[5] ब्र.सू.

[6] ऋ. सं. १०/१२५/३

[7] ऋ.सं. १०/१२५/४

[8] ऋ. सं. १०/१२५/४

[9] ऋ.सं. १०-७१

मेधाजननकर्मणि तथा शिशोः प्राग्भाषणात् आचरितकर्मणि सूक्तस्यास्य विनियोगो दरीदृश्यते।

याज्ञिकधारायां सूक्तमिदं स्वल्पे प्रयोगे सति पौराणिकदेवीपूजायां सूक्तस्यास्य अतीवगभीरं गुरुत्वं परिलक्ष्यते चण्डीपाठकाले देवीसूक्तमवश्यपठनीयमिति निर्देशः अस्ति। तथाहि उच्यते - "रात्रिसूक्तं जपेदादौ मध्ये चण्डीस्तवं पठेत्। प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमः"[10] इति।

मार्कण्डेयपुराणे कथ्यते सरथसमाधिश्च जगन्मातुः सम्यग्दर्शनलाभार्थं नदीतीरे अवस्थानकाले देवीसूक्तपाठेन तस्य भावार्थानुधावनेन तपस्यारतौ अभवताम्- "स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्।" इति।

### सहायकग्रन्थाः


- अथर्ववेदः, दुर्गादासलाहिडीशर्मा (सम्पा.), आजमीडवैदिकयन्त्रालयः।
- आपस्तम्बश्रौतसूत्रम्, टि. टि., श्रीनिवासगोपालाचार्यः (सम्पा.), माइसोर, १९५४
- ऋग्वेदसंहिता, एन्. एस्. सोनटाक्का (सम्पा.)। वैदिकसंशोधनमण्डल
- ऐतरेयारण्यकम्, ए. वि. कीथ् (सम्पा.)। अक्सफोर्ड, १९०९
- छान्दोग्योपनिषद्, दुर्गाचरणसांख्यवेदान्ततीर्थः (सम्पा.), कलिकाता, १३२७
- तैत्तिरीयसंहिता, महादेवशास्त्री (सम्पा.), माइसोर, १८९८
- तैत्तिरीयोपनिषद्, इ. आर्. रोयारः (सम्पा.), मीइसोर, १८५०
- तैत्तिरीयारण्यकम्, ए. महादेवशास्त्री (सम्पा.), माइसोर, १९००
- निरुक्तम्, विनायकगणेश आप्टे (सम्पा.)। आनन्द् आश्रम, १९२१
- ब्रह्मसूत्रम्, दुर्गाचरणसांख्यवेदान्ततीर्थः (सम्पा.), कलिकाता
- बृहदारण्यकोपनिषद्, मेजोर वि. डि. वसुः (सम्पा.), एलाहावादः, १९९६
- बौधायनश्रौतसूत्रम्, डब्लिउ. कालाण्ड (सम्पा.), कलिकाता, १९०९


10 म.क.व.

 ISSN : 2583-2271
Vol. - I, No. 1: 2021

# वर्णानां सृष्टिप्रक्रियाविचारः

**सुप्रिया-सुइ**

**प्रबन्धसारः**

*ऋग्वेदस्य काले त्रयः वर्णाः समाजे आसन्। ते यथा - ब्राह्मणः , क्षत्रियः , विशुः। ऋग्वेदस्य अन्तिमांशे पुरुषसूक्ते शूद्राणाम् उल्लेखः प्राप्यते। चत्वारः वर्णाः विराट्पुरुषादेव जायन्ते स्म इति मतं प्रचलितमासीत्। पुनः गीतायां वर्णितमस्ति यत् गुणाधारेण कर्माधारेण च भगवान् श्रीकृष्णः स्वयमेव वर्णाः सृष्टा इति। **"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः"** गीता (4.13)। गुणाः इत्युक्ते सत्त्वं , रजः , तमः। गुणत्रयानुसारेण हि वर्णाः सृष्टाः। ब्राह्मणाः सत्त्वप्रधानाः , क्षत्रियाः रजोगुणप्रधानाः , वैश्याः तमउपसर्नरजोगुणप्रधानाः , एवं शूद्राः तमोगुणप्रधानाः। कर्माधारेण हि वर्णाः सृष्टाः इत्युक्ते सत्त्वप्रधानस्य ब्राह्मणस्य शमो दमस्तपः चेत्यादीनि कर्माणि। रजःप्रधानस्य क्षत्रियस्य शौर्यं, तेजः प्रभृतीनि कर्माणि। तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि। तमः प्रधानस्य शूद्रस्य शुश्रुषैव कर्मः इत्येवं उक्तम्। अतः वैदिककाले वर्णभेदः आसीत् एतत् सत्यम्। किन्तु जातिभेदः नासीत्। शनैः शनैः वर्णभेदः गुणः एवं कर्म त्यक्त्वा जन्माधारेणैव प्रचलित आसीत् इति नास्ति संशयः।*

प्राचीनकाले भारतवर्षे वर्णव्यवस्था महत्वपूर्णं स्थानम् अलभत। समाजस्थितानां जनानां कृते कार्यस्य समुचितं विभागं कर्तुं शास्त्रकाराः विविधान् विभागान् अकुर्वन्। समाजस्य विकाशाय एतादृशो विभाग आवश्यक आसीत्। 'वर्ण'-शब्दस्य विविधाः व्युत्पत्तयः अपि दृश्यन्ते। वृञ् वरणे इति धातोः वर्णशब्दस्य उत्पत्तिः। चयणम् वरणम् वा अस्य अर्थः। समाजशास्त्रानुसारं वर्णो नाम वर्गः। प्राचीनकाले जनाः स्वस्वेच्छानुसारेणैव तेषां वृत्तीनां चयनं कुर्वन्ति स्म। तेषां वृत्त्यनुसारेण हि वर्णविभागः अभवत्। अमरकोषे वर्णशब्दस्य त्रयः विभागाः सन्ति। तद्यथा -'वर्णो द्विजादौ, शुक्लादौ, स्तुतौ वर्ण तु चाक्षरे' इत्यमरः।

'आर्यवर्णः' 'दासवर्णः' चेति द्वौ विभागौ ऋग्वेदीयसमाजे आस्ताम्। तेषां शारीरिकः तथा सांस्कृतिको भेदः स्पष्टतया आसीत्। अतः आर्याः अनार्यान् 'कृष्णत्वक्', 'कृष्णगर्भः', 'मृध्रवाक्', 'अकर्मन्', 'अदेवयुः', 'अब्रह्मण, 'अव्रत', 'अन्यव्रत', 'देवपेयुः', 'शिशनदेवः' नाम्नापि आख्यातवन्तः। परन्तु यं विषयमाधारीकृत्य कृष्णवर्णः गौरवर्णश्चेति वर्णविभागो भवति स्म स आधारो वस्तुतो युक्तियुक्तो नासीत्। आर्याणां भारतवर्षे आगमनात् प्रागपि कतिपयजनाः अत्र निवसन्ति स्म। ते जनाः भारतवर्षस्य प्रकृतवास्तव्या आसन्। परवर्तिनि काले आर्याणां भारतवर्षं प्रति आगमनात् परं द्वयोर्मध्ये युद्धम् अभवत्। युद्धे आर्याः जयलाभं चक्रुः। आर्येणैव विजिताः अनार्याः (प्रकृतवास्तव्याः) शूद्राः अभवन्। पुरोहिताः विजितद्रव्याणां सर्वबृहत् अंशम् अलभन्। शनैः शनैः अस्माकं समाजः तिसृषु श्रेणीषु विभक्ताः अभवन्। यथा - पुरोहिताः, योद्धारः, साधारणजनाश्च। बहुदिवसानन्तरम् ऋग्वेदस्य अन्तिमांशे शूद्राणामुल्लेखो दृश्यते। प्राचीने भारतीयदर्शने वर्णानाम् उत्पत्तिविषये नानाविधा मतवादाः सन्ति।

### दैवीमतवादः

पुरुषसूक्तानुसारेण, विराटपुरुषात् हि वर्णाः सृष्टः। तद्यथा,

ISSN : 2583-2271
Vol. - I, No. 1: 2021

"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥"
(ऋग्वेदः - १०/९०/१२)

अर्थात्, विराड्पुरुषस्य मुखात् ब्राह्मणाः, बाहुभ्यां क्षत्रियाः, ऊरुभ्यां वैश्याः पद्भ्यां च शूद्राः अजायन्त।

महाभारते शान्तिपर्वणि वर्णितमस्ति यत् ब्रह्मणो वर्णा अजायन्त -

"ब्राह्मणो मुखतः सृष्टो ब्रह्मणो राजसत्तम।
बाहुभ्यां क्षत्रियः सृष्टः ऊरुभ्यां वैश्य एव च॥"
"वर्णानां परिचर्यार्थं श्रयाणां भरतर्षभ।
वर्णश्चतुर्थः संभूत पद्भ्यां शूद्रो विनिर्मितः॥"

मनुस्मृतौ अपि तथैव समर्थितम्। तथाहि तत्रोक्तं,

"लोकानां तु विवृध्यर्थं मुखबाहुरूपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्त्तयत्॥
लोकाणां सृजनार्थं ब्रह्मणा चत्वारः वर्णाः सृष्टाः।"
(१.३१)

विष्णुपुराणानुसारेण, विष्णुना वर्णाः सृष्टाः-

"त्वन्मुखाद्ब्राह्मणास्त्वत्ते बाहोः क्षत्रमाजयत।
वैश्यास्तवोरुजाः शूद्रास्तव पद्भ्यां समुद्गताः॥"

मत्स्यपुराणं, वायुपुराणं, ब्रह्माण्डपुराणञ्च वर्णानां दैव्युत्पत्तिविषयकं मतवादं स्वीचक्रुः। किन्तु, आधुनिकगवेषकाः दैवीयमतवादा-पेक्षया गुणेन कर्मणा च वर्णानाम् उत्पत्तिम् आधिक्येन स्वीकृतवन्तः। गीतायां वर्णितमस्ति भगवान् श्रीकृष्णः गुणकर्माधारेण वर्णविभागं कृतवान् -

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥"
(गीता-४.१३)

## गुणानुसारेण वर्णव्यवस्था

पूर्वं गुणानुसारेणैव वर्णव्यवस्था स्वीकृता आसीत्। गुणानुसारेण हि ब्राह्मणः क्षत्रियः वैश्यः शूद्रः चेति चत्वारः विभागाः समाजे आसन्। तदा जनसंख्या अधिका नासीत्। ते सर्वे सुखेनैव जीवनं निर्वहन्ति स्म। किन्तु कालक्रमेण जातिभेदप्रथा केवलं जन्मगता वंशगता वा अभवत्। वर्तमानकाले समाजे वर्णानां विविधाः विभागाः सन्ति । भगवान् श्रीकृष्णः गीतायामेवम् उक्तम् -

"ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥"

अर्थात् सः (श्रीकृष्णः) गुणेनैव वर्णानां सृष्टिः अकोरत्। किन्तु, अस्य मन्त्रस्य त्रिविधाः अर्थाः सन्ति ।

A. **प्रथमतः,** गुणाः इत्युक्ते सत्त्वः, रजः, तमः चेति। त्रिगुणेनैव ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः चेति चत्वारः वर्णाः अजायन्त।

१. सत्त्वः (मुख्यः) = ब्राह्मणः ।
२. रजः (मुख्यः) = क्षत्रियः ।
३. रजः (मुख्यः) + तमः (गौणः) = वैश्यः ।
४. तमः (मुख्यः) = शूद्रः।

तेषां कर्माणि अपि गुणाश्रितानि। तत्र सात्त्विकस्य सत्त्वःप्रधानस्य ब्राह्मणस्य शमो दमः तपः चेत्यादीनि कर्माणि। सत्त्वोपसर्जन-रजःप्रधानस्य क्षत्रियस्य शौर्यं तेजः प्रभृतीनि कर्माणि। तमउपसर्जन-रजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि रजउपसर्जनतमः प्रधानस्य शूद्रस्य शुश्रुषैव कर्म इत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टम् इत्यर्थः ।

B. **द्वितीयतः,** पूर्वजन्मार्जितस्वभावेनैव प्रभावान्वितगुणानुसारेण वर्णाः अजायन्त एवमपि उक्तम्। वर्तमानकाले मनुष्याणां कर्माणि पूर्वजन्मकृतकार्यानुसारेण अभवन्। एवं मतं प्रचलितमासीत्।

C. **तृतीयतः,** संस्कारवशात् गुणस्य विकाशेन हि समाजे मनुष्याणां चत्वारः विभागाः - एवं मतमपि आसीत्।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

**कार्यानुसारेण वर्णविभागः**

ऋग्वेदे वर्णितमस्ति प्राचीनकाले भारतवर्षे द्वौ वर्णौ आस्ताम् आर्यः, अनार्यः/ दासवर्णः चेति। यदा आर्याः भारतवर्षम् आगतवन्तः तदनन्तरं ते कर्माधारेणैव वर्णविभागं अकुर्वन् । यथा-

१. **ब्राह्मणाः - यज्ञकारी ।**

२. **क्षत्रियाः - योद्धाः ।**

३. **विश/ विशु - व्यावसायीः ।**

बहुदिवसानन्तरं शूद्राः आगतवन्तः। तेषां कार्यमासीत् द्विजातिशुश्रूषा तदा वंशः कुलं वा प्रधानं न। अपितु, उच्चकुलोत्पन्नाः जनाः यदि अकर्म सम्पादयन्ति तर्हि अवश्यमेव स्वस्थानात् विच्युताः अभवन्। कर्मानुगुणं नीचकुलोत्पन्नाः जनाः अपि श्रेष्ठाः भवितुं शक्नुवन्ति स्म। कुलस्तु उच्चः नीचो वा भवितुम् अर्हति। यत्र वंशे श्रेष्ठा परम्परा प्रचलिता आसीत् स उच्चः। पुनः यत्र निकृष्टतमपरम्परा प्रचलिता आसीत् स हि नीचः कुलः। अतः वर्णव्यवस्था जन्माधारिता न अपितु कर्माधारिता आसीत्। महाभारते वनपर्वणि अस्य मतस्य उल्लेखः अस्ति। यथा-

"एकवर्णमिदं पूर्वं विश्वमासीद् युधिष्ठिर।
कर्मक्रियाविभेदेन चातुर्वर्ण्यं प्रतिष्ठितम्॥"
"सर्वे वै योनिजा मर्त्याः सर्वे मूत्रपुरोषजाः।
एकेन्द्रियेन्द्रियार्थवाश्च तस्माच्छीलगुणैर्द्विजः॥"
"शूद्रोऽपि शीलसम्पन्नं गुनवान्ब्राह्मणो भवेत्।
ब्राह्मणोऽपि क्रियाहीनः शूद्रात् प्रत्यवरो भवेत्॥"
(महाभारतस्य वनपर्वणि)

**गीतायाम् उक्तम् -**

"स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्म नियतः सिद्धिं यदा विन्दति तच्छृणु॥"

अस्माकं भारतवर्षे वर्णव्यवस्था आसीत् एतत् सत्यम् । किन्तु, तथाकथितविद्वद्जनाः समाजस्य सुष्ठु परिचालनार्थम् एवं विभागान् अकुर्वन्। किन्तु, साधारणजनाः किमर्थम् एतन्मतम् अनुकुर्युः? अतः विद्वज्जनाः दैवीय-आधारं स्वीकृतवन्तः। यतः तदा समाजे धर्मभीरुलोकाः अधिका आसन्। अतः ते अवश्यमेव तत् मतं स्वीकुर्वन्ति स्म एवं आचरन्ति स्म इति आशयः। किन्तु, शनैः-शनैः एते विभागाः जन्माधारेणैव प्रचलिता अभवन्। वर्तमानकालेऽपि समाजे वर्णविभागः अस्ति। किन्तु, इदानींकाले अस्य नाम **वर्णभेदः** न अपितु **जातिभेदः** इति नामान्तरम्। वर्तमानकाले जातिभेदः एकः सामाजिकः अभिशापः । जनाः एवं स्वीकर्तुं न इच्छन्ति -

"न चर्मणो न रक्तस्य मांसस्य न चास्थिनः।
न जातिरात्मनो जातिव्यवहार प्रकल्पिता॥"
(निरावलम्बोपनिषद्)

अर्थात् जातिः कदापि चर्मणा रक्तमांसेनैव न भवति । न हि आत्मना भवति । केवलं लोकव्यवस्थापनार्थं हि विद्वद्जनाः प्राचीनकाले वर्णविभागं अकुर्वन्।

**सहायकग्रन्थाः**


- ऋग्वेदसंहिता- अनु. रमेशचन्द्रदत्त, हरफ प्रकाशनी, कलकाता, २०११
- श्रीमद्भगवद्गीता – स्वामी सत्यानन्दः, श्री श्री रामकृष्ण आश्रमः, २ नं प्राणकृष्ण आद्यलेन, कलिकाता, २००६।
- मनुसंहिता – सम्पा. मानवेन्दु वन्द्योपाध्यायः, संस्कृत पुस्तक भण्डार, कलकाता, १४१०।
- महाभारतम् – अनु. रामनारायणशास्त्री, गीताप्रेस, गोरखपुर, २०४४-विक्रमाब्दः।
- अर्थशास्त्रम् – सम्पा. अनिलचन्द्र वसु, संस्कृत बुक डिपो, कलिकाता, २००५
- विष्णुपुराणम् – टीका. शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
- Who were the Sudras - B. R. Ambedkar, Annals of the Bhandarkar Oriental Research Institute, 30 (1-2)
- Caste in India (4th edition) - Hutton, John H., London (Oxford University press), 1963.

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# दर्शनशास्त्रदृष्ट्या शिक्षकचरितसमीक्षा

**गौराङ्ग-शो**

**प्रबन्धसारः**

*विद्या तु धर्मार्थकाममोक्षाणां पुरुषार्थानां लाभस्य अनन्य उपायः। एषा विद्या शिक्षकस्य समीपे एव लभ्यते। शिक्षा दूरीकरोति हृदयान्धकारम्। हृदये आलोकिते आत्मसचेतनता समागच्छेत्। अत एव विद्यादानेन तुल्यं नास्ति किमपि दानम्। शिक्षको हि ज्ञानाञ्जनशलाकया उन्मीलयति शिक्षार्थिनो ज्ञाननेत्रम्। अत्र प्रश्नो भवेत् कः शिक्षक आचार्यो वा? वस्तुतः शिक्षां ददाति यः स एव शिक्षकः। आ जन्मनो जनो यस्मात् यस्मात् यत् किमपि शिक्षते विजानाति वा स एव तस्य शिक्षकतया मान्यः। शिक्ष्-धातोः परं ण्वुल्-प्रत्ययेन शिक्षक इति रूपं प्राप्यते। ये तु ऋजुमतयः, विनीताः, वृद्धाः, ज्ञानिनः, अदम्भाः, निर्लोभाश्च ते हि आचार्यपदवाच्याः। यमवलम्ब्य वयमस्माकं जीवनगतेः परिचालनं कुर्मः, स इव भवितुं वयं सर्वदा मनसि चेष्टां कुर्मः, स एव अस्माकम् आदर्शः। प्रतिमूर्तिः यथा मूर्तेः अनुरूपा भवति तथैव वयमादर्शस्य अनुरूपा भवामः। प्रतिमूर्त्या सह मूर्तेः यः सम्बन्धः, अस्माकं जीवने आदर्शेन सह स एव सम्बन्धः। वयं यत् किमपि कुर्मः तत्तु अस्माकमादर्शस्य अनुसरणस्य फलम्। एतत् कार्यं वयं सर्वे एव कुर्मः। आदर्शस्य अनुसरणं न करोति एवं मनुष्यो दुर्लभः। छात्रा आदर्शशिक्षकस्य चरित्रमवलम्ब्य स्वजीवननिर्माणं कुर्वन्ति। अतः छात्राणां जीवननिर्माणे आदर्शशिक्षकस्य अस्ति महती भूमिका। आदर्शशिक्षकस्य चरितस्य बहूनि वैशिष्ट्यानि बहुत्रैव प्रदर्शितानि। दर्शनशास्त्रे शिक्षकचरितमालोचितम्। दर्शनेष्वपि दृश्यते सत्यपि तेषां बाहुविध्ये प्रत्येकमेव दर्शने तत्तद्दर्शनीयतत्त्वग्राहकतयाभ्युपगम्यत एव गुरुः। दर्शनेऽपि न हि गुरुमृते यथार्थं दर्शनम्। अतिदुर्गमे हि वर्त्मनि तमोबहुले बहुतत्त्वशराकीर्णे भवति बुद्धिर्भ्रमैरशुद्धा, अतस्तादृशे दुरत्यये दर्शनमार्गे गुरुः प्रमादीपप्रभाप्रदानेन नयति शिष्यमुपेयम्।*

भारतीयदर्शनानि निखिलानि एव दुःखदाहकोपायोपदेशकानि। किन्तु न हि दर्शनस्थस्य उपदेशस्य ज्ञानसामान्येनैव भवन्ति दुःखानि दग्धानि, अपि तु तत्तदुपदेशदातृतया अपेक्ष्यते कश्चन पुमान्, यो हि स्वानुभूतं परस्मिन् सञ्चारयितुं प्रभवति, स हि स्वयं तत्त्वमनुभूय परं बोधयति, ततः प्रत्येकं दर्शने एव तत्त्वानुभावकतयाभ्यर्च्यते आचार्यपदम्। यथोक्तं शङ्कराचार्येण ‘क्षणमिह सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका’ इति। तादृशमाचार्यमृते दुरुद्धरदर्शनतत्त्वो-द्धारेण दुःखपारावारादुद्धारो दुश्शकः। अत एव अतत्त्वज्ञो विनीतः सन् आचार्यं प्रार्थयते –

“दुर्वारसंसारदावाग्नितप्तं दोधूयमानं दुरदृष्टवातैः।
भीतं प्रपन्नं परिपाहि मृत्योः शरण्यमन्यं यदहं न जाने॥”[1] इति।

सकलतत्त्वानुभावक आचार्योऽत एव प्रत्येकं दर्शने एवमखिलाभ्युदयमूलतया अङ्गीकृतः। अत्र तु कतिपयदर्शनानुसारेणैव तदाचार्यतत्त्वं प्रतिपाद्यते अधस्तात्।

## अद्वैतवेदान्तदर्शनदृष्ट्या

अद्वैतवेदान्तदर्शने साधनचतुष्टयसम्पन्नस्य अधिकारिणः शिष्यस्य गुरूपसत्तिरपेक्षिता। अत एव मुण्डकोपनिषदि एवमाम्नातम् –

“तद्विज्ञानार्थं स गुरुमेव अभिगच्छेत्।

---

1 विवेकचूडामणौ ३८

समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥"[2]इति।

वेदान्तसारे चोक्तम् –

"अयमधिकारी जननमरणादि-संसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति।"[3] इति।

दर्शनान्तरे इव एतद्दर्शने अपि गुरुं विना ब्रह्मविद्याधिगमो न सम्भवति, गुरुणा तदर्थमधिगततद्विद्येन भाव्यं भवति। अत एतद्विद्यागुरुर्वेदवेदाङ्गपारगो वेदान्तार्थ-पारङ्गमश्च स्यात्, अपि च "यश्च श्रोत्रियोऽवृजिनोऽकामहतः"[4] इति श्रुतेः गुरोरकामतत्त्वावृजिनत्वगुणौ अपि अपेक्षितौ।

विवेकचूडामणावपि एतादृश-गुरूपसर्पणमेवोपदिष्टम्–

"अतो विमुक्त्यै प्रयतेत विद्वान्
सन्न्यस्तबाह्यार्थसुखस्पृहः सन्।
सन्तं महान्तं समुपेत्य देशिकं
तेनोपदिष्टार्थसमाहितात्मा॥"[5] इति।

गुरुप्रयोजनञ्च प्रतिपादितं तत्रैव –

"विषयमार्गैर्गच्छतोऽनच्छबुद्धेः
प्रतिपदमभियातो मृत्युरप्येष विद्धि।
हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या
प्रभवति फलसिद्धिः सत्यमित्येव विद्धि॥"[6] इति।

**वैष्णवदर्शनदृष्ट्या**

दर्शनान्तरे इव वैष्णवे दर्शने अपि गुरुतत्त्वं निपुणं वर्णितम्। अत्र च गुरोः कृष्णरूपत्वं प्रतिपादितम्। यथोक्तं चैतन्यचरितामृते –

"गुरु कृष्ण रूप हन शास्त्रेर प्रमाणे।
गुरुरूपे कृष्ण कृपा करेन भक्तगणे॥" इति।

अस्यार्थः, शास्त्रमत्र प्रमाणं यद् गुरुः कृष्णरूपो भवति, कृष्णश्च गुरुरूपेण भक्तेषु कृपां कुरुते। अत्र तु अयं विशेषः, गुरोः कृष्णसाम्यं केवलं पुज्यत्वेन विवक्षितम्, नान्यधर्मेण।

वस्तुतो गुरोः श्रीकृष्णभिन्नत्वेऽपि तदभिन्नत्वं शिष्यकृतं स्वाभ्युदयनिमित्तम्, अन्यथा गुरोः मर्त्यत्वबुध्या शिष्यस्य निखिलं तपो गजस्नानमिव विफलं स्यात्। अत एव श्रीलविश्वनाथचक्रवर्त्तिपादेन गुर्वष्टके उक्तम् –

"साक्षाद्धरित्वेन समस्तशास्त्रैरुक्तस्तथा भाव्यत एव सद्भिः।
किन्तु प्रभोर्यः प्रिय एव तस्य वन्दे गुरोः श्रीचरणारविन्दम्॥" इति।

विश्वस्मिन्न काचनैका विद्यास्ते या न गुरुनिर्देशितमार्गा, का कथा पराविद्या- साधिकाया भक्तिशिक्षायाः। भक्तिविद्याविषये अयं तु विशेषः – कृपालुः श्रीभगवान् मानवान् भक्तिशिक्षादानेन धन्यान् चिकीर्षुः गुरुरूपेणाविर्भवति। गुरुरेव मानवानां संसारार्णवतरणे तरणीकर्णधारो भवति। श्रीमद्भागवते श्रीकृष्णेन उद्धवं प्रत्युक्तम् –

"नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम्।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा॥"[7] इति।

ननु कस्तावद् गुरुरेतद्दर्शने? इति प्रश्नस्य उत्तरं साधु दृश्यते हरिभक्तिविलासे–शब्दब्रह्म (वेद्)-परब्रह्म (श्रीकृष्ण)-निष्णातः, परमशान्तः, श्रीकृष्णभक्तिपरायणः, श्रीकृष्ण-भक्त-वात्सल्यादिमाहात्म्यानुभवी, श्रीकृष्णे समर्पितचित्तः, निर्व्याधिः, जितकामादिरिपुः, श्रीकृष्णे गरिष्ठरागभक्तिवाही, शास्त्रागमादिषु विमलपथज्ञः, साधुभिः सम्मतः, दान्तः, ब्रह्मनिष्ठो जन एव गुरुपदवाच्यः। श्रीमद्भागवते चैवं वर्णितम् –

[2] मुण्डकोपनिषदि १.२.१२

[3] वेदान्तसारे ३०

[4] बृहदारण्यकोपनिषदि ४.३.३३

[5] विवेकचूडामणौ ८

[6] विवेकचूडामणौ ८३

[7]भागवते ११.२०.१७

"तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्॥"[8]

केवलं भक्तिशिक्षादानेन तु न गुरुत्वं जायेत, किन्तु स्वयमपि शिक्षानुरूपम् आचरणीयम्। अत एव श्लोके – "परे च निष्णातं ब्रह्मणि" इति उक्तम्। अत एव च आचार्यलक्षणमेवमुच्यते –

"शास्त्रोक्तं धर्ममुच्चार्य स्वयमाचरते सदा।
अन्येभ्यः शिक्षयेद्यस्तु स आचार्यो निगद्यते॥" इति।

**नकुलीशपाशुपतदर्शनदृष्ट्या**

नकुलीशपाशुपतदर्शने ज्ञानतपोवृद्धेः देशतया गुरुः प्रतिपादितः। येन अर्थानुसन्धानपूर्वकं ज्ञानतपोवृद्धी प्राप्नोति स एतद्दर्शने देश इत्युच्यते। स च पञ्चविधः। तत्र गुरुः अन्यतमः। तदुक्तम् –
"गुरुर्जनो गुहादेशः श्मशानं रुद्र एव च॥" इति।

गुरौ अव्यभिचारिणी भक्तिः गुरुभक्तिः बलपञ्चकमध्ये अन्यतमा। तदुक्तम् –

"गुरुभक्तिः प्रसादश्च मतेर्द्वन्द्वजयस्तथा।
धर्मश्चैवाप्रमादश्च बलं पञ्चविधं स्मृतम्॥"

गुरुस्वरूपं गणकारिकायां निरूपितम् –

"पञ्चकास्त्वष्ट विज्ञेया गणश्चैकस्त्रिकात्मकः।
वेत्ता नवगणस्यास्य संस्कर्ता गुरुरुच्यते॥
लाभा मला उपायाश्च देशावस्थाविशुद्धयः।
दीक्षाकारिबलान्यष्टौ पञ्चकास्त्रीणि वृत्तयः॥"

**जैनदर्शनदृष्ट्या**

जैननये अपि आचार्यतत्त्वं विवृतम्। भगवतीसूत्रवृत्त्यामाचार्यनिर्वचनमेवं प्रदर्शितम्

"आ मर्यादया तद्विषयविनयरूपया चर्यन्ते सेव्यन्ते
जिनशासनार्थोपदेशकतया
तदाकाङ्क्षिभिरित्याचार्याः॥"[9] इति।

एतेन सुगममिदं यत् जिनशासनशिक्षायै एतदाचार्यापेक्षा। श्वेताम्बरदिगम्बरोभयमते एव आचार्यः षड्त्रिंशद्गुणोपेतो भवति। श्वेताम्बरजैनमते येन पञ्चेन्द्रियाणि नियन्त्रितानि ब्रह्मचर्यगुप्तयः धारिताः, चतुर्विधाः कषायाः त्यक्ताः. पञ्चमहाव्रतानां तथा पञ्चाचाराणां पालनं शक्यम्, समितिपञ्चकस्य गुप्तित्रयस्य च कृतं धारणं स एव आचार्यः। तदुक्तं जैनतत्त्वकलिकायाम् –

"पंचिंदियसंवारणो तह
नवविह्बम्भचेरगुत्तिधरो।
चउविह कसाय मुक्को इअ अट्ठारस
गणेहिं संजुन्तो॥
पंचमहव्वयजुन्तो, पंच
विहायारपालणसमात्थो।
पंचसमिओ तिगुत्तो, इइ
छत्तीसगुणेहिं गुरु मज्झं॥" इति।

अपि च जैनदर्शने शिक्षकतया शिष्याणामुपदेशक उपाध्याय इत्युच्यते। उपेत्य अस्मादधीयते इति उपाध्यायः। अज्ञानतमस्यटतो मूढान् ज्ञानेन प्रकाशयत्युपाध्यायः। यथोक्तं तिलोयपन्नत्याम्

"अण्णाणघोरतिमिरे दुरंततीरम्हि हिंडमाणाणं।
भवियाणुजोययरा उवज्झया वरमहिं देंतु॥"[10]

दर्शनेष्वपि दृश्यते सत्यपि तेषां बाहुविध्ये प्रत्येकमेव दर्शने तत्तद्दर्शनीयतत्त्वग्राहकतयाभ्युपगम्यत एव गुरुः। दर्शनेऽपि न हि गुरुमृते यथार्थं दर्शनम्। अतिदुर्गमे हि वर्त्मनि तमोबहुले बहुतत्त्वशराकीर्णे भवति बुद्धिर्भ्रमैरशुद्धा, अतस्तादृशे दुरत्यये दर्शनमार्गे गुरुः प्रमादीपप्रभाप्रदानेन नयति शिष्यमुपेयम्।

---

[8] भागवते ११३.२१

[9] भगवतीसूत्रवृत्त्यां तृतीये पृष्ठे

[10] तिलोयपन्नत्याम् १.४

ISSN : 2583-2271
Vol. - I, No. 1: 2021

**सहायकग्रन्थाः**


- आङ्गलसंस्कृतकोशः, चतुर्थसंस्करणात्मकः, भुवनगिरि-आनन्दशर्मा-शारदा-जयगोविन्द-सम्पादितः, २००८-खृष्टाब्दे न्यु दिल्ली-स्थाने संस्कृतभारती-प्रकाशितः।
- आचार्य शङ्कर ओ रामानुज, राजेन्द्रघोषसम्पादितः, तृतीयसंस्करणात्मकः, २०००-खृष्टाब्दस्य जानुयारी-मासस्य पञ्चमदिवसे कलिकातायामुद्बोधनकार्यालयप्रकाशितः।
- गुरुतत्त्व ओ गुरुगीता, प्रथमसंस्करणात्मकः, स्वामिरघुवरानन्द-सङ्कलितः, १९७३-खृष्टाब्दे एप्रिलमासे कलिकातायाम् उद्बोधनकार्यालयप्रकाशितः।
- जैन दर्शन, ड.साध्वी-सुभाषा-सम्पादितः, २००४-खृष्टाब्दे वाराणस्यां भारतीयविद्याप्रकाशनेन प्रकाशितः।
- विवेकचूडामणिः, शङ्कराचार्यकृतः, शम्भुनाथपाठकेन सम्पादितः, २०१५-खृष्टाब्दे गोरखपुरे गीताप्रेस-प्रकाशितः।
- वेदान्तसारः (सुबोधिनीटीकासहकृतः), श्रीसदानन्दयोगीन्द्रसरस्वतीप्रणीतः, विपद्भञ्जनपालेन सम्पादितः, अष्टमसंस्करणात्मकः, १४१५-वङ्गाब्दे कलिकातायां पुस्तकाभाण्डार-प्रकाशितः।
- वेदान्तसारः (हिन्दीव्याख्यासहितः), श्रीसदानन्दयोगीन्द्रप्रणीतः, आचार्यबदरीनाथशुक्लेन सम्पादितः, वाराणस्यां मोतीलाल-बनारसीदास-प्रकाशितः।
- शब्दकल्पद्रुमः, राजाराधाकान्तदेव-बाहादुरेण विरचितः, २००१-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सीरीज-अफिस-प्रकाशितः।
- श्रीश्रीगुरुवैष्णवभक्तिकुसुमाञ्जलि, श्रीमद्गौरगोविन्दानन्दभागवत-स्वामिविष्णुपादसम्पादितः, १३६२-वङ्गाब्दे पुनर्मुद्रितः कलिकातायामध्यापकश्रीयुक्त-पूर्णचन्द्रविश्वासेन प्रकाशितः।
- साध्यसाधनतत्त्व विज्ञान, श्रीमदनन्तदास-बाबाजी-महाराज-सम्पादितः, प्रथमसंस्करणात्मकः, मथुरायां श्रीकृष्णचैतन्यशास्त्रमन्दिरात् श्रीकेशवदासेन श्रीहरेकृष्णदासेन च प्रकाशितः।
- सर्वदर्शनसङ्ग्रहः (दर्शनाङ्कुरटीकासहितः), सायणमाधवाचार्यप्रणीतः, महामहोपाध्यायवासुदेवशास्त्र्यभ्यङ्करेण सम्पादितः, तृतीयसंस्करणात्मकः, १९७८-खृष्टाब्दे भण्डारकर-प्राच्यविद्यासंशोधनमन्दिराधिकृतैः स्वकीये मुद्रणालये मुद्रयित्वा प्रकाशं नीता।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# कर्मण्येवाधिकारस्ते

सत्येन्द्रनाथ आदकः


## प्रबन्धसारः

*सनातनभारतवर्षे श्रीमद्भगवद्गीता शाश्वतप्रज्ञायाः सौरभी। सा सर्वशास्त्रमयी अपूर्वरहस्यमयी च सन्तापहारिणी - '**सर्वशास्त्रमयी गीता**'। गीता मानवसभ्यतायाः इतिहासे श्रेष्ठदानमेव। भारतवर्षस्य जातीयजीवने कोऽपि स्तरः नास्ति, यत्र गीतायाः आलोकप्रभा न विकीर्यते। सा भारतीयसंस्कृतेः प्राणभूता, गुणगौरवा च वरीवर्ति। अपि च सा पूर्ववर्तिनीनां सर्वासामपि उपनिषदां श्रुतीनां स्मृतीनां च सारगर्भतत्त्वानाम् उत्सस्थली। गीता मानवान् कर्मणः, देशभक्त्याः, परोपकारितायाश्च शिक्षां प्रददाति। अतः विश्वधर्माणां विश्वप्रेम्णां विश्वमानवतानां च आधारशीला सा। उक्तञ्च-*

*"विश्वधर्म, विश्वप्रेम, विश्वमानवता।*
*के शिखालो जगतेरे? भारतेर गीता।*
*ताइ-*
*देशे देशे अनूदिता आद्दता अधीता।*
*जगतेर धर्मग्रन्थ भारतेर गीता॥"*

*सा सन्मार्गप्रदर्शिका लौकिकजनानां कृते अलौकिकम् उपदेशसारमावहति। गीता लोकप्रिया शान्तप्रिया च। सा देशातीता कालातीता चास्ति। अतः युगान्ते प्रलयकालेऽपि गीता अप्रकाशितरूपेण स्थास्यति।*

*गै+क्त = गीत+टाप् = गीता। पञ्चमवेदस्वरूपस्य महाभारतस्य भीष्मपर्वान्तर्गता सा भवति। स्वयं पद्मनाभस्य मुखपद्मविनिसृतेयं गीता साधूनां चित्तप्रसादिनी भूत्वा कलानिनादिनी सदा प्रवाहमाना पवित्रता गङ्गा इव शोभते। गीताम्भसि स्नानेन संसारमलनाशो भवति-*

*"मलनिर्मोचनं पुंसां जलस्नानं दिने दिने।*
*सकृद्गीताम्भसि स्नानं संसारमलनाशनम्॥"*


सनातनभारतवर्षे श्रीमद्भगवद्गीता शाश्वतप्रज्ञायाः सौरभी। सा सर्वशास्त्रमयी अपूर्वरहस्यमयी च सन्तापहारिणी -'सर्वशास्त्रमयी गीता'।[1] गीता मानवसभ्यतायाः इतिहासे श्रेष्ठदानमेव। भारतवर्षस्य जातीयजीवने कोऽपि स्तरः नास्ति, यत्र गीतायाः आलोकप्रभा न विकीर्यते। सा भारतीयसंस्कृतेः प्राणभूता, गुणगौरवा च वरीवर्ति। अपि च सा पूर्ववर्तिनीनां सर्वासामपि उपनिषदां श्रुतीनां स्मृतीनां च सारगर्भतत्त्वानाम् उत्सस्थली। गीता मानवान् कर्मणः, देशभक्त्याः, परोपकारितायाश्च शिक्षां प्रददाति। अतः विश्वधर्माणां विश्वप्रेम्णां विश्वमानवतानां च आधारशीला। उक्तम् च-

"विश्वधर्म, विश्वप्रेम, विश्वमानवता।
के शिखालो जगतेरे ? भारतेर गीता।
ताइ-
देशे देशे अनूदिता आद्दता अधीता।

[1] श्रीगीता( भूमिका पृ-३)

ISSN : 2583-2271
Vol. - I, No. 1: 2021

जगतेर धर्मग्रन्थ भारतेर गीता॥"[2]

सा सन्मार्गप्रदर्शिका लौकिकजनानां कृते अलौकिकम् उपदेशसारमावहति। गीता-लोकप्रिया शान्तिप्रिया च। सा देशातीता कालातीता चास्ति। अतः युगान्ते प्रलयकालेऽपि गीता अप्रकाशितरूपेण स्थास्यति।

गै+क्त = गीत+टाप् = गीता। पञ्चमवेदस्वरूपस्य महाभारतस्य भीष्मपर्वान्तर्गता सा भवति। स्वयं पद्मनाभस्य मुखपद्मविनिसृतेयं गीता साधूनां चित्तप्रसादिनी भूत्वा कलकलनिनादिनी सदा प्रवहमाना पवित्रा गङ्गा इव शोभते। गीताम्भसि स्नानेन संसारमलनाशो भवति-

"मलनिर्मोचनं पुंसां जलस्नानं दिने दिने।
सकृद्गीताम्भसि स्नानं संसारमलनाशनम्॥"[3]

अपि च-

"गीता कल्पतरोश्छाया शीलता शुभदा सुखा।
आश्रित्य तां जनाः सर्वे भूयासुः सफलोद्यमाः॥[4]

गीतायां बहवः कल्याणकराः मोहज्ञानविनाशकाः सत्यस्वरूपाः उपदेशाः भगवता प्रतिपादिताः। ज्ञानगरिमान्विता गीता खलु आत्मनः स्वरूपं निरूपयति, निष्कामकर्मयोगं निष्पादयति, ज्ञानयोगं ज्ञापयति, भक्तियोगं भावयति, स्थितप्रज्ञतां प्रमाणयति, वर्णाश्रमधर्मं प्रकाशयति। तस्याः भाषाशैली तादृशी मनोरमा, प्रसादगुणयुक्ता, ज्ञानविज्ञानसमन्विता च। गीतायाः मतमिदं यदा यदा भवति मानव एवं विधस्तदैव ज्ञेयमिदं यदसौ स्वकीयं चरमं पदं लक्ष्यं वा लब्धवान्। सा भावजीवने कर्मजीवने च पूर्णतां प्रकाशयति।

## कर्म

कृ+मन्=कर्म । कर्म इति किम्? कर्मणः स्वरूपं यत् बहिर्दृश्यमानकर्मेन्द्रियाणां क्रिया केवलं कर्म न भवति। येषामुपरि मानवानां जन्ममृत्यू निर्भरशीलौ तत् कर्म। कर्मण: स्वरूपं योगवाशिष्टरामायणे उच्यते-

"कर्मबीजं मन: स्पन्द: कथ्यतेऽथानुभूयते।
क्रियास्तु विविधास्तस्य शाखाश्चित्रफलास्तरो॥"[5]

कर्मण: सर्वप्रथमरूपं मानसिकम्। अत: मनस: स्पदनं कर्मण: एकरूपं । कर्मण: बीजं मनस: वासनात्मकं स्पन्दनं यस्य फ़लं लभते । कर्म एव जीवनम् । कर्म विहाय कामना न सम्भवति। मानवजीवने कर्मैव तारकम्, साधकं, दु:खनिरोधकं, पापनिवारकम्, अधिव्याधिविनाशकञ्चेति। कर्मणा चतुर्वर्गफलप्रप्ति: भवति। अत: कर्म एव शक्ति: मुक्तिश्च। कर्म एव मानवानां जीवनमूल्याणां विचारकम्।

कर्ममयं खल्विदं जगत्। कर्म एव जीवनम्। कर्मसम्पादनेन एव फलम्। कर्म विना न कोऽपि जनः क्षणं तिष्ठति - 'न हि कश्चिदक्षणमपि जातु तिष्ठत्यकर्मकृत्'।[6] कर्म विना न कश्चिज्जन आत्मोन्नतिं कर्तुमर्हति। कर्म अपि आनन्ददायकं भवति। कर्मणा चतुर्वर्गफललाभस्य चरितार्थता । कर्म एव शक्तिः मुक्तिश्च।

शास्त्रेषु त्रिविधं कर्म निरूपितं - प्रारब्धं, सञ्चितं, क्रियमाणं च। योगशास्त्रानुसारं चतुष्प्रकाराणि कर्माणि। योगसूत्रे उक्तम्-'कर्माशुक्लाकृष्णां योगिनस्त्रिविधामितरेषाम्'[7]। यथा- कृष्णम्, शुक्लकृष्णम्, शुक्लम्, अशुक्लकृष्णञ्च । वेदे त्रिविधं कर्म प्रतिपादितम्-नित्यकर्म, नैमित्तिककर्म, काम्यकर्म च।

[2] श्रीगीता (भूमिका पृ-५४)

[3] प्रबन्धरत्नाकर-पृ-४२

[4] प्रबन्धरत्नाकर -४२

[5] योगवशिष्टरामायणम्-३/९६/११

[6] श्रीगीता-३/५

[7] योगसूत्र-४-७

ISSN : 2583-2271
Vol. - I, No. 1: 2021

सन्ध्यावन्दनादीनि नित्यकर्माणि, जन्ममरण-शौचपालनादीनि नैमित्तिककर्माणि, दर्शपूर्णमास-यागादीनि काम्यकर्माणि भवन्ति। गीतायां कर्म द्विविधं - सकामकर्म निष्कामकर्म च। फलाशया कृतं कर्म सकामकर्म मन्यते। फलाकाङ्क्षां विहाय कर्मफलानि परमात्मनि समर्प्य श्रद्धया विहित कर्मसम्पादनं हि निष्कामकर्म। उभयोरप्युपासनयोर्निष्कामो-पासना श्रेयसी।

जीवननिर्वहनाय वा स्वजीवनं सफलीकर्तुं कर्म आवश्यकम्। आजन्मनः आमृत्योः मानवाः तेषां स्वकीयास्तित्वरक्षणार्थं सदा कर्मरताः भवन्ति। कीदृशं कर्म श्रेयोवहम्? इति जिज्ञासामुत्तर प्रस्तूयते यत् अनासक्तिभावनयैव क्रियमाणं कर्म लोक-परलोकोभयसुखदमिति। प्रकृतिः अपि जनान् कर्म कर्तुं प्रभवति। प्रकृतिसम्भवैः गुणैः वशीभूतः सन् जीवः कर्मणि प्रेरयति। उक्तम् च-'कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः'[8]। गुणः त्रिविधः सत्त्वं रजस्तमश्चेति। सत्त्वगुणः सुखेन ज्ञानसङ्गेन च देहिनं बध्नाति। सर्वथा दोषरहितं विकारशून्यं सत्त्वम्। रजोगुणः कर्मणः कर्मफलस्य आसक्तिना जीवात्मानं बध्नाति। रजोगुणः मानवचित्तेषु भोगवासनां जनयति। तमोगुणः प्रमाद्-आलस्य-निद्राभिः जीवात्मानं बध्नाति। तमोगुणः मायां मोहं च उत्पादयति। यत् कर्म कामनापूर्वकं क्रियते यथा अग्निहोत्रादिकं तेन मानवः स्वर्गादिषु सुखमनुभवति परं मोक्षप्राप्तिः कदापि न सम्भवति। परं यत् कर्म आत्मनः कामनां विहाय क्रियते तत् निष्कामकर्म कथ्यते। तस्य विधिना मानवो मुक्तिं लभते। भगवता श्रीकृष्णेन प्रतिपादितम्-

"यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति॥"[9]

जागतिकं किमपि वस्तु न शाश्वतम्। सर्वं खलु नश्वरम्। जातस्य हि ध्रुवो मृत्युः। अतः न कोऽपि मानवः दुःखं लिप्सते। परन्तु सर्वे एव सुखं कामयन्ते।छान्दोग्योपनिषदि उक्तम् -'भूमैव सुखं नाल्पे सुखमस्ति'[10]। इदं क्षणमपि जीवनं निष्कामकर्मणा सार्थकताम् अर्जयति। अस्माकं फलस्पृहा न कर्तव्या। यतो हि कर्मणि एव मानवस्य अधिकारोऽस्ति न फलेषु भगवता श्रीकृष्णेन उक्तम्-

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि॥"[11]

निष्कामकर्मणा मानवानां मुक्तिमार्गः प्रशस्तो भवति। जगतीतलेऽस्मिन् निष्कामकर्मानुष्ठानात् वर्षशतकं जीवितुमिच्छेत् जनः। उपनिषदि उच्यते-
"कुर्वन्नेवेह कर्माणि जीजिविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥"[12]

तथा च श्रुति- 'शतायुर्वै पुरुषः जीवेम शरदः शतम्'[13]। कल्याणकारि कर्म कदापि बन्धनं न सृजति। सुकर्म हि मानवानां अमरत्वं स्थायित्वं च। यद्यपि शरीरस्य क्षणस्थायित्वं तथापि गुणानां खलु चिरस्थायित्वम्। अतः गीतायायुक्तम् -'शरीरयात्रापि च ते न प्रसिध्येदकर्मणः'[14]। अपि च- 'हतेषु देहेषु गुणा धरन्ते'[15]। निष्कामकर्मफलानि च सुखाय शान्तये भवन्ति। अनेन मानवाः अज्ञानमयजगतः ज्ञानालोकं प्रविशन्ति। ये तु सकामकर्ममार्गमुपासते ते

[8] श्रीगीता-३/५

[9] श्रीगीता-५/५

[10] छान्दोग्योपनिषद्

[11] श्रीगीता २/४७

[12] ईशोपनिषद्-२

[13] शुक्लयजुर्वेदः – ३६/२४

[14] श्री. गीता-३/८

[15] संस्कृतसप्तकम्-पृ ७०

तमसावृतं गहनान्धकारं प्रविशन्ति। उपनिषदि उच्यते- 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते'।[16] यत्र विषयलालसा न प्रबला स्यात् तत्र साधकं न विपथं चालयेत् तदर्थम् अपारमार्थिकीं वासनां त्यक्त्वा परमानन्दानुभवं कुर्यात्।

संयम: मानवानां मेरुदण्डः। कर्म केवलं संयमेन एव करणीयं, तत्र फलासक्तिर्नैव विधेया। संयमं विनापि निष्कामकर्म न साधयति। भोगवासनाद्रव्ये सकृत् उपभुक्ते भोगकामना न शाम्यति, पुनः पुनः कामना वर्धते। यथा पुनः पुनः घृतप्रदानेन एव अग्निः विवर्धते।

यदि मानवाः स्वार्थपरतां विहाय परहितानि साधयन्ति तर्हि कीर्तिमन्तो भवन्ति। त्यागेन अमृतत्वं लभते। भोगवासनात्याग एव प्रकृतिमुक्तिः। श्रीमत्स्वामिप्रणयानन्दजीमहाराजेन उक्तम्- 'सब रकम वासनार नाश येखाने प्रकृतमुक्ति सेखाने'। किन्तु यः मिथ्याचारी कदापि स न साफल्यं प्राप्नोति। तस्य साफल्यम् अलीकमेव प्रतिभाति। तथाहि उच्यते- 'तस्य तदासननियमनादिकमाचरणं मिथ्या अलीकमेव निष्फलत्वात्'[17]। आङ्गलसाहित्ये प्रवादः अस्ति- 'Every action was its equal & opposite reaction'। ममताशून्यं शोकशून्यञ्च विहाय कर्म करणीयम्। गीतायामुक्तं-

"मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥"[18]

कर्मफलाशां परित्यज्य यत् कर्म क्रियते, तन्न बन्धनाय भवति। मानवाः निष्कामकर्मणा एव साफल्यं सिद्धिलाभं च प्राप्नुवन्ति। अतः निष्कामकर्मणः प्राधान्यं जीवने वर्तते। यथा जनकाश्वपतिप्रभृतयः राजर्षयः निष्कामकर्मणा एव कीर्तिं प्राप्य अधुनापि इह जगति पूज्यन्ते। तदर्थं श्रीकृष्णेणोक्तं-

"कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥"[19]

अधुनापि देशप्रेमिका: सुभाषचन्द्र-चित्तरञ्जन-क्षुदिरामादय:, समाजसंस्कारका विद्यासागर-राममोहन-विवेकानन्ददय:, साहित्यिका: रवीन्द्रनाथ-शरच्चन्द्रनजरुलादय: महामानवा: दृश्यन्ते। ये मानवा: धर्म-साहित्य–समाज–देशप्रेमिकादिषु बहुजन-हिताय च प्राणान् उत्सृजन्ति ते नरकुले धन्या: तेषां जीवनं महाजीवनम्।

निष्कर्षरूपेण एतद् वक्तुं शक्यते यत्- अस्मिन् वैज्ञानिकयुगे गीतायां ये उपदेशाः प्रदत्ताः सन्ति ते सर्वे एव जीवनस्योन्नतिप्रदायकाः। समाजे मनुष्यत्वं, मूल्यबोधः जातीयताबोधश्च प्रायश: न दृश्यते। केवलं गीताया: कर्ममार्गै: तानि आनेतुं शक्यन्ते। अत: गीतानिर्दिष्ट: कर्ममार्ग: अस्माकं कर्तव्य:।

'जयतु भगवद्गीता'

## सहायकग्रन्थसूची


- श्रीगीता-जगदीशचन्द्रघोष, प्रसिडेन्सी लाइब्रेरी,१९८७,कलिकाता।
- वेद्-अनुबदक:श्रीविजन बिहारी गोस्वामी, हरफ़प्रकाशनी, कलिकाता-०७।
- प्रबन्धरत्नाकर-डः रमेशचन्द्रशुक्ल, चौखम्बा विद्याभवन, वाराणसी।
- उपनिषद-सेन, तत्त्वभूषण, घोष, हरफ़ प्रकाशनी-१९८०, कलिकाता-०७।
- संस्कृतसप्तकम्-वन्द्योपाध्याय, प्रधान, ढाका स्टुडेन्ट लाइब्रेरी,कलिकाता।
- लोकप्रज्ञा-UGC Ref. Journal No-ISSN-2229-5364


[16] ईशोपनिषद्-९

[17] श्री. गीता -३/६, नीलकण्ठटीका

[18] श्री. गीता-३/३०

[19] श्री. गीता-३/२०

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# कालिदासवर्णितेषु कारुण्यवियोगादिषु मानवेतराणां तादात्म्यानुभूतिः

**कृष्णगोपालपात्रः**

**प्रबन्धसारः**

*संस्कृतसाहित्यनभसि दीप्तभास्करवद् देदीप्यते महाकविकालिदासः। तस्य प्रत्येकं ग्रन्थस्य रचनाशैली विषयसमृद्धिः चित्ररूपायणं च स्वीयवैशिष्ट्येन गुणमण्डितम्। तद्रचनासु वियोगः कारुण्यं च अलौकिकतया तेन वर्णितम्। काव्यानन्दप्राप्तये अचेतनस्यापि मानवीयकरणं तत्र तत्र स्फुटमवाप्यते। सम्भोगशृङ्गारापेक्षया विप्रलम्भशृङ्गारस्य उच्चकोटित्वं तेन प्रापितम्। विप्रलम्भशृङ्गारे हि वियोगविलापादिकमेव आधिक्येन समवलोक्यते। प्रियविरहात् प्रियायाः, प्रियाविरहात् प्रियस्य वा दुःखे विलापे च विप्रलम्भशृङ्गाररसः। एतादृशस्थितौ एकैकः तदितरवियोगात् दुःखभाक् भवति इति तु सामान्यमेव परं नायकनायिकयोः वियोगे तद्वदेव दुःखभाजः भवन्ति तदितरे प्राणिनः वृक्षलतादयः क्वचित् प्रकृतिरपि इति कालिदासेन वियोगवर्णनावसरे कारुण्यवर्णनावसरे च नूतनरीतिः एव प्रदर्शिता।*

## भूमिका

अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासादयः केचन एव महाकवित्वेन गण्यन्ते। तेषु वाग्देवतावतारभूतः कालिदासो हि अग्रगण्यः। कालिदासीयकाव्येषु विविधदिग्गामिनी प्रतिभा सर्वतो स्मृतिपथमायाति। पुनश्च प्रकृतिचित्रणमपि सर्वासु दिक्षु परिलक्ष्यते। तत्र हि प्रकृतिः कदाचित् स्वस्वरूपेण क्वचित् विभावादिरूपेण कदाचिच्च चेतनसत्तात्वेन चित्रिता। निसर्गवर्णने कविकौशलं तु नितरां दिक्पथमायाति काव्यरसपीयूषपिपासूनाम्। 'उपमा कालिदासस्य' इति वचस्तु तदीयोपमावर्णननैपुण्यं प्रद्योतयति। उपमादिभिः अचेतनस्यापि मानवीयकरणं शक्यं कर्तुम्। अचेतनस्यापि मानवीयकरणे मूलभूतम् उद्देश्यं हि काव्यानन्दप्राप्तिरेव। तस्मादुपमादयः खलु अलङ्काराः सहृदयचेतांसि रञ्जयन्ति इति तु निश्चप्रचमेव। कारुण्यवियोगादिवर्णनेऽपि उपमादयोऽलङ्काराः सहृदयमनोरञ्जनाय क्षमन्ते एव। अप्पयदीक्षितोऽपि उपमायाः सहृदयहृदया-ह्लादकत्वं निर्वर्णयति–

"उपमैका शैलुषी सम्प्राप्ता चित्रभूमिकाभेदान्।
रञ्जयन्ती काव्यरङ्गे नृत्यन्ती तद्विदां चेतः॥"[1]

## कालिदासस्य करुणवियोगादिवर्णननैपुण्यम्

"रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति।"[तैत्तिरीयोपनिषद्– २/७] इति श्रुतिवचनं स्मारं स्मारमेव प्रायः कालिदासः काव्यकुसुमानि विरचयामास। तदीयकाव्यपठनेन तु रस एवात्मा काव्यस्य इति सम्यक् प्रतिभाति। कालिदासो हि प्रत्येकमपि रसं तथोद्बोधयति यत् सहृदयहृदयं द्रागेव तत्राकृष्टं भवति। सर्वविधरसपेशलता तत्काव्येषु परिलक्ष्यते। परं विप्रलम्भशृङ्गार-रसधारां तु सः अनितरसाधारणतया प्रावाहयत्। करुणरसम् अपि यदा वर्णयति तदैवं भाति यत् स एव प्राणभूतः काव्यस्येति। वियोगादिशब्द-श्रवणेन यद्यपि करुणरसोऽपि मनसि स्फुरति तथापि नायकनायिकयोः विच्छेदजन्यः विलापस्तु विप्रलम्भशृङ्गारे एव अन्तर्याति। नायकनायिकयोः विलापेतरस्थले तु करुणरसस्य प्रतीतिः उररीकर्तुं शक्या। करुणरसोऽपि सुखानुभवमेव प्रापयति। अतस्तस्यापि करुणरसस्योत्कृष्टतायां नास्ति सन्देहावकाशः। करुणोऽपि अत्युत्कृष्टः रसः इत्यत्र

---
[1] चित्रमीमांसा,पृ–२८।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

सहृदयहृदयानुभवः एव मानमिति साहित्यदर्पणकृता अपि न्यरूपि–

"करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥"[2] इति।

आदिकवेः वाल्मीकेः करुणरसस्थायि-भावः शोकः एव श्लोकत्वेन परिणत इति अहो महनीयता करुणरसस्य। करुणरसस्फूर्तावपि अलोकसामान्यप्रतिभा दरीदृश्यते कालिदासस्य। परं करुणरसापेक्षयापि शृङ्गाररसवर्णने तु तस्य विशिष्टता सर्वजनविदिता। सम्भोगशृङ्गारापेक्षया विप्रलम्भशृङ्गारस्य उच्चकोटित्वं लक्ष्यते तत्र तत्र कालिदासीयकाव्येषु। यथा–

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः॥"[3] इति।

शङ्करस्य तृतीयनेत्रस्थेनाग्निना भष्मीभूतस्य कामदेवस्य शरीरं दृष्ट्वा दृश्यते रतेः विलापः–

"शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि॥"[4]
इति।

## करुणवियोगादिषु कालिदासकाव्येषु मनुष्येतरस्य तादात्म्यानुभूतिः

करुणरसवर्णने विप्रलम्भशृङ्गारवर्णने च कालिदासस्य प्रतिभा सर्वजनविदिता। प्रियाविरहात् प्रियमनः, प्रियजनविरहाच्च प्रियायाः मनः दुःखितं भवति। एवमवस्थायाम् एकैकस्याभावे तदितरकृतः विलापः यत्र तत्र तु विप्रलम्भशृङ्गारः एव इति मन्तव्यम्। एवञ्चैतादृशे वियोगे शृङ्गाररसस्यैवोद्रेकः इति तु स्पष्टमेव। परं नायकनायिकयोः वियोगे तद्वदेव दुःखभाजः भवन्ति तदितरे प्राणिनः वृक्षलतादयः क्वचित् प्रकृतिरपि इत्येवं कालिदासेन वियोगवर्णनावसरे कारुण्यवर्णनावसरे च प्रतिपदं प्रतिपादि। कालिदासवर्णितेषु करुणवियोगादिषु अचेतनानां या तादात्म्यानुभूतिः सेह निरूपयितुमिष्यते।

कालिदासवर्णितविप्रलम्भे जडा प्रकृतिरपि ईदृशी संवेदनशीला प्रदर्शिता यत् सापि मनुष्यवत् सुखदुःखभागिति भाति। सेयम् अचेतना प्रकृतिरपि मनुष्यवत् स्वव्यापारं प्रदर्शयति। यथा मेघस्य संयोगेन रामगिरिः स्नेहव्यक्तिः भवति इति सर्वैरपि कविजनैः सहृदयैश्च अनुभूतम्। मेघो हि अचेतनः तथापि स मनुष्यवत् यक्षस्य विरहम् अवगम्य यक्षप्रेरितसन्देशान् यक्षप्रियां प्रति प्रापयेदिति मत्वा मेघं प्रत्याह यक्षः–

"सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥"[5] इति।

अचेतनस्य मेघस्यापि प्रियाविरहेन विरहितं यक्षं प्रति सहानुभूतिः स्यादेव इति विचिन्त्य मेघं स्वसन्देशान् यक्षप्रियां प्रापयितुम् अनुरुणद्धि यक्षः। सन्देशप्रेरकः वार्तावाहकः दूतो वा सामान्यतया मनुष्यो भवति तदितरः प्राणी वा। परन्तु इह मेघदूते कालिदासेन प्रदर्शितं यत् मनुष्येतरः अचेतनः मेघः अपि वार्ताप्रेरणे समर्थः।

यक्षस्तु प्रियाविरहात् एतावान् विवेकरहितः सञ्जातः यत् कल्पनादृष्टां प्रियाम् आलिङ्गितुम् आकाशे हस्तौ प्रसारयति परन्तु क्षणमेव हस्तौ प्रियारहितौ इति ज्ञात्वा भृशं दुःखितो भवति। यक्षस्य इमाम् अवस्थां वीक्ष्य वनस्थलीदेवता अपि मुक्तास्थूलानश्रुबिन्दून् पातयन्ति–

"ममाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो–
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति॥"[6] इति।

---

2 साहित्यदर्पणे तृतीयपरिच्छेदः।

3 मेघदूते उत्तरमेघः–४२।

4 कुमारसम्भवम्–४/३३।

5 मेघदूते पूर्वमेघः–७।

6 मेघदूते उत्तरमेघः–४३।

प्रियाविरहेन पीडितस्य यक्षस्य कातरस्वरं मर्मीकृत्य लोकोपकारतत्परः मेघो यक्षोक्तायाः यक्षप्रियायाः प्राणान् पातुं लोकोत्तरवाण्या पूर्वोक्तं यक्षसन्देशं यक्षप्रियां जगाद। यथा वा मेघविरहविरहिणी निर्वन्ध्या विरहचिह्नानि पाण्डुच्छायादीनि बिभर्ति–

"वेणीभूतप्रतनुसलिलसावतीतस्य सिन्धुः
पाण्डुच्छाया तटरूहतरुभ्रंशिभिर्जीर्णपर्णैः।"[7] इति।

एवं प्रत्यक्षगोचरा मेघदूते वियोगस्य बलवती वेदना।

मदनभष्मीभूते सति मदनसुहृत् चन्द्रः आत्मनः उदयमेव निष्फलं मन्यते। नवचूतकुसुमानां मदनकृतबाणत्वं न सिद्ध्यति। कोकिला अपि मधुरस्वरं त्यक्तवन्तः। किञ्चालिपङ्क्तिः या मदनेन गुणकृत्ये नियोजिता सा अधुना कारुणिकस्वरैः रतिमेवानुकरोति–

"अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम्॥"[8]

इत्येवं प्रकारेण कालिदासेन रतिविलाप-प्रसङ्गे पशुपक्षिणामवस्था रतिमुखेन निपुणतया वर्णिता।

इन्दुमतीशोकविह्वलः महाराजः अजः अपि इन्दुमतीप्रयाणे शोकातुराणां वृक्षादीनां वास्तविकस्वरूपं निर्वर्णयति। तथा हि यः अशोकवृक्ष इन्दुमत्या पद्भ्याम् स्पर्शीकृतः सः अधुना पुष्परूपाश्रूणि विमोचयति–

"अमुना कुसुमाश्रुवर्षिणा
त्वमशोकेन सुगात्रि शोच्यसे।"[9]

विलपन्तम् अजं दृष्ट्वा वृक्षादयोऽपि रसरूपाश्रूणि विमोचयन्ति–

"विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति।
अकरोत् पृथिवीरुहानपि तशाखारसबाष्पदूषितान्॥"[10]

एवं हि स्पष्टमेव शोकविह्वलस्य अजस्य करुणविलापेन अरण्यप्रदेशोऽपि शोकस्तब्धः सञ्जातः।

ज्येष्ठादेशात् अत्याज्यामपि सीतां यदा लक्ष्मणः परित्यजति तदा पुरस्तात् स्थिता जह्नोर्दुहिता तरङ्गरूपहस्तमुत्थाप्य सीतापरि-त्यागं वारयति–

"अवार्यतेवोत्थितवीचिहस्तै-
र्जह्नोर्दुहित्रा स्थितया पुरस्तात्॥"[11]

सीतापरित्यागात् समदुःखिनो मयूराःनृत्यं त्यक्तवन्तः, वृक्षाः कुसुमानि अजहुः, मृगास्तु भक्षणयोग्यान्नपि तृणान् मुखाद् अपसारयामासुः।

"नृत्यं मयूराः कुसुमानि वृक्षाः
दर्भानुपात्तान्विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावम-
त्यन्तमासीत् रुदितं वनेऽपि॥"[12]

अभिज्ञानशाकुन्तलेऽपि दृश्यते प्रकृत्या सह शकुन्तलायाः तादात्म्यानुभूतिः। गुरूणाम् आज्ञा ह्यविचारणीया इति दृष्ट्वा सा वनस्पतिसेवां न करोति अपि तु सहोदरस्नेहेनैव करोति। स्पष्टीकरोति सा एव– "न केवलं तातनियोगः अस्ति मे सहोदरस्नेहः"। वनस्पतिमृगादिषु यथा तस्या स्नेहः तद्वत् तेषामपि शकुन्तलां प्रति सहानुभूतिरासीत्। वनस्पतयः शकुन्तलापतिगृहगमनवेलायां तस्यै वस्त्राभूषणं प्रददति। पक्षिणः लताश्च तस्या अभिनन्दनम् अकुर्वन्। शकुन्तलाविरहे शोकमग्ना हि आश्रमवृक्षाः प्राणिनश्च। तथापि सा आश्रमतरुभिः वनवासबन्धुभिः अनुमतेति तातः कण्वः शकुन्तलाम् अकथयत्–

"अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यतः तिवचनीकृतमेभिरात्मनः॥"[13]

शकुन्तला पतिगृहगमनकाले आश्रम-विरहकातरा भवति तस्मिन् काले प्रियंवदा तां ब्रूते सखि न केवलं त्वमेव दुःखिता अपि तु त्वद्वियोगेन आश्रमस्थाः प्राणिनो अपि समदुःखभाजः–

---

[7] तत्रैव २८।

[8] कुमारसम्भवम्–४/१५।

[9] रघुवंशम्–८/६३।

[10] तत्रैव–८/७०।

[11] तत्रैव–१४/५१।

[12] तत्रैव–१४/६९।

[13] रघुवंशम्–४/१३।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

"उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी।
अपसृतपाण्डुपत्राणि मुञ्चन्त्यश्रूणीव लताः॥"[14]

शकुन्तलाविरहेन शकुन्तलामनुसरन् मृगशावकः पतिगृहं प्रतिष्ठमानायाः शकुन्तलायाः मार्गं न जहाति–

"यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥"[15]

**निष्कर्षः**

"अपारे काव्यसंसारे कविरेकः प्रजापतिः, यथास्मै रोचते विश्वं तथेदं परिवर्तते" इति अभियुक्तोक्तिं विचार्य इदं सुविदितं यत् कवयः काव्यं यथाकथञ्चित् परिवर्तयन्ति परिवर्धयन्ति च। स्वरूच्यनुगुणमेव रसधारां प्रवाहयन्ति। करुणरसः आदिकवेः वाल्मीकेः मुखपद्मात् विनिसृतः। अतः तन्महत्त्वं तु नितरामङ्गीकुर्वन्ति काव्यकर्तारः सहृदयाश्च। परं गतेषु समयेषु यथा करुणरसधारा प्रवाहिता तथैव शृङ्गाररसधारा अपि महत् स्थानमवाप। कालिदासादयो हि काव्यकर्तारः तद्रसधारां सुक्ष्मेक्षिकया प्रावाहयन्। यद्यपि कालिदासीयकाव्येषु सर्वविधोत्कृष्टता दरीदृश्यते तथापि वियोगवर्णनं हि तत्काव्यस्य पराकाष्ठा इति समालोचका अपि उररीकुर्वन्ति। तत्रभवान् कालिदासः अत्र वियोगवर्णने कारुण्यवर्णने च वैशिष्ट्यं प्रतिपादयति यत् मानवेतराः अपि वृक्षलतादयः स्वानुभवं मनुष्यवदेव प्रकटयन्ति। प्रियजनवियोगात् यथा मनुष्यस्य दुःखं तद्वदेव तादात्म्यानुभवः तेष्वपि परिलक्ष्यते। प्रियजनविच्छेदात् तेऽपि समदुःखभाजः भवति इति तेनैव ऐदम्प्राथम्येन प्रदर्शितम्।

**उपसंहृतिः**

वियोगवर्णने कारुण्यवर्णने हि दृश्यते कालिदासीयकाव्येषु अलोकसामान्य-विशिष्टता। तत्काव्यनाटकादिषु विद्यमानानि पात्राणि तु वियोगं कारुण्यं च प्रकटयन्त्येव तदितरा प्रकृतिः एवं वृक्षलतादयोऽपि स्वानुभवं प्रकटीकुर्वन्ति। नायकवियोगात् नायिकायाः नायिकावियोगाद्वा नायकस्य चेतः दुःखपीडितं भवतीति तु सामान्यमेव। परन्तु नायकनायिकावियोगात् सुहृद्वियोगाद्वा मनुष्येतराणामपि मनः दुःखितं भवतीति काचित् अभिनववर्णनरीतिः दृश्यते ततो ज्ञायते तस्मिन्नपि कोणे लब्धप्रवेशः अयं विद्वन्मणिः कालिदासः।

**सहायकग्रन्थाः**


- अप्पय्यदीक्षितः। १९९९। *चित्रमीमांसा*। नरसिंहाचार्यः, एन् एस वि (सम्पा.)। तिरुपतिः राष्ट्रियसंस्कृतविद्यापीठम्।
- कालिदासः। २००८। *अभिज्ञानशाकुन्तलम् (प्रकाशसंस्कृतहिन्द्याङ्गल-व्याख्यात्रयोपेतम्)*। शास्त्री, वेदप्रकाशः (सम्पा.)। वाराणसी चौखम्बा विद्याभवन।
- कालिदासः। २०१४। *कुमारसम्भवम् (सरलासञ्जीवनीभ्यामुपेतम्)*। मालवीयः, सुधाकरः(सम्पा.)। वाराणसी चौखम्बा कृष्णदास अकादमी।
- कालिदासः। २००९। *मेघदूतम्(पूर्वमेघः उत्तरमेघश्च)*। वाराणसी भारतीय विद्या प्रकाशन।
- कालिदासः। २०१६। *रघुवंशम् (सञ्जीवनीचन्द्रकलाभ्यामुपेतम्)*। त्रिपाठी कृष्णमणिः(सम्पा.)। वाराणसी चौखम्बा सुरभारती प्रकाशन।
- विश्वनाथः। २०११। *साहित्यदर्पणः(लक्ष्मीटीकोपेतः)*। शास्त्री, कृष्णमोहनः(सम्पा.)। वाराणसी चौखम्बा संस्कृत संस्थानम्।


[14] तत्रैव–४/१४।

[15] तत्रैव–४/१६।

 ISSN : 2583-2271
Vol. - I, No. 1: 2021

# अभिज्ञानशकुन्तले कालिदासस्य प्रकृतिभावना

## सुस्मिता दे

*प्रकृतिः परिवेशश्च मानवजीवनस्य अपरिहार्यम् अविच्छेद्यम् अङ्गम्। विविधकविमानसे प्रकृतिभावना विविधरूपेण संलक्षते। आदिकवेः वाल्मीकेः विरचिते रामायणमहाकाव्ये प्रकृतिभावना परिदृश्यते। महाभारतेऽपि प्रकृतिभावना संलक्षते।*

*निसर्गवर्णनानिपुणः कविः कालिदासः काव्यनाटकेषु एवं स्ववैशिष्ट्यं प्रदर्शयति यत्र प्रकृत्या सह मानवमानसस्य प्रगाढं नैकट्यं स्थाप्यते। कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नासीत्। महाकवेः प्रकृतिप्रणयः खण्डकाव्ये ऋतुसंहारे मेघदूते च वर्णिता। कुमारसम्भवकाव्ये हिमालयवर्णनं वसन्त-वर्णनं च महता नैपुण्येन कृतम्।*

*यथा काव्ये तथा नाटकेऽपि प्रकटितं कविचातुर्यं प्राकृतिकवर्णनायाम्। कवेः सर्वाधिकं वैशिष्ट्यं विलोकितं नाटकश्रेष्ठे अभिज्ञानशकुन्तले। अस्मिन् नाटके प्रकृतिः यादृशीं प्रधानतां गमितासीत् न तादृशं कस्मिंश्चिदन्यस्मिन् काव्ये नीता परिलक्षन्ते। नाटकस्य प्रथमाङ्के कृष्णसारमृगस्य शरपतनभयात् पलायनमानस्य द्रुतमुल्लम्फनं परमशोभाजनकम्,-*

*"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः*
*पश्चार्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम्।*
*दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्माः*
*पश्योदग्रप्लुतत्वाद् वियति वहुतरं स्तोकमुर्व्यां प्रयाति॥"*

*कण्वाश्रमे वृक्षतले पतितं नीवारधान्यं मृगाणां निःशङ्कविचरणं नवपल्लवानि धूमाराशयश्च आश्रमशोभां विवर्धयन्ति। द्वितीय-तृतीयाङ्केऽपि प्राकतिकशोभां द्विगुणीकुर्वन्ति। चतुर्थाङ्कस्तु यथायथः प्रकृते लीलाभूमिः। तपोवनस्य सर्वैः चेतनाचेतनपदार्थैः सह शकुन्तलायाः ईदृशम् अन्तरङ्गम् आत्मीयत्वं ईदृशं च कल्याणवन्धनम् आसीत् यत् तस्याः पतिगृहयात्राकाले वनदेवता पितृकुटुम्बिन इव तस्यै मण्डनार्थं वसनाभरणानि उपढोकन्ते स्म। शकुन्तलायाः पतिगृहगमनावसरे आश्रमपादपा अमूल्याभरणप्रेषनेन शुभ्रपट्टवस्त्रप्रकाशनेन अलक्तकोद्गिरणेन सम्प्रीतिं सूचयन्ति।*

*पञ्चमाङ्के नागरिक परिवेशाधिक्येऽपि प्राकृतिकी शोभा स्वल्पशो विराजिता। षष्ठाङ्के प्रमोदवने वसन्तशोभा माधवीलतामण्डपं वा कस्य न मनो हरति। सप्तमाङ्के मारीचाश्रमे मन्दारादि-तरूणां समावेशः पद्मवनानि च पुनः पूर्णशोभासाधनाय अलम्। एवं सर्वेषु अङ्केषु प्राकृतिक-चित्रवाहुल्यम् इदमेव प्रतिभाति निसर्गराज्ये विलसति कालिदासः कविरिति।*

प्रकृतिः तत्परिवेशश्च मानवजीवनस्य एकः अपरिहार्यः अविच्छेद्यश्च अंशो भवति। अस्माकं चतुर्षु पार्श्वेषु स्थितैः वृक्ष-नदी-पक्षी-पर्वत-वनप्रभृतिभिः सजीवनिर्जीवोपादानैः निर्मितोऽयं प्राकृतिकपरिवेशः। विविधकवि-मानसे प्रकृतिभावना विविधरूपेण संलक्ष्यते। आदिकवेः वाल्मीकेः विरचिते रामायण-महाकाव्ये प्रकृतिभावना यथा,-

"सप्राज्यफलमूलानि पुष्पितानि वनानि च।

प्रशस्तमृगयूथानि शान्तपक्षिमृगानि च॥
फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च।
कारण्डवविकीर्णानि तटाकानि सरांसि च॥
द्रक्ष्यसे दृष्टिरम्यानि गिरिप्रस्रवणानि च।
रमनीयान्यरण्यानि मयूराभिरुतानि च॥"[1]

महाभारतेऽपि प्रकृतिभावना परिलक्ष्यते,-

"महान् वृक्षो जायते वर्धते च
तं चैव भूतानि समाश्रयन्ति।
यदा वृक्षश्छिद्यते दह्यते च
तदाश्रया अनिकेता भवन्ति॥"[2]

निसर्गवर्णनानिपुणः कविः कालिदासः काव्यनाटकेषु एवं स्ववैशिष्ट्यं प्रदर्शयति यत्र प्रकृत्या सह मानवमानसस्य प्रगाढं नैकट्यं दरीदृश्यते। जगति यत् सौन्दर्यं बहिःप्रकृतिं रञ्जयति आभ्यन्तर्यामपि प्रकृत्यां तदेव विलसति। इत्थं सौन्दर्यदृष्ट्या कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नास्ति। अपि तु तत्रासीत् पूर्णमद्वैतम्। महाकविः द्वयमेव समपक्षपातया भक्त्या असेवत। जडा प्रकृतिरपि भावविह्वला प्राणवती सती कालिदासस्यैव सृजनीशक्तिम् उद्घोषयति।

महाकवेः प्रकृतिप्रणयः खण्डकाव्ये ऋतुसंहारेऽपि वर्णितः। सा वर्णना एवं मनोरमा यत् पाठमात्रमेव ऋतुनामाविर्भावः अनुभूयते। कालिदासस्य ऋतुसंहारे प्रकृतिः न केवलमुद्दीपनरूपेण चित्रिता अभवत्, परन्तु सा तत्रालम्बनरूपेणापि वर्णिता आसीत्।

अपरखण्डकाव्ये मेघदूते यक्षस्य विरहिण्याः पत्न्याः सकाशे वार्तावहनाय मेघस्तु दौतकर्मणि नियुक्तः। अस्मिन् काव्ये धूमज्योतिःसलिलमरुतां सन्निपातः मेघः एव विरहिणो यक्षस्य सहृदयसखा इव सन्देशवाहकः। तत्रत्या प्राणचञ्चला प्राकृतिकी वर्णना पाठकानाम् अतीव मनोहारिणी सञ्जाता।

कुमारसम्भवकाव्ये हिमालयवर्णनं वसन्तवर्णनं च महता नैपुण्येन कृतम्। तत्र तरुलतापशुपक्षिणश्च नवनवरूपमण्डिताः कीदृशा लोचनलोभनीयाः श्रवणसुखकराश्च भवन्तीति तद्रवैः पाठका एव तद्विजानन्ति। कविस्तस्य रघुवंशनामके श्रेष्ठकाव्ये यादृशं प्राकृतिकवैचित्र्यं प्रकटयति नास्ति तस्य तुलना। तत्र नक्षत्रशोभितगगनं फेनिल-नील समुद्रः चिरहरिद्वनस्थली वा कस्य न चित्तम् आन्दोलयति। मानवमनसा समभावप्रवणां प्रकृतिम् अङ्कयति अत्र कविः। अतः सीतादुःखेन व्यथिता भागीरथी लक्षणं सीतानिर्वासनाद् निवारयति तरङ्गभङ्गेन। तरु-लता-मृग-मयूराः सर्वे क्रन्दन्ति सीतासन्तापात्। उक्तञ्च,-

"नृत्यं मयूराः कुसुमानि वृक्षा
दर्भानुपातान् विजहुर्हरिणाः।
तस्याः प्रपन्ने समदुःखभावम-
त्यन्तमासीद् रुदितं वनेऽपि॥"[3]

यथा काव्ये तथा नाटकेऽपि प्रकटितं कविचातुर्यं प्राकृतिकवर्णनायां मालविकाग्निमित्रे महाकविना कमनीयकलेवरा मालविका प्रकृतिदेव्याः प्रतिमूर्तित्वेन कल्पयित्वा सन्निवेशिता। विक्रमोर्वशीयनाटके राजा उर्वशीसन्धानाय सकरुणं विलपति प्रति तरु, प्रति गुल्मं, प्रति जीवं च, येन कारुण्येन अमानुषो जीवोऽपि संवेदनशीलो भवति।

कवेः सर्वाधिकं वैशिष्ट्यं विलोकितं नाटकश्रेष्ठे अभिज्ञानशकुन्तले। इदमेव नाटकं प्रकृतिराज्यम्। काव्यमिदं प्रकृतेरनुपमा रङ्गशाला इव भाति। यथा प्रेक्षागृहे उपविष्टः सहृदयः प्रेक्षकः रङ्गमध्ये विविधानि विचित्राणि दृश्यानि पश्यति, तथा अत्रापि सहृदयः

---

[1] रामायणम्, अरण्यकाण्डम्, ८ अध्यायः, १२-१५

[2] महाभारतम्, शान्तिपर्वम्, ९१.२६

[3] रघुवंशम्, १४ सर्गः, ६९

ISSN : 2583-2271
Vol. - I, No. 1: 2021

पाठकः स्वसमक्षे चित्ताकर्षकाणि प्रकृतेः बहूनि रूपाणि नवनवानि प्रेक्षते, यानि कवेः प्रकृतिं प्रति निगूढम् आकर्षणं तच्चित्रणकौशलं च प्रकटयन्ति। यद्यपि प्रकृतिवर्णना महाकवेः सर्वासु रचनासु न्यूनाधिकं संलक्ष्यते, तथापि तद्वर्णनायां महाकवेः इतरकविविलक्षणा या प्रतिभा सा तु तस्य अभिज्ञान-शकुन्तलम् नाटके वाहुल्येन लभ्यते।

अस्मिन् नाटके प्रकृतिः यादृशीं प्रधानतां गमितासीत् न तादृशं कस्मिंश्चिदन्यस्मिन् काव्ये परिलक्ष्यते। चेतनाचेतनादीनि प्रकृत्यङ्गभूतानि सर्वाणि अत्र महाकवेः लेखनीस्पर्शेन न केवलं मानवप्रकृत्या तादात्म्यं लभते, परं तु पशुपक्षिवृक्षलतादिकम् आत्मभावं रक्षित्वापि मानवैः सह आत्मीयतां भजते, मानववत् आचरति च । अत्र जडप्रकृतिरपि ईदृशी संवेदनशीला प्रदर्शितास्ति यत् सा तेषां सम्पत्तौ हर्षोत्फुल्ला विपत्तौ च तेषां विमर्षा भवन्ति। नाटकेऽस्मिन् वस्तुतः अन्यपात्राणामिव प्रकृतेरपि प्रमुखा भूमिकास्ति या कथमपि न उपेक्षणीया।

अभिज्ञान-शकुन्तलस्य सर्वेषु अङ्केषु प्राकृतिकः परिवेशः प्रकटितः। प्रथमाङ्के कृष्णसारमृगस्य शरपतनभयात् पलायनमानस्य द्रुतमुल्लम्फनं परमशोभाजनकम्,-

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्माः
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां
प्रयाति॥"[4]

कण्वाश्रमे वृक्षतले पतितं नीवारधान्यं मृगाणां निःशङ्कविचरणं नवपल्लवानि धूमाराशयश्च आश्रमशोभां विवर्धयन्ति -

"नीवाराः शुकगर्भकोटरमुखभ्रष्टा-स्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवपलाः।
विश्वासोपगमादभिन्नगतयः शव्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिस्यन्द-
रेखाङ्किताः॥"[5]

द्वितीयाङ्के घनसन्निविष्टं लतागृहं नयनलोभनीयं सञ्जातम्। राजा दुष्यन्तः निभृते शिलातलमुपविश्य वयस्यमाधवस्य पुरतः शकुन्तलाविषयिणीं कथाम् उपस्थापयन् विविधरूपेण शकुन्तलायाः अलोकसामान्यं सौन्दर्यवर्णनमकरोत् -

"अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रुपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति॥"[6]

अत्र रूपवर्णनेन सह प्रकृतिप्रीतिबन्धनमासीत्।

तृतीयाङ्के मालिनीतीरे वेतसवने लतामण्डपं मृदुसमीरणः सुमिष्टः पद्मगन्धः प्राकृतिकशोभां द्विगुणीकरोति। चतुर्थाङ्कस्तु यथायथः प्रकृतेः लीलाभूमिः। समग्रा प्रकृतिः शकुन्तलायाम् अनुरागवती। तपोवनस्य सर्वैः चेतनाचेतनपदार्थैः सह शकुन्तलायाः ईदृशम् अन्तरङ्गम् आत्मीयत्वम् ईदृशं च कल्याणबन्धनम् आसीत् यत्, तस्याः पतिगृहयात्राकाले वनदेवता पितृकुटुम्बिन इव तस्यै मण्डनार्थं वसनाभरणानि उपढौकन्ते स्म। शकुन्तलायाः पतिगृहगमनावसरे आश्रमपादपा अमूल्याभरणप्रेषणेन शुभ्रपट्टवस्त्रप्रकाशनेन अलक्तकोद्गिरणेन सम्प्रीतिं सूचयन्ति,-

"क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्ठ्युतश्चरणोपरागसुभगो लाक्षारसः केनचित्।

---

[4] अभिज्ञान-शकुन्तलम्, १.७

[5] अभिज्ञान-शकुन्तलम्, १.१४

[6] अभिज्ञान-शकुन्तलम्, २.१०

ISSN : 2583-2271
Vol. - I, No. 1: 2021

अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-

र्दत्तान्याभरणानि नः किशलयोद्भेदप्रतिद्वन्द्विभिः॥"[7]

काश्यपः तस्याः तपोवनत्यागे स्वजनान् इव तपोवनप्रकृतिभूतान् वृक्षलतादीन् अनुज्ञां याचते। भो भो सन्निहितास्तपोवनतरवः,-

"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,

नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।

आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः

सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥"[8]

कोकिलाः मधुररुतेन अनुज्ञां ज्ञापयन्ति स्म। आसन्नवियोगं विचिन्त्य न केवलं तपोवनविरहकातरा शकुन्तला, परं तया उपस्थितवियोगस्य तपोवनस्यापि समदशा अजायत। तथाचोक्तं,-

"उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयुराः।

अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥"[9]

सखीद्वयेन सह कण्वो यथा विलपति प्रकृतिश्च तथैव शोचति। मृगशिशुरासन्नमातृवियोगभिया शकुन्तलायाः वस्त्राञ्चलमाकृष्य गमनान्निवारयति। सर्वे एव वियोगकातराः स्वजना इव आचरन्ति। कविवर्णितं सर्वं कारुण्यं साक्षादिवानुभवन्तः सहृदयसामाजिकाः स्वसत्तां विस्मृताः तपोवनसत्त्वैः सह तादात्म्यं भजन्ते। पञ्चमाङ्के नागरिक परिवेशात् अधिकोऽपि प्राकृतिकी शोभा स्वल्पशो विराजिता। षष्ठाङ्के प्रमोदवने वसन्तशोभा माधवीलतामण्डपं वा कस्य न मनो हरति। राज्ञः विरहदशायां प्रकृतिरपि समव्यथिता,-

"चुतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः

सन्नद्धं यदपि स्थितं कुरवकं तत् कोरकावस्थया।

कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतम्

शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम्॥"[10]

सप्तमाङ्के मारीचाश्रमे मन्दारादि-तरूणां समावेशः पद्मवनानि च पुनः पूर्णशोभासाधनाय अलम् एवं सर्वेषु अङ्केषु प्राकृतिकचित्रबाहुल्येन इदमेव प्रतिभाति निसर्गराज्ये विलसति कालिदासः कविरिति।

अस्मिन् नाटके वर्णिता प्रकृतिः न कदापि बहिरतिष्ठत् परं तु शकुन्तलाचरित्रे एव तस्याः उन्मेषः साफल्येन कृतः। अतः तपोवनपरिवेष्टनात् तस्याः बहिरानयनम् असम्भवम्। तपोवनं परितज्य गन्तुमुद्यतायाः तस्याः आकर्षणं प्रतिपदं वेदना च पदे पदे। प्रकृतेः मानवस्य च विच्छेदः एतादृशः मर्मन्तुदः सकरुणश्च भवितुमर्हति इति जगति साहित्येषु सर्वेषु अभिज्ञान-शकुन्तले एव केवलं लभ्यते। अस्मिन् काव्ये यथा धर्मनियमेन सह स्वभावस्य समन्वयो दृश्यते, तथा प्रकृत्या सह मानवस्य परस्परसाहचर्यमपि लतायाः पुष्पेण सह यः सम्बन्धः तथा तपोवनपरिवेशेन सह शकुन्तलायाः स्वाभाविकः सम्बन्धः। अस्मिन् विषये रवीन्द्रनाथस्य मन्तव्यमुद्धृत्य उपसंहारः क्रियते-

"अभिज्ञानशकुन्तलनाटके अनसूया प्रियंवदा येमन, कण्व येमन, दुष्यन्त येमन, तपोवन प्रकृतिओ तेमनि एकजन विशेष पात्र। एइ मूक प्रकृतिके कोन नाटकेर भितर एमन प्रधान, एमन अत्यावश्यक स्थान देओया याइते पारे, ताहा वोधकरि, संस्कृतसाहित्य छाडा आर कोथाओ देखा याय नाइ। प्रकृतिके मानुष करिया तुलिया ताहार मुखे कथावार्ता वसाइया रूपकनाट्य रचित हइते पारे, किन्तु प्रकृतिके प्रकृत राखिया एमन अन्तरङ्ग करिया तोला, ताहार द्वारा नाटकेर एत कार्य साधन कराइया लओया एतो अन्यत्र देखि नाइ।"[11]

[7] अभिज्ञान-शकुन्तलम्, ४.५

[8] अभिज्ञान-शकुन्तलम्, ४.९

[9] अभिज्ञान-शकुन्तलम्, ४.१२

[10] अभिज्ञान-शकुन्तलम्, ६.४

[11] प्राचीनसाहित्य, रवीन्द्रनाथ

**सहायकग्रन्थाः**


- वाल्मीकि-रामायणम् (द्वितीयखण्ड)। सम्पा. ड. रविप्रकाश आर्य। दिल्ली- परिमल पावलिकेशन, २००४
- महाभारतम्(पञ्चम षष्ठखण्डम् च)। सम्पा. पण्डित रामनारायणदत्त शास्त्री पाण्डेय। गोरखपुर- गीताप्रेस, १९६५
- कालिदास। अभिज्ञानशकुन्तलम्। सम्पा. सत्यनारायण चक्रवर्ती। कलिकाता- संस्कृत पुस्तकभाण्डार, १९८८
- कालिदास। अभिज्ञानशकुन्तलम्। सम्पा. एम.आर.काले। दिल्ली- मोतिलाल वाणारसी दास, १८९८ कालिदास। अभिज्ञानशकुन्तलम्। सम्पा. ड. अनिलचन्द्र वसु। कलिकाता- संस्कृत वुक डिपो, २००३

# लेखकपरिचितिः

१. ड. गगनचन्द्रदे

सहाचार्यः, संस्कृतविभागः, सबं सजनीकान्तमहाविद्यालयः, लुटुनिआ, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः।

२. ड. बिष्णुपदमहापात्रः

आचार्यः, विषयप्रमुखश्च, न्यायवैशेषिकविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, दिल्ली।

३. ड. बुद्धेश्वरषडङ्गी

सहाचार्यः, संस्कृतविभागः, श्रीसीतारामवैदिका-दर्शसंस्कृतमहाविद्यालयः, कलिकाता, पश्चिमबङ्गः

४. डा. चन्द्रकला आर्. कोण्डी

सहायकाचार्या, राष्ट्रिय-संस्कृत-संस्थानम्, राजीवगान्धीपरिसरः, शृङ्गेरी।

५. शिवप्रसादपोख्रेलः

उपाचार्यः, व्याकरणविभागः, शासकीयसंस्कृत महाविद्यालयः , सामदोङ , पूर्वसिक्किम।

६. ड. गोपीकृष्णन्-रघुः

सहायकाचार्यः, संस्कृताध्ययनविभागः, रामकृष्णमिशन् विवेकानन्दविश्वविद्यालयः, बेलूरमठः, हाओडा, पश्चिमवङ्गः, ७११२०२।

७. ड. लक्ष्मीकान्तषडङ्गी

संस्कृतविभागाध्यक्षः, योगदासत्सङ्गपाल-पाडामहाविद्यालयः, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः।

८. ड. जगमोहन-आचार्यः

सहायकाचार्यः, संस्कृतविभागः, खडगपुरमहाविद्यालयः, पश्चिमबङ्गम्।

९. ड. गगनचन्द्रदे

सहाचार्यः, संस्कृतविभागः, सबं सजनीकान्तमहाविद्यालयः, लुटुनिआ, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः।

१०. सुमन्तचौधुरी

सहायकाध्यापकः, संस्कृतविभागः, सबं सजनीकान्तमहाविद्यालयः, लुटुनिआ, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः।

११. सुकान्त मान्ना

शोधच्छात्रः, रामकृष्ण-मिशन्विवेकानन्द-शैक्षणिकशोधसंस्थानम्, बेलुडमठः, पश्चिमबङ्गः।

१२. श्रीजीव-गोस्वामी

सहायकाध्यापकः, गभर्न्मेन्ट जेनारेल डिग्री कलेज, नारायणगडः, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः।

१३. दीपकगराइ

सहायकाध्यापकः, संस्कृतविभागः, बिजय-नारायणमहाविद्यालयः, इटाचुना, हुगली, पश्चिमबङ्गः।

१४. सुरजित् मण्डलः

शोधच्छात्रः , न्यायविभागः श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, ११००१६।

१५. जयदेवदिण्डा

शोधच्छात्रः, रामकृष्ण-मिशन्विवेकानन्द-शैक्षणिकशोधसंस्थानम्, बेलुडमठः, पश्चिमबङ्गः।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

## १६. सुचन्द्रा मुखर्जी

अतिथि अध्यापिका, संस्कृतविभागः, निस्तारिणी महाविद्यालयः, पुरुलिया।

## १७.निमाइ साँतरा

SACT, संस्कृतविभागः, सबं सजनीकान्तमहाविद्यालयः, लुटुनिआ, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः।

## १८. सुप्रिया-सुइ

सहायकाध्यापिका, संस्कृतविभागः, सबं सजनीकान्तमहाविद्यालयः, लुटुनिआ, पश्चिममेदिनीपुरम्, पश्चिमबङ्गः।

## १९. गौराङ्ग-शो

SACT, नेताजी शतवार्षिकी महाविद्यालयः, अशोकनगरः, दक्षिण २४ परगना, पश्चिमबङ्गः।

## २०.सत्येन्द्रनाथ-आदकः

अध्यापकः, संस्कृतविभागः, योगदा सत्सङ्ग पालपाडा महाविद्यालयः, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः।

## २१. कृष्णगोपालपात्रः

शोधच्छात्रः, रामकृष्ण-मिशन्विवेकानन्द-शैक्षणिकशोधसंस्थानम्, बेलुडमठः, पश्चिमबङ्गः।

## २२. सुस्मिता-दे

SACT, संस्कृतविभागः, सबं सजनीकान्तमहाविद्यालयः, लुटुनिआ, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः।

# लेखकानां कृते निर्देशावलिः

- मनीषाख्यायां संस्कृतशोधपत्रिकायां संस्कृतसम्बन्धिविविधतत्त्वानामेव प्रकाशनं भवति।
- अस्यां पत्रिकायां संस्कृतभाषायां देवनागरीलिप्यां च लिखिताः शोधप्रबन्धा एव गृहीता भवन्ति।
- प्रेषितेषु शोधलेखेषु विद्वद्भिः परीक्षिताः शोधलेखा एव स्वीकृता भवन्ति। लेखानां चयने संशोधने परिवर्धने च सम्पादकमण्डली एव प्रमाणम्।
- मनीषाख्यायां शोधपत्रिकायां प्रकाशनार्थं प्रेषिताः शोधलेखाः शुद्धाः, मौलिकाः, प्रामाणिकाः, अन्यत्र कुत्रचित् पूर्वम् अप्रकाशिताश्च स्युः। एतदर्थं लेखकाः प्रमाणपत्रमेकं प्रयच्छेयुः।
- शोधप्रबन्धः २०००-२५००संख्यकैः शब्दैः लिखितः स्यात्।
- मनीषाख्यशोधपत्रिकायाः कृते शोधलेखस्य मूलप्रतिः प्रेषणीया। हस्तलिखितलेखाः छायाप्रतयश्च नैव स्वीक्रियन्ते। केवलं शुद्धटङ्किता लेखा एव गृह्यन्ते। A4-परिमिते पत्रे Unicode-आधारितदेवनागरीलिप्या (Sanskrit 2003, Lohit Hindi, Kalimati) अधोनिर्दिष्ट-अक्षरमानेन टङ्किताः स्युः। पार्श्वसीमा प्रतिदिशं १-इञ्च् देया।
- प्रबन्धस्य अन्तिमे लेखकस्य नाम, वृत्तिः, सङ्केतः, दूरभाषक्रमाङ्कः, ई-मेलसङ्केतश्च अवश्यं लेखनीयम्।
- **शोधलेखे अवश्यं देयाः अंशाः**
    - ➢ शोधशीर्षकम् (यथासम्भवं लघु, विषयवस्तुबोधनसमर्थं च भवेत्) [अक्षरमानम् -१६]
    - ➢ लेखकनाम [अक्षरमानम् -१४]
    - ➢ प्रबन्धसारः (१५०-२००संख्यकैः अक्षरैः भवेत्) [अक्षरमानम् -१०, italics]
    - ➢ कुञ्चीशब्दाः (पञ्च) [अक्षरमानम् -११]
    - ➢ विषयः (भूमिकादिरूपेण सज्जितः स्यात्) [अक्षरमानम् -११]
        - ❖ बिन्दुः (Points) - [अक्षरमानम् -१२, Bold]
    - ➢ सहायकग्रन्थसूची [अक्षरमानम् -११]
- **पादटिप्पणीनियमाः**
    - ➢ वेद-उपनिषद्-रामायण-भगवद्गीता-महाभारत-पुराण-अष्टाध्यायीसूत्र-ग्रन्थादिभ्यः मन्त्राणां श्लोकानां सूत्राणां वा उद्धरणे तेषां पार्श्वे एव [वाल्मिकीयरामायणम् ५४/३०-३१] इत्येवंरूपेण कर्तव्यम्।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

- पङ्क्तीनामुद्धरणविषये ग्रन्थः टीकारूपश्चेत् पादटिप्पण्यां मूलग्रन्थेन साकं टीकाया नाम अपि उल्लेख्यम्। यथा–

१कठोपनिषद् १-२-४ मन्त्रस्य शाङ्करभाष्यम्

- मूलग्रन्थेभ्यो यदि पङ्क्तयः स्वीक्रियन्ते तदा तद्ग्रन्थस्य नाम, अध्यायनाम, श्लोकसंख्यादिकं च प्रदेयम्।
- आधुनिकग्रन्थेभ्यो पङ्क्तीनामुद्धरणविषये तु ग्रन्थकारस्य नाम पृष्ठसंख्या च प्रदेया।
- पादटिप्पण्युक्तग्रन्थानां विस्तृतं विवरणं ग्रन्थसूचीमध्ये प्रदेयम्।

- **ग्रन्थसूचीनियमाश्च**
  - ग्रन्थकारः। (प्रकाशनवर्षम्)। ग्रन्थस्य नाम। सम्पादकः। प्रकाशनस्थानम् : प्रकाशकः। यथा–

भर्तृहरिः। (२००७)। वाक्यपदीयम् (ब्रह्मकाण्डम्)। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।

- लेखानां प्रेषयाण ई-पत्रसङ्केतः – manisha.sskm@gmail.com
- लेखसम्बन्धिजिज्ञासा पूर्वोक्त-ईपत्रसङ्केतमाध्यमेनैव प्रेषणीया।
- यथासमयं लेखः प्रेषणीयः।
- शोधपत्रिकाविषये अधिकज्ञानार्थं https://sabangcollege.ac.in/wp-content/uploads/2021/05/MANISHA-A-Research-Journal-of-Sanskrit-Vol.-1-No.-1-2021.pdf इति अन्तर्जालपत्रं पश्यतु।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

# उद्घोषणा

| | | | |
|---|---|---|---|
| १. | पत्रिकानाम | - | मनीषा |
| २. | प्रकाशनावधिः | - | वार्षिकी |
| ३. | भाषा | - | संस्कृतम् |
| ४. | लिपिः | - | देवनागरी |
| ५. | प्रकाशनस्थानम् | - | सबं-सजनीकान्तमहाविद्यालयः |
| ६. | प्रकाशकस्य नाम | - | स्नातकोत्तरसंस्कृतविभागः |
| ७. | जातीयता | - | भारतीयः |
| ८. | सङ्केतः | - | सबं-सजनीकान्तमहाविद्यालयः |
| ९. | पत्रिकाधिकारिणो नाम सङ्केतश्च | - | प्रो. (ड.) तपनकुमारदत्तः, अध्यक्षः<br>सबं सजनीकान्तमहाविद्यालयः,<br>लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६,<br>पश्चिमबङ्गः |

अहं प्रो. (ड.) तपनकुमारदत्तः उपरि प्रदत्तं तथ्यजातं यथार्थमिति उद्घोषयामि।

प्रो. (ड.) तपनकुमारदत्तः

अध्यक्षः

सबं-जनीकान्तमहाविद्यालयः